বিজ্ঞাপন

অভিজ্ঞানশকুন্তল ভারতবর্ষের অদ্বিতীয় কবি কালিদাসের অমৃতময়ী লেখনীর মুখ হইতে বিনির্গত। কালিদাস কীদৃশ কবিত্বশক্তি সম্পন্ন ছিলেন, বর্ণনা করিয়া অন্যের হৃদয়ঙ্গম করা অসাধ্য। যাঁহারা কাব্যশাস্ত্রের রসাস্বাদে যথার্থ অধিকারী, সেই সদহৃয় মহাশয়েরাই বুঝিতে পারেন, কালিদাস কিরূপ কবিত্বশক্তি লইয়া ভূমণ্ডলে অবতীর্ণ হইয়াছিলেন। তিনি সংস্কৃতভাষায় সর্ব্বোৎকৃষ্ট নাটক, সর্ব্বোৎকৃষ্ট মহাকাব্য, সর্ব্বোৎকৃষ্ট খণ্ডকাব্য লিখিয়া গিয়াছেন। কোনও দেশের কোনও কবি, কালিদাসের ন্যায়, সকল বিষয়ে সমান সৌভাগ্যশালী ছিলেন না, এরূপ নির্দ্দেশ করিলে, বোধ হয়, অত্যুক্তিদোষে দূষিত হইতে হয় না।

২। কালিদাস যে অদ্ভুত কবিত্বশক্তি লাভ করিয়াছিলেন, স্বপ্রণীত কাব্যসমূহে তাহার সম্পূর্ণ পরিচয় প্রদান করিয়া গিয়াছেন। তদীয় গ্রন্থ পাঠে, সহৃদয় ব্যক্তি মাত্রের হৃদয়কন্দর অনির্বচনীয় আনন্দরসে উচ্ছলিত হইয়া উঠে। বর্ণনার চাতুর্য্য ও রচনার মাধুর্য্য বিষয়ে কালিদাসের প্রতিদ্বন্দ্বী নাই। তদীয় বর্ণনা পাঠ করিলে, মোহিত ও চমৎকৃত হইতে হয়। তদীয় রচনা সংস্কৃতরচনার আদর্শস্বরূপ হইয়া রহিয়াছে। বস্তুতঃ, এরূপ রচনাশক্তি, এরূপ কবিত্বশক্তি, এ উভয়ের একত্র সংঘটন অতি বিরল। এই নিমিত্তই, ভারতবর্ষীয় লোকে, একবাক্য হইয়া, কালিদাসকে সরস্বতীর বরপুত্র বলিয়া নির্দ্দেশ করিয়া থাকেন।

বিজ্ঞাপন।

৩। অদ্বিতীয় গুণগ্রাহী, নিরতিশয় বিদ্যোৎসাহী, বিখ্যাতনামা বিক্রমাদিত্যের সভায় নয় জন অতি প্রসিদ্ধ পণ্ডিত ছিলেন। তাঁহারা অদ্যাপি নবরত্ন নামে সচরাচর উল্লিখিত হইয়া থাকেন। তন্মধ্যে কালিদাস সর্ব্বপ্রধান রত্ন ছিলেন। চিরস্মরণীয় উজ্জয়িনী-পতি যে শাক প্রচলিত করিয়া গিয়াছেন, তাহার নাম সংবৎ। সংবতের ১৯২৭ বৎসর অতিক্রান্ত হইয়াছে। সুতরাং, কালিদাস, ঊনবিংশতি শত বৎসর পূর্ব্বে, প্রাদুর্ভূত হইয়াছিলেন।

৪। অভিজ্ঞানশকুন্তল কালিদাসের সর্ব্বপ্রধান কাব্য এবং সংস্কৃত ভাষায় সর্ব্বোৎকৃষ্ট নাটক। এই অপূর্ব্ব নাটকের, আদি অবধি অন্ত পর্য্যন্ত, সর্ব্বাংশই সর্ব্বাঙ্গসুন্দর। ইহাতে হস্তিনাপুরের অধিপতি রাজা দুষ্যন্তের, এবং মহর্ষি কণ্বের পালিততনয়া শকুন্তলার, বৃত্তান্ত বর্ণিত হইয়াছে। মহাভারতের আদিপর্ব্বে দুষ্যন্ত ও শকুন্তলার যে উপাখ্যান আছে, তাহা অবলম্বন করিয়া, কালিদাস অভিজ্ঞান-শকুন্তল রচনা করিয়াছেন। উভয়বিধ শকুন্তলোপাখ্যান পাঠ করিলে বুঝিতে পারা যায়, কালিদাস মহাভারতীয় উপাখ্যানে কি অদ্ভুত কৌশল ও অলৌকিক চমৎকারিত্ব সমাবেশিত করিয়াছেন। ফলতঃ, অভিজ্ঞানশকুন্তলে কালিদাসের চমৎকারিণী কল্পনাশক্তি ও চিত্ত-হারিণী রচনাশক্তির পরা কাষ্ঠা প্রদর্শিত হইয়াছে। এই নাটক পাঠ করিলে, সংস্কৃতজ্ঞ সহৃদয় ব্যক্তির অন্তঃকরণে নিঃসংশয় এই প্রতীতি জন্মে, মানুষের ক্ষমতায় ইহা অপেক্ষা উৎকৃষ্ট রচনা সম্ভবিতে পারে না। বস্তুতঃ, কালিদাসের অভিজ্ঞানশকুন্তল অলৌকিক পদার্থ। ধন্য কালিদাস! ধন্য অভিজ্ঞানশকুন্তল! প্রলয়ের পূর্ব্বে তোমাদের বিলয় নাই। ধন্য বিক্রমাদিত্য! এই কালিদাস তোমার বয়স্য ও সভাসদ ছিলেন; এই অভিজ্ঞানশকুন্তল, তোমার পরিতোষার্থে, সর্ব্ব প্রথম উজ্জয়িনীর রঙ্গভূমিতে অভিনীত হইয়াছিল।

৫। দ্বাত্রিংশৎ বৎসর অতীত হইল, কলিকাতাস্থ সংস্কৃত বিদ্যালয়ের

ভূতপূর্ব্ব অলঙ্কারশাস্ত্রাধ্যাপক পূজ্যপাদ প্রেমচন্দ্রতর্কবাগীশ মহাশয় এ দেশে সর্ব্বপ্রথম এই নাটক মুদ্রিত করিয়াছিলেন। তৎপরে বিংশতি বৎসর অতীত হইলে, উক্ত বিদ্যালয়ের পূর্ব্বতন অধ্যক্ষ উদারচরিত শ্রীযুত ই, বি, কাউএল মহোদয়ের উদ্যোগে ও অর্থব্যয়ে, তর্কবাগীশ মহাশয় সংক্ষিপ্ত ব্যাখ্যা সহিত দ্বিতীয় সংস্করণ প্রচারিত করেন। অনন্তর, দুই বৎসর অতিক্রান্ত হইল, পূর্ব্বস্থলীনিবাসী শ্রীযুত কৃষ্ণনাথন্যায়পঞ্চানন, আদ্যোপান্ত ব্যাখ্যা সহিত, অভিনব সংস্করণ প্রচারিত করিয়াছেন। ন্যায়পঞ্চানন মহাশয় সুপণ্ডিত ও কাব্যশাস্ত্রে বিলক্ষণ প্রবীণ। তদীয় যত্নে ও পরিশ্রমে এই নাটকের অনুশীলন বিষয়ে সবিশেষ সুবিধা ঘটিয়াছে।

৬। শেষোক্ত উপাদেয় সংস্করণদ্বয় বিদ্যমান থাকিতে, নূতন সংস্করণে প্রবৃত্ত হইবার কারণ এই যে, অভিজ্ঞানশকুন্তল কলিকাতা বিশ্ববিদ্যালয়ের পরীক্ষাপুস্তক স্থিরীকৃত হইয়াছে। বিশ্ববিদ্যালয়ের অধ্যক্ষেরা আদেশ করিয়াছেন, ভারতবর্ষের উত্তরপশ্চিম অঞ্চলে এই নাটকের যেরূপ পুস্তক প্রচলিত আছে, পরীক্ষাদানার্থীরা সেই পুস্তক পাঠ করিবেন। পূজ্যপাদ তর্কবাগীশ মহাশয় অথবা ন্যায়পঞ্চানন মহাশয় গৌড়দেশপ্রচলিত পুস্তকের সংস্করণ করিয়াছেন। গৌড়-দেশে প্রচলিত ও উত্তরপশ্চিম অঞ্চলে প্রচলিত, উভয়বিধ পুস্তকে পাঠের পরস্পর এত বিভিন্নতা ঘটিয়াছে যে একবিধ পুস্তক পাঠ করিলে, অপরবিধ পুস্তক পাঠের প্রয়োজন সম্যক সম্পন্ন হয় না। সুতরাং, বিশ্ববিদ্যালয়ের উদ্দেশ্য সিদ্ধির নিমিত্ত, উত্তরপশ্চিম অঞ্চলের প্রচলিত পুস্তকের সংস্করণ নিতান্ত আবশ্যক হইয়া উঠে।

৭। অষ্টাদশ বৎসর অতীত হইল, অক্সফোর্ড বিশ্ববিদ্যালয়ের সংস্কৃতাধ্যাপক শ্রীযুত মনিয়র উইলিয়মৃস মহোদয় ইংলণ্ডদেশে উক্তবিধ পুস্তকের অত্যুৎকৃষ্ট সংস্করণ প্রচারিত করিয়াছেন। এই সংস্করণ প্রায় যাবতীয় দুরূহ স্থলের ইঙ্গরেজীভাষায় লিখিত ব্যাখ্যামালায় অলঙ্কৃত।

সংস্করণকার্য্যে উক্ত মহোদয়ের যথোচিত যত্ন, সবিশেষ পরিশ্রম ও সাতিশয় সহৃদয়তা প্রদর্শিত হইয়াছে। অত্রত্য বিশ্ববিদ্যালয়ের পরীক্ষাদানার্থীদিগের যেরূপ পুস্তকের প্রয়োজন, এই সংস্করণ সর্ব্বাংশে সেই রূপে সম্পন্ন হইয়াছে। কিন্তু তদীয় পুস্তক এদেশীয় বিদ্যার্থীদিগের পক্ষে সর্ব্বতোভাবে সুলভ নহে; সুতরাং, তদ্দ্বারা এ দেশে উত্তরপশ্চিম অঞ্চলের প্রচলিত পুস্তকের অসদ্ভাব নিরাকৃত হইতেছে না। সেই অসদ্ভাবের পরিহারবাসনায় এই সংস্করণ প্রচারিত হইল।

৮। এ দেশে উত্তরপশ্চিম অঞ্চলের প্রচলিত পুস্তকের প্রচার নাই। উক্তবিধ পুস্তক প্রেরণের নিমিত্ত, আমি বারাণসীনিবাসী এক আত্মীয়ের নিকট প্রার্থনা করিয়াছিলাম। এই প্রার্থনা ফলবতী হয় নাই। এ বিষয়ে অন্যান্য চেষ্টা করিয়াও, কৃতকার্য্য হইতে পারি নাই। ফলতঃ, পুস্তক প্রাপ্তি বিষয়ে প্রথমতঃ বিলক্ষণ অসুবিধা ঘটিয়াছিল। পরে, আমি কার্য্যবশতঃ গত ফাল্গুনমাসে বারাণসীধামে গিয়াছিলাম। ঐ সময়ে উক্ত নগরী নিবাসী শ্রীযুত বাবু হরিশ্চন্দ্রের সহিত আমার আলাপ হয়। এই মহোদয় দয়া করিয়া, স্বীয় পুস্তকালয় হইতে, আমায় তিন খানি মূল, এক খানি টীকা ও তিন খানি প্রাকৃতবিকৃতি দিয়াছিলেন। অনন্তর, কলিকাতা সংস্কৃতবিদ্যালয়ের অধ্যক্ষ আমার পরমাত্মীয় শ্রীযুত বাবু প্রসন্নকুমার সর্ব্বাধিকারীর উদ্যোগে, বারাণসী-সংস্কৃতবিদ্যালয় হইতেও দুই খানি মূল আমার হস্তগত হয়। এই পাঁচ খানি মূল, এক খানি টীকা ও তিন খানি প্রাকৃতবিকৃতি অবলম্বন পূর্ব্বক, অভিজ্ঞানশকুন্তলের সংস্করণকার্য্য সম্পাদিত হইয়াছে।

৯। উল্লিখিত নয় পুস্তকে স্থলে স্থলে পাঠের বিভিন্নতা আছে। পাঠভেদস্থলে, আমার বিবেচনায় যে পাঠ প্রশস্ত বোধ হইয়াছে, তাহাই মূলে সন্নিবেশিত করিয়াছি। কিন্তু, কেবল আমার মীমাংসার উপর নির্ভর না করিয়া, পাঠকগণ স্বয়ং বিবেচনা করিতে পারিবেন, এজন্য সেই সেই স্থলে, সকল পুস্তকের পাঠ নিম্নে প্রদর্শিত

হইয়াছে। বাবু হরিশ্চন্দ্রের দত্ত তিন খানি মূলের মধ্যে দুই খানি সমগ্র, তন্মধ্যে এক খানি নূতন, দ্বিতীয় খানি পুরাতন; নূতন পুস্তকের পাঠ ১ সংখ্যায়, পুরাতন পুস্তকের পাঠ ২ সংখ্যায়, অঙ্কিত হইয়াছে; তৃতীয় পুস্তক আদিমধ্যখণ্ডিত; এই পুস্তকের পাঠ ৩ সংখ্যায় অঙ্কিত হইয়াছে। বারাণসীবিদ্যালয়ের দুই পুস্তকই অন্তখণ্ডিত; তন্মধ্যে যে পুস্তক খানি অতি অল্প অংশে খণ্ডিত, তাহার পাঠ ৪ সংখ্যায় অঙ্কিত; অপর খানির পাঠ ৫ সংখ্যায় অঙ্কিত, হইয়াছে। টীকা অনুযায়ী পাঠ ৬ সংখ্যায় অঙ্কিত হইয়াছে। প্রাকৃতবিকৃতির মধ্যে, এক খানি সমগ্র, অপর দুই খানি খণ্ডিত; সমগ্র পুস্তক অনুযায়ী পাঠ ৭ সংখ্যায়, খণ্ডিত দ্বিতয়ের মধ্যে প্রাচীনতর পুস্তক অনুযায়ী পাঠ ৮ সংখ্যায়, অপর পুস্তক অনুযায়ী পাঠ ৯ সংখ্যায়, অঙ্কিত হইয়াছে।

১০। আমি উত্তরপশ্চিম অঞ্চলের প্রচলিত পুস্তকের সংস্করণে প্রবৃত্ত হইয়াছিলাম, এজন্য আদ্যোপান্ত উল্লিখিত পুস্তক সমুদয়ের সম্পূর্ণ অনুসরণ করিয়াছি। তবে, যেখানে সেই সেই পুস্তকের অনুযায়ী পাঠ কোনও রূপে সংলগ্ন হয় না, এরূপ বোধ জন্মিয়াছে, কেবল তাদৃশ কতিপয় স্থলে, অগত্যা গৌড়দেশের প্রচলিত পুস্তক অনুযায়ী পাঠ অবলম্বন করিতে হইয়াছে। এতদ্ব্যতিরিক্ত, স্থলবিশেষে কোনও কোনও পাঠ, লিপিকরপ্রমাদদূষিত বিবেচনা করিয়া, কিঞ্চিৎ অংশে পরিবর্ত্তিত করিয়াছি। এইরূপে পরিবর্ত্তিত পাঠ সকল স্বতন্ত্র প্রদর্শিত হইয়াছে।

১১। অধ্যয়ন ও অধ্যাপনা কার্য্যের সৌকর্য্যার্থে দুরূহ স্থলের ব্যাখ্যা লিখিত হইয়াছে। বাবু হরিশ্চন্দ্রের নিকট হইতে যে টীকা খানি পাইয়াছিলাম, তাহা হইতে যথেষ্ট আনুকূল্য লাভ করিয়াছি। এই টীকা রাঘবভট্টপ্রণীত; নাম অর্থদ্যোতনিকা। টীকা দর্শনে স্পষ্ট বোধ হয়, রাঘবভট্ট সাহিত্য ও অলঙ্কার শাস্ত্রে সবিশেষ প্রবীণ ছিলেন। আমার বিবেচনায় যে সকল স্থলের ব্যাখ্যা লেখা আবশ্যক বোধ হইয়াছে, সে সমুদয়ের ব্যাখ্যা

লিখিয়াছি। যে সকল বিদ্যালয়ে অভিজ্ঞানশকুন্তলের এই সংস্করণ ব্যবহৃত হইবেক, তত্রত্য অধ্যাপক মহাশয়দের নিকট প্রার্থনা এই, যদি কোনও দুরূহস্থল উপেক্ষিত হইয়াছে, বোধ করেন, দয়া করিয়া আমায় জানাইলে, অতিশয় উপকৃত হইব। আর, যদি কোনও ব্যাখ্যা অবিস্পষ্ট, অসংলগ্ন বা ভ্রমাত্মক বোধ হয়, তাহাও জানাইলে, অনুগৃহীত বোধ করিব।

১২। স্থলে স্থলে, নাটকীয় ব্যক্তিগণের উক্তিবিরামে, কবিবাক্যে তদীয় ক্রিয়ায় যে সমস্ত নির্দ্দেশ আছে, গৌড়দেশপ্রচলিত পুস্তকে সেই সকল ক্রিয়ানির্দ্দেশবাক্যের আদিতে ইতিশব্দ ব্যবহৃত হইয়া থাকে; যথা, **इति शरसन्धानं नाटयति, इति विलोकयन् स्थितः, इति कालसमावर्जयति** ইত্যাদি। কিন্তু যে সকল পুস্তক অনুসারে এই সংস্করণ সম্পন্ন হইয়াছে, উহাদের অধিকাংশ স্থলেই তাদৃশ ইতিশব্দের যোগ লক্ষিত হয় না। ফলতঃ, ঐরূপ ইতিশব্দের যোজনা নিতান্ত নিষ্প্রয়োজন। এজন্য, এই সংস্করণে উল্লিখিত ক্রিয়ানির্দ্দেশবাক্যে ইতিশব্দ যোজিত হয় নাই।

১৩। এস্থলে উল্লেখ করা আবশ্যক, বারাণসীনিবাসী শ্রীযুত বাবু হরিশ্চন্দ্রের আনুকূল্য না পাইলে, আমি কোনও ক্রমে অভিজ্ঞানশকুন্তলের সংস্করণকার্য্য নির্ব্বাহ করিতে পারিতাম না। আমার অভিজ্ঞানশকুন্তল পুস্তকের প্রয়োজন হইয়াছে, ইহা অবগত হইবামাত্র, এই সৌম্যমূর্ত্তি, অমায়িক, নিরহঙ্কার, বিদ্যোৎসাহী, দেশহিতৈষী মহোদয় যেরূপ সৌজন্য ও উৎসাহ সহকারে আমার হস্তে পুস্তক সমর্পণ করিয়াছিলেন, তাহা আমি কখনও বিস্মৃত হইতে পারিব না।

শ্রীঈশ্বরচন্দ্র শর্ম্মা।

কাশীপুর।

সংবৎ ১৯২৮। ১লা আষাঢ়।

संशोधनी

अशुद्धम्			शुद्धम्
सखि	१५	१८	हला
	१८	८	
	२०	११	
		१७	
सिणेहो	१६	२	सणेहो
	८८	२	
	१३४	७	
सिड़िलेहि	१७	४	सिढ़िलेहि
अहिह्लयमाणं	२३	७	अहिह्लयमाणं
उपविसम्ह	२६	३	उवविसम
इव	३०	८	एव
पहविस्सं	३७	८	पभविस्सं
कुज्जलीलं	४७	७	खुज्जलीलं
सम्पादेम्ह	८२	८	सम्पादेम
निरावाधं	८८	२	निरावाद्धं
स तः	१००	४	सर्व्वतः
णिवत्तेम्ह	१०८	४	णिवत्तेम
करिहिस्सं	११२	३	करिस्सं
गच्छम्ह	११७	४	गच्छाम

अशुद्धम्			शुद्धम्
चिन्तावेसद्दू	१२८	८	चिन्तावेश्विद्दू
भक्त	१४७	६	भक्तु
रेक्तू	१६०	११	क्तूरे
णिउणादा	१६७	१	णिवुणादा
निःश्वस्य	२०८	८	निश्वस्य
गणेहिस्सं	२२८	११	गणेस्सं
दाहिस्सं	२२९	११	दास्सं
निवेदेम्ह	२३७	५	निवेदेम।

अभिज्ञानशकुन्तलम्

या सृष्टिः स्रष्टुराद्या वहति विधिहुतं या हविर्या च होत्री
ये द्वे कालं विधत्तः श्रुतिविषयगुणा या स्थिता व्याप्य विश्वम् ।
यामाहुः सर्व्वबीजप्रकृतिरिति यया प्राणिनः प्राणवन्तः
प्रत्यक्षाभिः प्रपन्नस्तनुभिरवतु वस्ताभिरष्टाभिरीशः (क) ॥

(क) या जलरूपा तनुः स्रष्टुः जगत् सिसृक्षोः ईश्वरस्य आद्या प्रथमा सृष्टिः यथा मनुः

सोऽभिध्याय शरीरात् स्वात् सिसृक्षुर्विविधाः प्रजाः ।
अप एव ससर्ज्जादौ तासु बीजमवासृजत् ॥ १ । ८ ॥

या अग्निरूपा तनुः विधिना शास्त्रोक्तेन विधानेन हुतम् अभिप्रेतदेवतोद्देशेन प्रक्षिप्तं हविः आज्यादिकं हवनीयद्रव्यजातं वहति धरति या च यजमानरूपा तनुः होत्री हवनकार्य्यसम्पादयित्री ये द्वे दिवाकरनिशाकररूपे तनू कालं समयं विधत्तः जनयतः उदयास्तमयाभ्याम् अहोरात्रविभागेन नियमयत इत्यर्थः श्रुतेः श्रवणेन्द्रियस्य विषयः ग्राह्यः गुणः शब्दरूपः यस्याः तथोक्ता या आकाशरूपा तनुः विश्वम् अखिलं जगत् व्याप्य आवृत्य स्थिता यां पृथिवीरूपां तनुं सर्व्वेषां बीजानां प्रकृतिः आधारभूता इति आहुः निर्द्दिशन्ति यया वायुरूपया तन्वा प्राणिनः शरीरिणः प्राणवन्तः प्राणधारणक्षमाः प्रत्यक्षाभिः इन्द्रियगोचराभिः ताभिः जलादिभिः अष्टाभिः तनुभिः मूर्त्तिभिः प्रपन्नः उपलक्षितः भवरुद्रादिनामभेदेन तत्तन्मूर्त्तिधर इति यावत् ईशः शिवः वः युष्मान् अवतु रक्षतु । शिवस्य जलाद्यष्टमूर्त्तिधरत्वे भविष्यपुराणम्

नान्द्यन्ते

सूत्रधारः । नेपथ्याभिमुखमवलोक्य । आर्य्ये यदि नेपथ्यविधान-मवसितम् इतस्तावदागम्यताम् (१) (क) ।

प्रविश्य

नटी । अज्जउत्त इअम्हि (२) (ख) ।

सूत्रधारः । आर्य्ये अभिरूपभूयिष्ठा परिषत्(३) । अद्य खलु कालिदासग्रथितवस्तुना अभिज्ञानशकुन्तलनामधेयेन नवेन (४) नाटकेनोपस्थातव्यमस्माभिः । तत्प्रतिपात्रमाधीयतां यत्नः (ग) ।

सर्व्वाय क्षितिमूर्त्तये नमः भवाय जलमूर्त्तये नमः रुद्राय अग्निमूर्त्तये नमः उग्राय वायुमूर्त्तये नमः भीमाय आकाशमूर्त्तये नमः पशुपतये यजमानमूर्त्तये नमः महादेवाय सोममूर्त्तये नमः ईशानाय सूर्य्यमूर्त्तये नमः । मूर्त्तयोऽष्टौ शिवस्यैताः । आह्निकतत्त्वधृतम् । स्रग्धरा वृत्तम् ।

(क) नेपथ्याभिमुखम्— नेपथ्यं नटानां वेशरचनास्थानं तदभिमुखम् । नेपथ्यविधानं वेशरचना । अवसितं समाप्तम् ।

(ख) आर्य्यपुत्त्र इयमस्मि ।

"एतदनन्तरं नवीने कचित्पुस्तके आणवेदु अज्जो को णिओओ अणुचिट्ठीअदु त्ति इति पाठः पुराणपुस्तकेष्वभावात् प्रयोजनाभावाच्चोपेक्ष्यः" । राघवभट्टः ।

(ग) अभिरूपभूयिष्ठा पण्डितबहुला । कालिदासग्रथितवस्तुना— कालिदासेन ग्रथितं निबद्धं वस्तु इतिवृत्तं यस्य तत् तेन । उपस्थातव्यं परिचरितव्यं सामाजिका आराधयितव्या इत्यर्थः । प्रतिपात्रमाधीयतां

---

(१) तदितस्तावत् । १ ।
इतस्तावत् । २ । ४ । ५ । ६ ।
(२) अज्जउत्त इअम्हि आणवेदु अज्जो को णिओओ अणुचिट्ठीअदु त्ति ।१।७।८।६।
अज्जउत्त इअम्हि ।२।४।६।
अज्जउत्त इअम्हि आणवेदु अज्जो ।५।
(३) परिषदियम् । १ ।
परिषत् । २ । ४ । ५ । ६ ।
(४) अभिज्ञानशकुन्तलनामधेयेन नवेन । १ । ४ । ५ ।
अभिज्ञानशकुन्तलाख्येन नवेन । २ ।

नटी। सुविहिदप्पओअदाए अज्जस्स ण किं वि परिहाइस्सदि (क)।

सूत्रधारः। आर्य्ये कथयामि ते भूतार्थम् (ख)।

आ परितोषाद्विदुषां न साधु मन्ये प्रयोगविज्ञानम्।
बलवदपि शिक्षितानामात्मन्यप्रत्ययं चेतः (ग)॥

नटी। एव्वं एदं॥ अणन्तरकरणिज्जं दाव अज्जो आणवेदु (घ)।

सूत्रधारः। किमन्यदस्याः परिषदः श्रुतिप्रसादनतः। तदिममेव तावदचिरप्रवृत्तमुपभोगक्षमं ग्रीष्मसमयमधिकृत्य गीयताम् (ङ)। सम्प्रति हि (१)

यत्नः— पात्राणि कुशीलवाः पात्रे पात्रे प्रतिपात्रम् यत्नः आधीयतां क्रियतां यथा अभिनयकाले सर्व्वैरेव कुशीलवैरवहितैर्भूयते तथा क्रियतामित्यर्थः।

(क) सुविहितप्रयोगतया आर्य्यस्य न किमपि परिहास्यते।

प्रयोगः अभिनयः सुविहितप्रयोगतया अभिनयस्य सम्यगनुष्ठानात् आर्य्यस्य भवतः न किमपि परिहास्यते दोषाघ्रातं भविष्यति।

(ख) भूतार्थम्— भूतं सत्यम् अर्थम् तत्त्वमिति यावत्।

(ग) प्रयोगविज्ञानम् अभिनयनैपुणम्। बलवत् दृढं सम्यगिति यावत्। अप्रत्ययम्— प्रत्ययः विश्वासः तद्रहितम्। आर्य्या जातिः।

(घ) एवम् एतत्। अनन्तरकरणीयं तावत् आर्य्यः आज्ञापयतु।

(ङ) श्रुतिप्रसादनतः— श्रुतेः श्रवणेन्द्रियस्य प्रसादनं प्रीणनम् तस्मात्

---

(१) सूत्रधारः। किमन्यदस्याः परिषदः श्रुतिप्रसादनतः। तदिममेव तावदचिरप्रवृत्तमुपभोगक्षमं ग्रीष्मसमयमधिकृत्य गीयताम्। सम्प्रति हि। १। २। ४। ५। ६। सूत्रधारः। किमन्यदस्याः परिषदः श्रुतिप्रमोदहेतोः सङ्गीतकादनन्तरकरणीयमस्ति। नटी। अह कदमं उण उडुं समहिकिअ गाइस्सं। सूत्रधारः। इममेव तावदचिरप्रवृत्तमुपभोगक्षमं ग्रीष्मसमयमाश्रित्य गीयतां किञ्चित्। इह हि। ३।

सुभगसलिलावगाहाः पाटलसंसर्गसुरभिवनवाताः ।
प्रच्छायसुलभनिद्रा दिवसाः परिणामरमणीयाः (क) ॥

नटी । तह (ख) ।

गायति ।

ईसीसिचुम्बिआइं भमरेहिं सुउमारकेसरसिहाइं ।
ओदंसअन्ति दअमाणा पमदाओ सिरीसकुसुमाइं (ग) ॥

सूत्रधारः । आर्य्ये साधु गीतम् । अहो रागबद्धचित्तवृत्तिरालिखित इव सर्व्वतो रङ्गः । तदिदानीं कतमत् प्रकरणमाश्रित्य एनमाराधयामः (घ) ।

पश्चम्यास्तसिल् । उपभोगक्षमम् उपभोगयोग्यम् । उपभोगप्रकारश्च उत्तरश्लोकेन दर्शितः ।

(क) सुभगः सुखकरः । पाटलिर्वृक्षविशेषः तत्पुष्पं पाटलम् । प्रच्छायसुलभनिद्राः— प्रकृष्टा छाया यत्र तत् प्रच्छायं छायाप्रधानं स्थानं तत्र सुलभा अनायासलभ्या निद्रा येषु ते तथोक्ताः । परिणामरमणीयाः— परिणामः अवसानम् तस्मिन् रमणीयाः मनोरमाः । आर्य्या जातिः ।

(ख) तथा ।

ग्रीष्मर्त्तुमधिकृत्य भवता यदुक्तं तत् तथा तदवितथमित्यर्थः ।

(ग) ईषदीषच्चुम्बितानि भ्रमरैः सुकुमारकेशरशिखानि ।
अवतंसयन्ति दयमानाः प्रमदाः शिरीषकुसुमानि ॥

सुकुमारकेशरशिखानि— सुकुमाराः नितरां कोमलाः केशराणां किञ्जल्कानां शिखाः अग्राणि येषां तानि । दयमानाः सदयाः कुसुमानां सुकुमारत्वात् मृदुव्यापारा इत्यर्थः । उद्गाथा जातिः ।

(घ) रागः गीतमाधुर्य्यम् । बद्धः आकृष्टः । आलिखितः चित्रन्यस्तः । रङ्गः अभिनयस्थानं तत्स्थया अभिनयदर्शनार्थमुपस्थितः सामाजिकवर्गः । प्रकरणं प्रबन्धम् ।

नटी। णं अज्जमिस्सेहिं पढ़मं एव्व आणत्तं अहिणाण-सउन्दलं णाम अपुव्वं णाडअं पओए(१) अहिकरीअदु त्ति(क)।

सूत्रधारः। आर्य्ये सम्यगनुबोधितोऽस्मि (२) (ख)। अस्मिन् क्षणे विस्मृतं खलु मया (३)। कुतः

तवास्मि गीतरागेण हारिणा प्रसभं हृतः।
एष राजेव दुष्यन्तः सारङ्गेणातिरंहसा (ग)॥

निष्क्रान्तौ।

प्रस्तावना

(क) ननु आर्य्यमिश्रैः प्रथमम् एव आज्ञप्तम् अभिज्ञानशकुन्तलं नाम अपूर्व्वं नाटकं प्रयोगे अधिक्रियताम् इति।

आर्य्यमिश्रैः माननीयैः भवद्भिः आर्य्याः कुलशीलादिसम्पन्नाः मिश्राः पूज्यास्च तैः। अपूर्व्वम् अभिनवम् अनभिनीतपूर्व्वमिति यावत्। प्रयोगे अधिक्रियताम्— प्रयोगे अभिनये अधिक्रियताम् अवलम्ब्यताम् अभिनीयतामित्यर्थः।

(ख) अनुबोधितः उद्बोधितः।

(ग) गीतरागेण गीतमाधुर्य्येण। हारिणा हृदयग्राहिणा। सारङ्गेण हरिणेन। पथ्यावक्त्रं वृत्तम्।

---

(१) पओए। १। २। ४। ५। ६। पओएण। ३। ७। ८। ६।

(२) अनुबोधितोऽस्मि। १। २। ४। ५। बोधितोऽस्मि। ३।

(३) विस्मृतं खलु मयैतत्। १। ३। विस्मृतं खलु मया। २। ४। ५।

ततः प्रविशति मृगानुसारी सशरचापहस्तो राजा रथेन सूतश्च (१)।

सूतः। राजानं मृगञ्चावलोक्य। आयुष्मन्

कृष्णसारे ददच्चक्षुस्त्वयि चाधिज्यकार्म्मुके।
मृगानुसारिणं साक्षात्पश्यामीव पिनाकिनम् (क)॥

राजा। सूत दूरममुना सारङ्गेण वयमाकृष्टाः (ख)। अयं पुनरिदानीमपि (ग)

ग्रीवाभङ्गाभिरामं मुहुरनुपतति स्यन्दने बद्धदृष्टिः
पश्चार्द्धेन प्रविष्टः शरपतनभयाद्भूयसा पूर्व्वकायम्।
दर्भैरर्द्धावलीढैः श्रमविवृतमुखभ्रंशिभिः कीर्णवर्त्मा
पश्योदग्रप्लुतत्वाद्वियति बहुतरं स्तोकमुर्व्यां प्रयाति (घ)॥

(क) मृगानुसारिणम् मृगमनुसरन्तम्। दक्षस्य प्रजापतेरध्वरे भयेन मृगरूपमाश्रित्य पलायमानं यज्ञं शिवो बधार्थमनुससारेति पौराणिकी कथा।

(ख) आकृष्टाः आनीताः।

(ग) इदानीमपि अस्मिन् क्षणेऽपि प्रथमानुसरणसमये यथा अधुनापि तथैवेत्यर्थः।

(घ) ग्रीवाभङ्गाभिरामम्— ग्रीवायाः कन्धरायाः भङ्गेन विवर्त्तनेन अभिरामं दर्शनीयं यथा तथा। बद्धदृष्टिः— बद्धा अर्पिता दृष्टिः चक्षुः येन सः तथोक्तः। अर्द्धावलीढैः अर्द्धोपभुक्तैः। उदग्रप्लुतत्वात् दीर्घोत्प्लवनशालित्वात्। स्रग्धरा वृत्तम्।

---

(१) ततः प्रविशति मृगानुसारी सशरचापहस्तो राजा रथेन सूतश्च। १। २।
ततः प्रविशति रथारूढः सशरचापहस्तो राजा सूतश्च। ३।
ततः प्रविशति मृगानुसारी चापहस्तो राजा रथेन सूतश्च। ४। ५।

तदेष कथमनुपतत एव मे प्रयत्नप्रेक्षणीयः संवृत्तः (१) (क)।

सूतः। आयुष्मन् उद्घातिनी भूमिरिति (२) मया रश्मिसंयमनाद्रथस्य मन्दीकृतो वेगः (३) तेन मृग एष विप्रकृष्टान्तरः (४)। सम्प्रति समदेशवर्त्तिनस्ते न दुरासदो भविष्यति (ख)।

राजा। तेन हि मुच्यन्तामभीषवः (ग)।

सूतः। यदाज्ञापयत्यायुष्मान्। रथवेगं निरूप्य (घ)।

आयुष्मन् पश्य पश्य

मुक्तेषु रश्मिषु निरायतपूर्व्वकाया
निष्कम्पचामरशिखा निभृतोर्द्ध्वकर्णाः।
आत्मोद्धतैरपि रजोभिरलङ्घनीया
धावन्त्यमी मृगजवाक्षमयेव रथ्याः (ङ)॥

(क) प्रयत्नप्रेक्षणीयः— प्रयत्नेन नयनव्यापारातिशयेन प्रेक्षणीयः द्रष्टुं शक्यः।

(ख) उद्घातिनी— उद्घातः गतिप्रतिघातः तद्वती उन्नतानततया यत्र स्वच्छन्दं गन्तुं न शक्यते इत्यर्थः। रश्मिसंयमनात्— रश्मीनां प्रग्रहाणां संयमनात् आकर्षणात्। विप्रकृष्टान्तरः— विप्रकृष्टम् अतिदूरम् अन्तरं मध्यावकाशः यस्य सः तथोक्तः अतिदूरवर्त्तीत्यर्थः। दुरासदः दुष्प्रापः।

(ग) अभीषवः प्रग्रहाः।

(घ) निरूप्य सम्पाद्य।

(ङ) रश्मिषु प्रग्रहेषु मुक्तेषु शिथिलितेषु सत्सु निरायतः नितरां दीर्घी-

(१) तदेष कथमनुपतत एव मे प्रयत्नप्रेक्षणीयः संवृत्तः। १। ३।
कथमनुपततश्च मे अन्वेषणीयः संवृत्तः। २।

(२) उद्घातिनी भूमिरिति ।१।२।४।५।
उत्खातिनी भूरियमिति। ३।

(३) रथस्य मन्दीकृतो वेगः।१।२।४।५।
रथवेगो मन्दीकृतः। ३।

(४) विप्रकृष्टान्तरः। १। ४। ५।
विप्रकृष्टान्तरः संवृत्तः। २। ३।

राजा। सत्यमतीत्य हरितो हरींश्च वर्त्तन्ते वाजिनः (क)। तथाहि

यदालोके सूक्ष्मं व्रजति सहसा तद्विपुलतां
यदन्तर्विच्छिन्नं (१) भवति कृतसन्धानमिव तत्।
प्रकृत्या यद्वक्रं तदपि समरेखं नयनयो-
र्न मे पार्श्वे किञ्चित् क्षणमपि न दूरे रथजवात्(२) (ख)॥

सूत पश्यैनं व्यापाद्यमानम्।

शरसन्धानं नाटयति।

नेपथ्ये

भो भो राजन् आश्रममृगोऽयं न हन्तव्यो न हन्तव्यः।

सूतः। आकर्ण्यावलोक्य च। आयुष्मन् अस्य खलु ते बाणपथ-

भूतः पूर्व्वकायः कायस्य पूर्व्वार्द्धं येषां ते तथोक्ताः निष्कम्पाः निश्चलाः चामराणाम् अलङ्करणार्थं शिरसि बद्धानां शिखाः अग्राणि येषां ते तथोक्ताः निभृतौ निश्चलौ ऊर्द्धौ उन्नतौ च कर्णौ येषां ते तथोक्ताः आत्मभिः स्वयम् उद्धतैः उत्कीर्णैः उत्थापितैरिति यावत् तादृशैः अपि रजोभिः धूलिभिः अलङ्घनीयाः लङ्घयितुं स्प्रष्टुम् अशक्याः अमी रथं वहन्ति रथ्याः रथवाहिनस्तुरगाः मृगजवाक्षमया प्राणभयात् अतिवेगेन पुरः पलायमानस्य मृगस्य वेगं सोढुमसमर्थतया मा वयं वेगे मृगेणानेन पराभूयेमहि इति ईर्ष्यया इवेत्यर्थः धावन्ति। वसन्ततिलका वृत्तम्।

(क) अतीत्य हरितो हरींश्च— हरितः सूर्य्याश्वान् हरीन् इन्द्राश्वांश्च अतीत्य वेगेन पराभूय।

(ख) अन्तर्विच्छिन्नम् मध्ये विभक्तम्। शिखरिणी वृत्तम्।

---

(१) अर्द्धे विच्छिन्नम् १।२।४।५।६। अन्तर्विच्छिन्नम्।३।

(२) न मे पार्श्वे किञ्चित् क्षणमपि न दूरे रथजवात्।१।२।४।५। न मे दूरे किञ्चित् क्षणमपि न पार्श्वे रथजवात्।३।

वर्त्तिनः (१) कृष्णसारस्यान्तरे (२) तपस्विन उपस्थिताः (क)।

राजा। ससम्भ्रमम्। तेन हि निगृह्यन्तां (३) वाजिनः(ख)।

सूतः। तथा।

रथं स्थापयति।

ततः प्रविशति सशिष्यो वैखानसः (४)।

वैखानसः। हस्तमुद्यम्य। राजन् आश्रममृगोऽयं न हन्तव्यो न हन्तव्यः।

न खलु न खलु बाणः सन्निपात्योऽयमस्मिन्
मृदुनि मृगशरीरे तूलराशाविवाग्निः (५)।
क्व बत हरिणकानां जीवितं चातिलोलं
क्व च निशितनिपाता वज्रसाराः शरास्ते (ग)॥
तत् साधुकृतसन्धानं प्रतिसंहर सायकम्।
आर्त्तत्राणाय ते (६) शस्त्रं न प्रहर्त्तुमनागसि (घ)॥

(क) अन्तरे मध्ये।

(ख) ससम्भ्रमम् सावेगम्। निगृह्यन्ताम् निरुध्यन्ताम् रश्मिसंयमनेन स्थिरीक्रियन्तामित्यर्थः।

(ग) मालिनी वृत्तम्।

(घ) साधुकृतसन्धानम्— साधु सम्यक् कृतं सन्धानं यस्य तत् तथोक्तं मृगबधार्थं शरासने सम्यक् संहितमित्यर्थः। प्रतिसंहर शरासनादुत्कृष्य तूणीरे निवेशय। अनागसि अकृतापराधे। पथ्यावक्त्रं वृत्तम्।

---

(१) बाणपातवर्त्तिनः।१।२।४।५।
बाणपथवर्त्तिनः। ३।

(२) कृष्णसारस्य।१।२।३।४।६
सारङ्गस्य। ५।

(३) प्रगृह्यन्ताम्। १। २। ४। ५। ६।
निगृह्यन्ताम्। ३।

(४) आत्मना तृतीयः।१।२।४।५।६।
सशिष्यः। ३।

(५) तूलराशौ। १। २। ४। ५।
पुष्पराशौ। ३।

(६) वः। १। २। ४। ५। ६।
ते। ३।

राजा। एष प्रतिसंहृतः। यथोक्तं करोति।

वैखानसः। सदृशमेतत् पुरुवंशप्रदीपस्य भवतः।

जन्म यस्य पुरोर्वंशे युक्तरूपमिदं तव।
पुत्त्रमेवंगुणोपेतं चक्रवर्त्तिनमाप्नुहि (१) (क)॥

राजा। सप्रणामम्। प्रतिगृहीतम् (ख)।

वैखानसः। राजन् समिदाहरणाय प्रस्थिता वयम्। एष खलु काश्यपस्य कुलपते (२) रनुमालिनीतीरमाश्रमो दृश्यते। न चेदन्यकार्य्यातिपातः प्रविश्य (३) प्रतिगृह्यतामातिथेयः सत्कारः (४) (ग)। अपिच

(क) युक्तरूपम् अतिशयेन युक्तम् युक्तादुत्कर्षे रूपप्रत्ययः। एवङ्गुणोपेतम् ईदृशगुणसम्पन्नम् गुणैः सर्व्वथा स्वसदृशमित्यर्थः। पथ्यावक्त्रं वृत्तम्।

(ख) प्रतिगृहीतम् भवदीयमाशीर्व्वचनमिति शेषः।

(ग) काश्यपस्य कुलपतेः— काश्यपस्य काश्यपगोत्रोत्पन्नस्य कुलपतेः

मुनीनां दशसाहस्रं योऽन्नदानादिपोषणात्।
अध्यापयति विप्रर्षिरसौ कुलपतिः स्मृतः॥

इत्युक्तलक्षणस्य। अनुमालिनीतीरम्— मालिनीनदीतीरे विभक्त्यर्थेऽव्ययीभावः। अन्यकार्य्यातिपातः— अन्येषां कार्य्याणाम् अतिपातः अतिक्रमः व्याघात इति यावत्। आतिथेयः सत्कारः— अतिथये हितः आतिथेयः अतिथौ गृहमागते अवश्यकर्त्तव्यतया विहित इत्यर्थः सत्कारः पूजा।

---

(१) एतदनन्तरं। १। २। ४। पुस्तकेषु इतरौ। बाहू उद्यम्य। सर्व्वथा चक्रवर्त्तिनं पुत्त्रमाप्नुहि। अयमंशो दृश्यते।

(२) कण्वस्य कुलपतेः।१।२।४।५। काश्यपस्य कुलपतेः। ३।

(३) तत् प्रविश्य। १। प्रविश्य। २। ४। ५। तदा प्रविश्यताम्। ३।

(४) आतिथेयः सत्कारः।१।२।४।५।६। अतिथिसत्कारः। ३।

रम्यास्तपोधनानां प्रतिहतविघ्नाः क्रियाः समवलोक्य (१) ।
ज्ञास्यसि कियद्भुजो मे रक्षति मौर्वीकिणाङ्क इति (क) ॥

राजा । अपि सन्निहितोऽत्र कुलपतिः ।

वैखानसः । इदानीमेव दुहितरं शकुन्तलामतिथिसत्काराय सन्दिश्य (२) दैवमस्याः प्रतिकूलं शमयितुं सोमतीर्थं गतः (ख) ।

राजा । भवतु तामेव पश्यामि (३) । सा खलु विदितभक्तिं मां महर्षेः कथयिष्यति (ग) ।

वैखानसः । साधयामस्तावत् (घ) ।

सशिष्यो निष्क्रान्तः ।

राजा । सूत नोदयाश्वान् (४) पुण्याश्रमदर्शनेनात्मानं (५) पुनीमहे ।

(क) रम्याः— क्रियाणां भेदबोधितविधेरनपेतत्वरूपं रम्यत्वमिहाभिप्रेतम् । मौर्वीकिणाङ्कः— मौर्वीकिणः ज्याघातग्रन्थिः स एव अङ्कः लाञ्छनं यस्मिन् स तथोक्तः अनवरतज्याघर्षणेन त्वचि विकृतिमापन्न इत्यर्थः । आर्या जातिः ।

(ख) दैवमस्याः प्रतिकूलं शमयितुम्— अस्याः शकुन्तलायाः प्रतिकूलं वामं दैवं विधिं शमयितुं शान्तिमापादयितुम् दैवस्य प्रतिकूलतामपाकर्त्तुमित्यर्थः ।

(ग) विदितभक्तिम्— विदिता विज्ञाता भक्तिः अस्य स तम् मदीयां भक्तिं विज्ञाय तां प्रत्यागताय महर्षये निवेदयिष्यतीत्यर्थः ।

(घ) साधयामः समिदाहरणाय गच्छामः ।

---

(१) समवलोक्य । १ । २ । ४ । ५ । ६ ।
समालोक्य । ३ ।

(२) नियुज्य । १ । २ । ४ । ५ ।
सन्दिश्य । ३ ।

(३) तामेव द्रक्ष्यामि । १ ।
तां द्रक्ष्यामि । २ । ४ । ५ । ६ ।
तामेव पश्यामि । ३ ।

(४) नोदयाश्वान् । १ । ३ ।
चोदयाश्वान् । २ । ४ । ५ ।

(५) पुण्याश्रमदर्शनेन तावत् । १ ।
पुण्याश्रमदर्शनसम्भावनात् । २ । ४ ।
पुण्याश्रमदर्शनेन । ३ ।
पुण्याश्रमदर्शनसम्भावनया । ५ ।

सूतः । यदाज्ञापयत्यायुष्मान् ।

भूयो रथवेगं निरूपयति (क) ।

राजा । समन्तादवलोक्य । सूत अकथितोऽपि ज्ञायत एव यथायमाश्रमस्तपोधनस्येति (१) (ख) ।

सूतः । कथमिव ।

राजा । किं न पश्यति भवान् । इह हि

नीवाराः शुकगर्भकोटरमुखभ्रष्टास्तरूणामधः
प्रस्निग्धाः क्वचिदिङ्गुदीफलभिदः सूच्यन्त एवोपलाः ।
विश्वासोपगमादभिन्नगतयः शब्दं सहन्ते मृगा-
स्तोयाधारपथाश्च वल्कलशिखानिस्यन्दरेखाङ्किताः (ग) (२) ॥

सूतः । सर्व्वमुपपन्नम् ।

(क) रथवेगं निरूपयति— रथस्य वेगं सम्पादयति रथं पुनर्वेगेन प्रस्थापयतीत्यर्थः।

(ख) तपोधनस्य काश्यपस्य कुलपतेः।

(ग) इह अस्मिन् भूभागे हि नीवाराः तृणधान्यानि तरूणाम् वृक्षाणाम् अधः तले शुकाः कीराः गर्भे अभ्यन्तरे येषां ते तेषां शुकैरध्युषितानामित्यर्थः तादृशानां कोटराणां तरुविवराणां मुखेभ्यः द्वारेभ्यः भ्रष्टाः निपतिताः लक्ष्यन्ते इति शेषः। क्वचित् कस्मिंश्चित् प्रदेशे प्रस्निग्धाः स्नेहलिप्ताः उपलाः पाषाण-

---

(१) आश्रमाभोगस्तपोवनस्य । १ । २ । ४ । ५ । आश्रमस्तपोधनस्य । ३ ।

(२) एतदनन्तरं । १ । २ । ३ पुस्तकेषु

अपि च

कुल्याम्भोभिः पवनचपलैः शाखिनो धौतमूला
भिन्नो रागः किसलयरुचामाज्यधूमोद्गमेन ।
एते चार्व्वागुपवनभुवि च्छिन्नदर्भाङ्कुरायां
नष्टातङ्का हरिणशिशवो मन्दमन्दं चरन्ति ॥

अयमंशो दृश्यते । राघवभट्टेन श्लोकोऽयं न व्याख्यातः ।

राजा । (स्तोकमन्तरं गत्वा ।) तपोवननिवासिनामुपरोधो मा भूत् एतावत्येव रथं स्थापय यावदवतरामि (क) ।

सूतः । धृताः प्रग्रहाः अवतरत्वायुष्मान् (१) ।

राजा । (अवतीर्य ।) सूत विनीतवेशेन प्रवेष्टव्यानि (२) तपोवनानि नाम । इदं तावद्गृह्यताम् । (सूतायाभरणानि धनुश्चोपनीयार्पयति(३) ।) सूत यावदाश्रमवासिनः प्रत्यवेक्ष्याहमुपावर्त्ते (४) तावदार्द्रपृष्ठाः क्रियन्तां वाजिनः (ख) ।

शकलाः इङ्गुदीनां तापसतरूणां फलानि भिन्दन्तीति तादृशाः सूच्यन्ते द्योत्यन्ते एव उपलखण्डेषु तैललेपदर्शनेन तापसास्तैलबहुलानि इङ्गुदीफलानि तैर्भिन्दन्तीति प्रतीयते इत्यर्थः मृगाः हरिणाः विश्वासस्य नेह सञ्चरतामस्माकं कुतोऽपि भयमस्तीत्येवंरूपस्य उपगमात् लाभात् अभिन्ना अभग्ना अव्याकुला इति यावत् गतिः स्वच्छन्दसञ्चारः येषां तादृशाः सन्तः शब्दं रथाङ्गध्वनिं सहन्ते न तमाकर्ण्य भयेन पलायन्ते इत्यर्थः तोयाधाराणां जलाशयानां पन्थानः गमनागमनमार्गाश्च वल्कलानां शरीराच्छादनार्थं तपोवनवासिभिर्व्यवहृतानां तरुत्वचां शिखाभ्यः प्रान्तेभ्यः ये निस्यन्दाः सलिलस्रावाः तेषां रेखाभिः राजिभिः अङ्किताः लाञ्छिताः स्नानोत्तीर्णानां तापसानां वल्कलप्रान्तेभ्यो विगलिताभिर्जलधाराभिरङ्किता इत्यर्थः । शार्दूलविक्रीडितं वृत्तम् ।

(क) उपरोधः पीडनम् । एतावत्येव इयति दूरे एव नातः सन्निहिततरं रथेन गन्तुमुचितमित्यर्थः ।

(ख) विनीतवेशेन प्रवेष्टव्यानि— विनीतवेशेन अनुद्धतवेशेन प्रवेष्टव्यानि

---

(१) धृताः प्रग्रहाः अवतरत्वायुष्मान् । १ । २ । ४ । ५ ।
यदास्थापयत्यायुष्मान् । ३ ।

(२) विनीतवेशैः प्रवेष्टव्यानि । १ ।
विनीतवेशेन प्रवेष्टव्यानि । २ । ४ । ५ ।
विनीतवेशप्रवेश्यानि । ३ ।

(३) सूतायाभरणानि धनुश्चोपनीयार्पयति । १ । २ । ४ । ५ ।
सूतायाभरणानि प्रयच्छति । ३ ।

(४) यावदाश्रमवासिनः प्रत्यवेक्ष्याहमुपावर्त्ते । १ । २ । ४ ।
यावदाश्रमवासिनः प्रतीक्ष्याहं निवर्त्ते । ३ ।
यावदाश्रमवासिनः प्रत्यवेक्ष्योपावर्त्ते । ५ ।

सूतः । तथा ।

निष्क्रान्तः ।

राजा । परिक्रम्यावलोक्य च । इदमाश्रमद्वारं यावत् प्रविशामि । प्रविश्य (१) निमित्तं सूचयन् (क) ।

शान्तमिदमाश्रमपदं स्फुरति च बाहुः कुतः फलमिहास्य ।
अथवा भवितव्यानां द्वाराणि भवन्ति सर्व्वत्र (ख) ॥

नेपथ्ये

इदो इदो सहीओ (ग) ।

राजा । कर्णं दत्त्वा । अये दक्षिणेन वृक्षवाटिकामालाप इव श्रूयते यावदत्र गच्छामि । परिक्रम्यावलोक्य च । अये एतास्तपस्विकन्यकाः स्वप्रमाणानुरूपैः सेचनघटैर्बालपादपेभ्यः पयो दातुमित एवाभिवर्त्तन्ते । निपुणं निरूप्य (२) । अहो मधुरमासां दर्शनम् (घ) ।

प्रवेष्टुं योग्यानि । प्रत्यवेक्ष्य दर्शनप्रणामादिना मानयित्वा । उपावर्त्ते प्रत्यागच्छामि । आर्द्रपृष्ठाः— आर्द्रं सलिलसिक्तं पृष्ठं येषां ते तथोक्ताः सलिलसेकेन विनीताध्वश्रमा इत्यर्थः ।

(क) निमित्तं सूचयन्— निमित्तं दक्षिणबाहुस्फुरणरूपं परिणयसूचकं लक्षणं सूचयन् अभिनयन् ।

(ख) शान्तं शमप्रधानं न कदाचिदीदृशे स्थाने मादृशां परिणयः सम्भाव्यते इत्यर्थः । अस्य बाहुस्फुरणस्य । भवितव्यानाम् अवश्यम्भाविनां भावानाम् । द्वाराणि उपायाः । आर्य्या जातिः ।

(ग) इतः इतः सख्यौ ।

(घ) दक्षिणेन वृक्षवाटिकाम्— वृक्षाणां रोपितानां तरूणां वाटिका

---

(१) प्रविश्य । १ । २ । ४ । ५ ।
प्रवेशमभिनीय । ३ ।

(२) निपुणं निरूप्य । १ । ५ ।
निरूप्य । २ । ४ ।

शुद्धान्तदुर्लभमिदं वपुराश्रमवासिनो यदि जनस्य ।
दूरीकृताः खलु गुणैरुद्यानलता वनलताभिः (क) ॥

यावदिमां छायामाश्रित्य प्रतिपालयामि (१) (ख) ।

विलोकयन् स्थितः ।

ततः प्रविशति यथोक्तव्यापारा सह सखीभ्यां शकुन्तला ।

शकुन्तला । इदो इदो सहीओ (ग) ।

अनसूया । हला सउन्दले तुवत्तो वि तादकस्सवस्स इमे अस्समरुक्खआ पिअदरे त्ति तक्केमि जेण णोमालिआकुसुमपेलवा तुमं वि (२) एदाणं आलवालपूरणे णिउत्ता (घ) ।

वीथी तस्याः दक्षिणे भागे। इक्षुवाटिकामिति दक्षिणेनेत्येनप्प्रत्यययोगेन द्वितीया। स्वप्रमाणानुरूपैः आत्मनामाकृतिपरिमाणसदृशैः स्वशक्त्यनुरूपैरित्यर्थः। मधुरं नयनप्रीतिकरम्।

(क) शुद्धान्तदुर्लभम्— शुद्धान्ते राज्ञामन्तःपुरे अपि दुर्लभं दुष्प्रापम्। दूरीकृताः दूरे क्षिप्ताः पराभूता इति यावत्। उद्यानलताः— उद्यानं राजकीयमुपवनं तत्र प्रयत्नेन रोपिताः प्रत्यवेक्षिताश्च लताः उद्यानलताः। आर्य्या जातिः।

(ख) प्रतिपालयामि आसां क्रियामाकृतिञ्चावलोकयामीत्यर्थः।

(ग) इतः इतः सख्यौ।

(घ) सखि शकुन्तले त्वत्तः अपि तातकाश्यपस्य इमे आश्रमवृक्षकाः प्रियतराः इति तर्कयामि येन नवमालिकाकुसुमपेलवा त्वम् अपि एतेषाम् आलवालपूरणे नियुक्ता।

---

(१) यावदिमां छायामाश्रित्य प्रतिपालयामि। १। २। ४। ५। तावदेनां तरुच्छायामाश्रित्य विलोकयामि। ३।

(२) पेलवा तुमं वि। १। २। ४। ५। पेलवा वि तुमं। ३।

शकुन्तला। ण केअलं तादणिओओ एव्व अत्थि मे सोदरसिणेहो वि एदेसु (क)।

नाट्येन सिञ्चति (१)।

राजा (२)। कथमियं सा कण्वदुहिता। असाधुदर्शी खलु (३) तत्रभवान् काश्यपः य इमामाश्रमधर्म्मे नियुङ्क्ते (ख)।

इदं किलाव्याजमनोहरं वपु-
स्तपःक्षमं साधयितुं य इच्छति।
ध्रुवं स नीलोत्पलपत्रधारया
शमीलतां (४) छेत्तुमृषिर्व्यवस्यति (ग)॥

(क) न केवलं तातनियोगः एव अस्ति मे सोदरस्नेहः अपि एतेषु। सोदरस्नेहः भ्रातृवात्सल्यम्।

(ख) असाधुदर्शी— साधु सम्यक् पश्यति विविनक्ति इति साधुदर्शी स न भवतीति असाधुदर्शी अविमृश्यकारीत्यर्थः।

(ग) अव्याजेन व्याजं कृत्रिमशोभां विनैव मनोहरं स्वभावसुन्दरमित्यर्थः इदं शाकुन्तलं वपुः कलेवरं तपःक्षमं तपश्चरणसमर्थं साधयितुं सम्पादयितुं यः इच्छति अभिलषति ध्रुवं निश्चितं सः ऋषिः काश्यपः नीलोत्पलपत्रस्य इन्दीवरदलस्य धारया प्रान्तेन शमीलतां शमीवृक्षशाखां छेत्तुं व्यवस्यति यतते यथा अतिकोमलेन नीलोत्पलदलेन अतिकठिनायाः शमीशाखाया-श्छेदनं न सम्भवति शिरीषकुसुमसुकुमारस्य शकुन्तलाशरीरस्य कठोरमुनि-व्रतसम्पादनक्षमत्वसाधनं तथा सर्व्वथा सुनिरसाध्यं साधयितुं यतते इत्यर्थः। वंशस्थविलं वृत्तम्।

(१) वृक्षसेचनं निरूपयति। १। २। ४। ५।
नाट्येन सिञ्चति। ३।

(२) राजा। निर्वर्ण्य सकौतुकम्। १।
राजा। २। ३। ४। ५।

(३) असाधुदर्शी। १। २। ४।
असाधुदर्शी खलु। ३। ५।

(४) समिल्लताम्।१।२।३।४।५।६।
क्वचिच्छमीलतामिति पाठः।

राघवभट्टः।

भवतु पादपान्तरित (१) एव एनां विस्रब्धां (२) पश्यामि (क)।
तथा करोति (३)।

शकुन्तला। स्थिता (४) (ख)। सहि अणसूए अदिपिणद्धेण वक्कलेण पिअंवदाए णिअन्तिद म्हि सिढ़िलेहि दाव णं (ग)।

अनसूया। तह (घ)।
शिथिलयति।

प्रियंवदा। एत्थ पओहरवित्थारइत्तअं अत्तणो जोव्वणं उवालह (५) (ङ)।

(क) पादपैः वृक्षैः अन्तरितः तिरोहितः शकुन्तलाप्रभृतिभिरलक्षित इत्यर्थः तथाभूत एव विस्रब्धां विश्वस्तां स्वच्छन्दवर्त्तिनीमिति यावत् एनां शकुन्तलां पश्यामि। अज्ञातकुलशीलस्य पुरुषस्य दर्शनेन शकुन्तलाया विस्रम्भभङ्गमाशङ्क्य राज्ञा पादपैरात्मतिरोधानं कृतम्।

(ख) स्थिता स्थिरीभूय वृक्षसेचनादिरव्येत्यर्थः।

(ग) सखि अनसूये अतिपिनद्धेन वल्कलेन प्रियंवदया नियन्त्रिता अस्मि शिथिलय तावत् एतत्।

अतिपिनद्धेन दृढबद्धेन। नियन्त्रिता नितरां यन्त्रणां प्रापिता।

(घ) तथा।

यथा कथयसि तथा करोमि वल्कलं शिथिलयामीत्यर्थः।

(ङ) अत्र पयोधरविस्तारयितृ आत्मनः यौवनम् उपालभस्व।

अत्र अस्मिन् नियन्त्रणे।

---

(१) पादपान्तरितः।१।२।३।४।५।
पादपान्तर्हितः। ६।

(२) विस्रब्धं तावदेनाम्।१।२।४।५।६।
एनां विस्रब्धाम्। ३।

(३) तथा करोति। १। २। ४। ५।
अपवार्य स्थितः। ३।

(४) शकुन्तला। १। २। ४। ५।
शकुन्तला। स्थिता। ३।

(५) एतदनन्तरं।१।२।४।५।७।८।६।
पुस्तकेषु
मं किं उवालहेसि।
अयमंशो दृश्यते।

राजा । काममननुरूपमस्या वयसो वल्कलं न पुनरलङ्कारश्रियं न पुष्यति (१) (क) । कुतः

सरसिजमनुविद्धं शैवलेनापि रम्यं
मलिनमपि हिमांशोर्लक्ष्म लक्ष्मीं तनोति ।
इयमधिकमनोज्ञा वल्कलेनापि तन्वी
किमिव हि मधुराणां मण्डनं नाकृतीनाम् (ख) ॥

शकुन्तला (२) । एसो वादेरिदपल्लवङ्गुलीहिं तुवरावेदु विश्व मं केसररुक्खओ जाव णं सम्भावेमि (ग) ।

परिक्रामति (३) ।

(क) अस्याः शकुन्तलायाः वयसः नवयौवनस्य कामम् अत्यर्थम् अननुरूपम्, अयोग्यं वल्कलं अलङ्कारश्रियं भूषणशोभां न पुष्यति न अपितु पुष्यत्येव ।

(ख) अनुविद्धं संश्लिष्टम् । लक्ष्म कलङ्कः । मधुराणां प्रकृत्या मनोहराणाम् । मालिनी वृत्तम् ।

(ग) एषः वातेरितपल्लवाङ्गुलीभिः त्वरयति इव मां केशरवृक्षकः यावत् एनं सम्भावयामि ।

वातेरिताः वायुसञ्चालिताः । त्वरयति त्वरया स्वसमीपं गन्तुमाकारयति । केशरवृक्षकः अनतिप्रौढो बकुलवृक्षः अल्पार्थे कन् । सम्भावयामि अनुरोधरक्षणेन आद्रिये ।

---

(१) राजा । सत्यमियमाह
इदमुपहितसूक्ष्मग्रन्थिना स्कन्धदेशे
स्तनयुगपरिणाहाच्छादिना वल्कलेन ।
वपुरभिनवमस्याः पुष्यति स्वां न शोभां
कुसुममिव पिनद्धं पाण्डुपत्रोदरेण ॥
काममननुरूपमस्या वयसो वल्कलं न पुनरलङ्कारश्रियं न पुष्यति । १ । २ ।
राजा । काममननुरूपमस्या वयसो वल्कलं न पुनरलङ्कारश्रियं न पुष्यति ।३।४।५।६।

(२) शकुन्तला । अग्रतोऽवलोक्य ।१।
शकुन्तला । २ । ४ । ५ । ६ ।

(३) परिक्रामति ।१।२।४।५।६।७।
यथोक्तं करोति । ३ ।

प्रियंवदा । हला सउन्दले एत्थ एव्व दाव मुहुत्तअं चिट्ठ जाव तुए उवगदाए लदासणाहो विअ अअं केसर-रुक्खओ पडिभाइ (१) (क) ।

शकुन्तला । अदो क्खु पिअंवदा सि तुमं (२) (ख) ।

राजा । प्रियमपि तथ्यमाह शकुन्तलां (३) प्रियंवदा । अस्याः खलु

अधरः किसलयरागः कोमलविटपानुकारिणौ बाहू ।
कुसुममिव लोभनीयं (४) यौवनमङ्गेषु सन्नद्धम् (ग) ॥

(क) सखि शकुन्तले अत्र एव तावत् मुहूर्त्तकं तिष्ठ यावत् त्वया उपगतया लतासनाथः इव अयं केशरवृक्षकः प्रतिभाति ।

उपगतया समीपस्थितया । लतासनाथः— नाथः सहायः तेन सह सनाथः ससहायः लतया सनाथः लतासनाथः लताद्वितीयः लतया सहचरित इत्यर्थः ।

(ख) अतः खलु प्रियंवदा असि त्वम् ।

प्रियं वदतीति प्रियंवदा तव प्रियंवदेति नाम सर्व्वथा अन्वर्थमित्यर्थः ।

(ग) किसलयरागः— किसलयस्य नवपल्लवस्य इव रागः लौहित्यं

---

(१) प्रियंवदा । हला सउन्दले एत्थ एव्व दाव मुहुत्तअं चिट्ठ । शकुन्तला । किं णिमित्तं । प्रियंवदा । जाव तुए उवगदाए लदासणाहो विअ अअं केसररुक्खओ पडिभाइ । १ । प्रियंवदा । हला सउन्दले एत्थ एव्व दाव मुहुत्तअं चिट्ठ जाव तुए उवगदाए लदासणाहो विअ अअं केसररुक्खओ पडिभाइ ।२।३।४।५।६।७।८।९। १ पुस्तके उवगदाए इत्यत्र समीवट्ठिदाए इति पाठः ।

(२) अदो क्खु पिअंवदा सि तुमं ।१। २ । ४ । ५ । ६ । ७ । ८ । ९ । अदो क्खु तुमं पिअंवदा । ३ ।

(३) शकुन्तलाम् । १ । २ । ४ । ५ । शकुन्तलां प्रति । ३ ।

(४) लोकनीयम् । १ । ४ । ५ । लोभनीयम् । २ । ३ ।

अनसूया। हला सउन्दले इअं सअंवरवहू सहआरस्स तुए किदणामहेआ वणजोसिणि त्ति (१) णोमालिआ णं विसुमरिदा सि (क)।

शकुन्तला। तदा अत्ताणं वि विसुमरिस्सं। लतामुपेत्याव-लोक्य च। हला रमणीए क्खु काले इमस्स लदापाअवमिहु-णस्स वइअरो (२) संवुत्तो। णवकुसुमजोव्वणा वणजोसिणी बद्धपल्लवदाए (३) उवहोअक्खमो सहआरो (ख)।

पश्यन्ती तिष्ठति।

वस्य सः। लोभनीयं चित्ताकर्षकम्। सन्नद्धम् उज्जृम्भितम्। आर्य्या जातिः।

(क) सखि शकुन्तले इयं स्वयंवरवधूः सहकारस्य त्वया कृतनामधेया वनज्योत्स्ना इति नवमालिका एनां विस्मृता असि।

स्वयंवरवधूः सहकारस्य— सहकारस्य आम्रतरोः स्वयंवरवधूः स्वयं-वरधर्म्मेण वधूभावमापन्ना अन्यदीयव्यापारमन्तरेणैव नवमालिकया सहकार-तरोराश्रयणात् तस्यां स्वयंवराधर्म्म आरोपितः। वनज्योत्स्ना— वनस्य ज्योत्स्ना ज्योत्स्नावत् शोभाविधायिनी। विस्मृतासि चेत्तुमिति शेषः।

(ख) तदा आत्मानम् अपि विस्मरिष्यामि। सखि रमणीये खलु काले अस्य लतापादपमिथुनस्य व्यतिकरः संवृत्तः। नवकुसुमयौवना वनज्योत्स्ना बद्धपल्लवतया उपभोगक्षमः सहकारः।

व्यतिकरः परस्परसमागमः। बद्धपल्लवतया सञ्जातकिसलयतया।

---

(१) तुए किदणामहेआ वणजोसिणि त्ति ।१।२।४।५।६।७।८।९।
तुए किदविआहसआरस्स ।२।

(२) वइअरो ।१।२।४।५।६।७।८।९।
अण्णोण्णं वइअरो ।२।

(३) बद्धपल्लवदाए ।१।२।४।५।७।८।९।
बद्धफलदाए ।२।
सिणिद्धपल्लवदाए ।६।

प्रियंवदा । अणसूए जाणासि (१) किं (२) सउन्दला वणजोसिणिं अदिमेत्तं पेक्खइ त्ति (क) ।

अनसूया । ण क्खु विभावेमि कहेहि (ख) ।

प्रियंवदा । जह वणजोसिणी अणुरूवेण पाअवेण संगदा अवि णाम एव्वं अहं वि(३) अत्तणो अणुरूवं वरं लहेअं त्ति(ग) ।

शकुन्तला । एसो णूणं तुह अत्तगदो मणोरहो (घ) । कलसमावर्ज्जयति (ङ) ।

राजा । अपि नाम कुलपतेरियमसवर्णक्षेत्रसम्भवा स्यात् (४) (च) । अथवा कृतं सन्देहेन

असंशयं क्षत्रपरिग्रहक्षमा
यदार्य्यमस्यामभिलाषि मे मनः ।

(क) अनसूये जानासि किं शकुन्तला वनज्योत्स्नाम् अतिमात्रं प्रेक्षते इति ।

(ख) न खलु विभावयामि कथय ।

(ग) यथा वनज्योत्स्ना अनुरूपेण पादपेन सङ्गता अपि नाम एवम् अहम् अपि आत्मनः अनुरूपं वरं लभेय इति ।

(घ) एषः नूनं तव आत्मगतः मनोरथः ।

(ङ) कलसमावर्ज्जयति— कलसं घटम् आवर्ज्जयति अवनमयति आलवाले जलं दातुं निम्नमुखं करोतीत्यर्थः ।

(च) असवर्णक्षेत्रसम्भवा— असवर्णात् असजातीयात् क्षेत्रात् कलत्रात् सम्भवः उत्पत्तिः अस्याः सा तथोक्ता क्षत्रियादिस्त्रीगर्भसम्भूता इत्यर्थः ।

---

(१) जाणासि ।१।२।४।५।६।७.८।९।
अवि जाणासि । ३ ।

(२) किं ।१।४।५।६।७।८।९।
किं णिमित्तं । २ । ३ ।

(३) एव्वं अहं वि ।१।२।४।६।७।८।९।
अहं वि एव्वं । ३ ।

(४) असवर्णक्षेत्रसम्भवा स्यात् । १ ।
२ । ४ । ५ । ६ ।
असवर्णक्षेत्रजा भवेत् । ३ ।

सतां हि सन्देहपदेषु वस्तुषु
प्रमाणमन्तःकरणप्रवृत्तयः (क) ॥

तथापि तत्त्वत एनामुपलप्स्ये (ख) ।

शकुन्तला । ससम्भ्रमम् । अम्मो सलिलसेअसंभमुग्गदो णोमालिअं उज्झिअ वअणं मे महुअरो अहिवट्टइ (ग) ।
भ्रमरबाधां रूपयति (१) (घ) ।

राजा । सस्पृहमवलोक्य (२) ।

(क) असंशयं निःसन्देहं क्षत्रस्य क्षत्रियजातेः परिग्रहस्य भार्यात्वेन ग्रहणस्य क्षमा योग्या इयमिति शेषः यत् यतः आर्य्यं साधु उत्पथधावनविमुखमिति यावत् मे मम मनः अस्याम् अभिलाषि साभिलाषम् यदि इयं क्षत्रियस्य पाणिग्रहणायोग्या न स्यात् तदा मम मनो नास्यामभिलाषि स्यादित्यर्थः । एतदेव समर्थयति हि तथाहि सन्देहपदेषु कर्त्तव्यमिदमकर्त्तव्यं वेत्येवंरूपसंशयास्पदेषु वस्तुषु पदार्थेषु सतां साधूनाम् अन्तःकरणप्रवृत्तयः प्रमाणम् सन्देहनिरासकं यदि तत्र अन्तःकरणं प्रवर्त्तते तदा तदविगीतम् अन्यथा तद्विगीतमित्यर्थः । वंशस्थविलं वृत्तम् ।

(ख) तथापि तत्त्वत एनामुपलप्स्ये— तथापि मम मनसः अस्यामभिलाषित्वेन अस्याः क्षत्रियपरिणयनयोग्यत्वनिश्चयेऽपि तत्त्वतः याथार्थ्येन एनां मुनितनयाम् उपलप्स्ये किञ्जातीयचेतोत्पन्नेयमिति निरूपयिष्यामि ।

(ग) अम्मो सलिलसेकसम्भ्रमोद्गतः नवमालिकाम् उज्झित्वा वदनं मे मधुकरः अभिवर्त्तते ।

अम्मो इत्यव्ययः शब्द आश्चर्यद्योतकः । सलिलसेकसम्भ्रमोद्गतः— सलिलस्य जलस्य सेकेन सेचनेन निमित्तेन यः सम्भ्रमः आवेगः तस्मात् उद्गतः उड्डीनः । वदनम् अभिवर्त्तते तदनाभिमुखमागच्छतीत्यर्थः ।

(घ) भ्रमरबाधां रूपयति— भ्रमरबाधां भ्रमरपीडां भ्रमराभिभवनिबन्धनमावेगमिति यावत् रूपयति अभिनयति ।

---

(१) निरूपयति । १ । २ । ४ ।
रूपयति । ३ । ५ । ६ ।

(२) सस्पृहम् । १ । २ । ४ । ५ ।
सस्पृहमवलोक्य । ३ ।

चलापाङ्गां दृष्टिं स्पृशसि बहुशो वेपथुमतीं
रहस्याख्यायीव स्वनसि मृदु कर्णान्तिकचरः ।
करौ व्याधुन्वत्याः पिबसि रतिसर्व्वस्वमधरं
वयं तत्त्वान्वेषान्मधुकर हतास्त्वं खलु कृती (१) (क) ॥

शकुन्तला । ण एसो धिट्ठो (२) विरमदि अण्णदो गमिस्सं । पदान्तरे स्थिता सदृष्टिक्षेपम् । कहं इदो वि आअच्छदि । हला परित्ताअह (३) मं इमिणा दुव्विणीदेण महुअरेण (४) अहिहूयमाणं (ख) ।

(क) रहस्याख्यायी— रहस्यं गोपनीयम् आख्याति कथयतीति तथोक्तः । व्याधुन्वत्याः भ्रमरनिरसनार्थं सञ्चालयन्त्याः । रतिसर्व्वस्वम्— रतेः सुखसम्भोगस्य सर्व्वस्वं सारभूतम् । तत्त्वान्वेषात्— तत्त्वस्य इयं क्षत्रपरिग्रहक्षमा न वेत्येवंरूपस्य वस्तुस्वरूपस्य अन्वेषात् अन्वेषणात् । शिखरिणी वृत्तम् ।

(ख) न एषः धृष्टः विरमति अन्यतः गमिष्यामि । कथम् इतः अपि आगच्छति । हला परित्रायेथां माम् अनेन दुर्विनीतेन मधुकरेण अभिभूयमानाम् ।

---

(१) एतदनन्तरं ३ पुस्तके

साध्वसाराधनमपि रमणीयमस्याः

यतो यतः षट्चरणोऽभिवर्त्तते ततस्ततः प्रेषितवामलोचना ।
विवर्त्तितभ्रूरियमद्य शिक्षते बलादकामापि हि दृष्टिविभ्रमम् ॥

अपिच

लोलां दृष्टिमितस्ततो विभजते सभ्रूलताविभ्रमा-
माभुग्नेन विवर्त्तते बलिमता मध्येन कम्पस्तनी ।
हस्ताग्रं विधुनोति पल्लवनिभं शीत्कारभिन्नाधरा
जातेयं भ्रमरावलम्बनवशाद्धार्द्यैर्विना नर्त्तकी ॥

अयमंशो दृश्यते ।

(२) दुट्ठो ।१।२।४।५।६।७।९।
धिट्ठो ।८।
(३) परित्ताअह परित्ताअह ।१।३।८।
परित्ताअह ।२।४।६।७।९।
(४) दुट्ठमहुअरेण ।१।२।४।६।७,८।९।
महुअरेण । ३ ।

उभे । सविस्मयम् । का वत्त्र्म परित्ताहुं । दुस्सन्दं अक्कन्द । राअरक्खिदव्वाइ तवोवणाइ णाम (१) (क) ।

राजा । अवसरोऽयमात्मानं प्रकाशयितुम् । न भेतव्यं न भेतव्यम् । अर्द्धोक्ते । स्वगतम् । राजभावस्त्वभिज्ञातो भवेत् (२) । भवतु एवं तावदभिधास्ये (३) ।

शकुन्तला । पदान्तरे स्थिता । सदृष्टिक्षेपम् । कहं इदो वि मं अणुसरइ (ख) ।

राजा । सत्वरमुपसृत्य ।

कः पौरवे वसुमतीं शासति शासितरि दुर्विनीतानाम् ।
अयमाचरत्यविनयं मुग्धासु तपस्विकन्यासु (४) (ग) ॥

सर्व्वाः । राजानं दृष्ट्वा किञ्चिदिव सम्भ्रान्ताः (घ) ।

(क) के आर्ये परित्रातुम् । दुष्यन्तम् आक्रन्द । राजरक्षितव्यानि तपोवनानि नाम ।

आक्रन्द शरणार्थमाह्वय । राजरक्षितव्यानि— राजभिः रक्षितव्यानि रक्षितुं शक्यानि राजान एव तपोवनोपद्रवं शमयितुं समर्था इत्यर्थः ।

(ख) कथम् इतः अपि माम् अनुसरति ।

(ग) आर्य्या जातिः ।

(घ) सम्भ्रान्ताः चकिताः ।

---

(१) राअरक्खिदव्वाइ तवोवणाइ णाम ।१।२।४।५।६।७।८।९।
राअरक्खिदाइ तवोवणाइ ।३।

(२) राजभावस्तावत् ।१।
राजभावस्तु ।२।३।४।५।

(३) भवत्वेवं तावदभिधास्ये ।१।२।४।५।
भवत्वेवमभिधास्ये ।३।

(४) तपस्विकन्यकासु ।१।
तपस्विकन्यासु ।२।३।४।५।६।

अनसूया । अज्ज ण क्खु किं वि अच्चाहिदं । इअं णो पिअसही महुअरेण अहिहूअमाणा कादरीभूदा (क) ।

शकुन्तलां दर्शयति ।

राजा । शकुन्तलाभिमुखो भूत्वा । अपि (१) तपो वर्द्धते ।

शकुन्तला । साध्वसादवचना तिष्ठति ।

अनसूया । दाणिं अदिहिविसेसलाहेण । हला सउन्दले गच्छ उडअं फलमिस्सं अग्घं उवहर । इदं पादोदअं भविस्सदि (ख) ।

राजा । भवतीनां सूनृतयैव गिरा कृतमातिथ्यम् (ग) ।

प्रियंवदा । तेण हि इमस्सिं पच्छाअसीअलाए सत्तवण्णवेदिआए मुहुत्तअं उपविसिअ परिस्समविणोदं करेदु अज्जो (घ) ।

(क) आर्य न खलु किम् अपि अत्याहितम् । इयम् आवयोः प्रियसखी मधुकरेण अभिभूयमाना कातरीभूता ।

अत्याहितं महद्भयम् ।

(ख) इदानीम् अतिथिविशेषलाभेन । हला शकुन्तले गच्छ उटजम् फलमिश्रम् अर्घ्यम् उपहर । इदं पादोदकं भविष्यति ।

इदं कलशस्थितं सलिलम् ।

(ग) सूनृतया मधुरया ।

(घ) तेन हि अस्यां प्रच्छायशीतलायां सप्तपर्णवेदिकायां मुहूर्त्तकम् उपविश्य परिश्रमविनोदं करोतु आर्य्यः ।

प्रच्छायशीतलायाम्— प्रकृष्टा छाया यस्याम् सा च असौ शीतला च तस्याम् । परिश्रमविनोदम्— परिश्रमस्य तपोवनागमननिबन्धनस्य विनोदं विनयनम् ।

---

(१) अपि । १ । अयि । २ । ३ । ४ । ५ ।

राजा। नूनं यूयमप्यनेन(१) कर्म्मणा परिश्रान्ताः(२) (क)।

अनसूया। हला सउन्दले उइदं णो पज्जुवासणं अदिहीणं। एत्थ उपविसम्ह (ख)।

सर्व्वे। उपविशन्ति।

शकुन्तला। आत्मगतम्। किं णु क्खु इमं पेक्खिअ तवोवणविरोहिणो विआरस्स गमणीअ म्हि संवुत्ता (ग)।

राजा। सर्व्वा विलोक्य। अहो समवयोरूपरमणीयं भवतीनां सौहार्द्यम् (घ)।

प्रियंवदा। जनान्तिकम्। अणसूए को णु क्खु एसो मङ्गर-

(क) अनेन कर्म्मणा— अनेन आलवालेषु जलसेचनरूपेण कर्म्मणा व्यापारेण।

(ख) हला शकुन्तले उचितं नः पर्य्युपासनम् अतिथीनाम्। अत्र उपविशामः।

पर्य्युपासनं छन्दानुवर्त्तनम्।

(ग) किं नु खलु इमं प्रेक्ष्य तपोवनविरोधिनः विकारस्य गमनीया अस्मि संवृत्ता।

गमनीया सञ्चारभूमिः विषयीभूता इति यावत्।

(घ) समवयोरूपरमणीयम्— समेन सदृशेन वयसा रूपेण च रमणीयम् समवयस्कानां तुल्याकृतीनाञ्च जनानां सौहार्द्दं परमं शोभनं भवतीत्यर्थः।

---

(१) अमेनैव। १।२।४।५।
अनेन। ३।

(२) एतदनन्तरं १ पुस्तके तस्मुहूर्त्तमुपविशत। अयमंशो दृश्यते।

गम्भीराकिदी (१) चउरं पिअं (२) आलवन्दो पहाववन्दो विअ लक्खीअदि (क) ।

अनसूया । सहि मम वि अत्थि कोदूहलं । पुच्छिस्सं दाव णं । प्रकाशम् । अज्जस्स महुरालावजणिदो वीसम्भो (३) मं मन्तावेदि कदमो अज्जेण राएसिवंसो (४) अलङ्करीअदि कदमो वा विरहपज्जुस्सुअजणो किदो देसो किं णिमित्तं वा सुउमारदरो वि तवोवणपरिस्समस्स (५) अत्ता पदं उवणीदो (ख) ।

(क) अनसूये कः नु खलु एषः मधुरगम्भीराकृतिः चतुरं प्रियम् आलपन् प्रभाववान् इव लक्ष्यते ।

मधुरगम्भीराकृतिः— मधुरा नयनप्रीतिकरी गम्भीरा अनभिव्यञ्जितहृद्गतभावा च आकृतिः बहिराकारो यस्य सः । प्रभाववान् राजप्रतापशाली । चतुरं प्रियम् आलपन्— चतुरं निपुणं प्रियं मधुरम् आलपन् सम्भाषमाणः ।

(ख) सखि मम अपि अस्ति कौतूहलम् । प्रक्ष्यामि तावत् एनम् । आर्य्यस्य मधुरालापजनितः विस्रम्भः मां मन्त्रयते कतमः आर्य्येण राजर्षिवंशः अलङ्क्रियते कतमः वा विरहपर्य्युत्सुकजनः कृतः देशः किं निमित्तं वा सुकुमारतरः अपि तपोवनपरिश्रमस्य आत्मा पदम् उपनीतः ।

विस्रम्भः विश्वासः असङ्कोच इति यावत् । मन्त्रयते आलापयति सम्भाषणे प्रवर्त्तयतीत्यर्थः । तपोवनपरिश्रमस्येत्यादि— तपोवनाय परिश्रमः तपोवनं द्रष्टुम् आयासः तस्य पदं विषयताम् उपनीतः प्रापितः ।

---

(१) चउरगम्भीराकिदी ।१।२।३। ।४।५।६।७।८।९।

(२) महुरमहुरं पिअं ।१।४। महुरं पिअं ।२।३।५।७।८।९। चउरं पिअं ।६।

(३) विस्सासो ।१।२।३।४।५।७।८। वीसम्भो ।६।९।

(४) राएसिणो वंसो ।१।२।४।५। ।६।७।८।९। राएसिवंसो ।३।

(५) तवोवणगमणपरिस्समस्स ।१।६।९। तवोवणपरिस्समस्स ।२।३।४। ।५।७।८।

शकुन्तला । आत्मगतम् । हिअअ मा उत्तम्म एसा (१) तुए चिन्तिदाइं अणसूआ मन्तेइ (क) ।

राजा । आत्मगतम् । कथमिदानीमात्मानं निवेदयामि कथं वा आत्मापहारं करोमि । भवतु एवं तावदेनां वक्ष्ये । प्रकाशम् । भवति यः पौरवेण राज्ञा धर्म्माधिकारे नियुक्तः सोऽहमविघ्नक्रियोपलम्भाय धर्म्मारण्यमिदमायातः (ख) ।

अनसूया । सणाहा (२) दाणिं धम्मआरिणो (ग) ।

(क) हृदय मा उत्ताम्य एषा त्वया चिन्तितानि अनसूया मन्त्रयते ।

उत्ताम्य उद्विजस्व । मन्त्रयते कथयति ।

(ख) कथं वा आत्मापहारं करोमि— आत्मनः स्वस्वरूपस्य अपहारः अपलापः अन्यसन्निधौ आयथातथ्येन स्वस्वरूपनिवेदनमित्यर्थः स च अत्युत्कटपापजनकतया नितरां विगर्हितः । यथा मनुः

योऽन्यथा सन्तमात्मानमन्यथा सत्सु भाषते ।
स पापकृत्तमो लोके स्तेन आत्मापहारकः ॥ ४ । २५५ ।

पौरवेण राज्ञा धर्म्माधिकारे नियुक्तः— एतदाकर्ण्य मुनिकन्याभिः पौरवेण राज्ञा दुष्यन्तेन राजकार्य्यपर्य्यवेक्षणे नियुक्तः कश्चिद्राजपुरुषोऽयमित्यवधारितम् । पक्षान्तरे पौरवेण राज्ञा स्वपित्रा प्रजापालनरूपराजधर्म्मनिर्व्वाहे नियुक्त इत्यर्थः । ईदृशमस्पष्टाभिधानकौशलम् आत्मापहारपरिहारवासनया अवलम्बितम् । अविघ्नक्रियोपलम्भाय— अविघ्नानां विघ्नरहितानां क्रियाणां यज्ञादिकार्य्याणाम् उपलम्भाय परिज्ञानाय धर्म्मारण्यनिवासिभिस्तपस्विभिः निर्विघ्नेन धर्म्म्याः क्रियाः सम्पाद्यन्ते न वेति परिज्ञातुमित्यर्थः ।

(ग) सनाथाः इदानीं धर्म्मचारिणः ।

इदानीम् अधुना भवति समागते इत्यर्थः धर्म्मचारिणः धर्म्मचरणपरास्तपस्विनः सनाथाः नाथवन्तः ।

---

(१) एसा क्खु । १ । २ । ४ । ५ । एसा । ३ । ६ । ७ । ८ । ९ ।
(२) सणाहा । १ । २ । ३ । ४ । ५ । ६ । ९ । अज्ज सणाहा । ७ । ८ ।

शकुन्तला। शृङ्गारलज्जां रूपयति (१) (क)।

सख्यौ। उभयोराकारं विदित्वा (ख)। जनान्तिकम्। हला सउन्दले जइ एत्थ अज्ज तादो सण्णिहिदो भवे (ग)।

शकुन्तला (२)। तदो किं भवे (घ)।

सख्यौ। इमं जीविदसव्वस्सेण वि अदिहिविसेसं कदत्थं करिस्सदि (ङ)।

शकुन्तला। तुम्हे अवेध। किं वि हिअए करिअ मन्तेध। ण वो वअणं सुणिस्सं (च)।

राजा। वयमपि तावद्भवत्योः सखीगतं पृच्छामः (छ)।

(क) शृङ्गारलज्जां रूपयति— राजदर्शनोपनतशृङ्गाररसनिबन्धनां लज्जां रूपयति अभिनयति।

(ख) उभयोराकारं विदित्वा— उभयोः दुष्मन्तशकुन्तलयोः आकारं विदित्वा आकारे अन्तरुद्भूतस्य विकारस्य लक्षणं लक्षयित्वा।

(ग) हला शकुन्तले यदि अत्र अद्य तातः सन्निहितः भवेत्।

यदि तातः काश्यपः अद्य सोमतीर्थात् प्रत्यागच्छतीत्यर्थः।

(घ) ततः किं भवेत्।

(ङ) इमं जीवितसर्व्वस्वेन अपि अतिथिविशेषं कृतार्थं करिष्यति।

जीवितसर्व्वस्वभूतां त्वाम् अस्मै सम्प्रदास्यतीत्यर्थः।

(च) युवाम् अपेतम्। किम् अपि हृदये कृत्वा मन्त्रयेथे। न युवयोः वचनं श्रोष्यामि।

अपेतम् अपगच्छतम् इतो दूरीभवतमित्यर्थः।

(छ) भवत्योः सखीगतं शकुन्तलाविषयकं किमपि।

---

(१) निरूपयति। १। ४। ६। रूपयति। २। ३। ५।

(२) शकुन्तला। सरोषम्।१।२।४। शकुन्तला। ३। ५।

सख्यौ। अज्ज अणुग्गहो विश्र (१) इत्रं अब्भत्थणा (क)।

राजा। भगवान् (२) काश्यपः शाश्वते ब्रह्मणि स्थित इति प्रकाशः। इयं च वः सखी तदात्मजेति कथमेतत् (ख)।

अनसूया। सुणादु अज्जो। अत्थि को वि कोसिओ त्ति गोत्तणामहेओ (३) महाप्पहावो राएसी (ग)।

राजा। अस्ति श्रूयते।

अनसूया। तं णो पिअसहीए पहवं अवगच्छ। उज्झिआए सरीरसंवड्ढणादिहिं तादकस्सवो से पिदा (घ)।

(क) आर्य्य अनुग्रहः इव इयम् अभ्यर्थना।

(ख) शाश्वते ब्रह्मणि स्थितः— शाश्वते नित्ये ब्रह्मणि ब्रह्मचर्य्ये स्थितः वर्त्तमानः नैष्ठिकब्रह्मचारीत्यर्थः नैष्ठिकब्रह्मचारी हि न दारपरिग्रहं करोति अतः काश्यपस्य कथमात्मजा सम्भवतीति संशयः। प्रकाशः प्रसिद्धिः।

(ग) शृणोतु आर्य्यः। अस्ति कः अपि कौशिकः इति गोत्रनामधेयः महाप्रभावः राजर्षिः।

कौशिकः इति गोत्रनामधेयः— कुशिकस्य राज्ञः अपत्यं पुमान् कौशिकः कौशिक इति गोत्रनामधेयं कुलनाम यस्य सः तथोक्तः स हि राजर्षिर्विश्वामित्रनामधेयः कुशिकतनयत्वात् कौशिक इति तस्य गोत्रनामधेयम्।

(घ) तम् आवयोः प्रियसख्याः प्रभवम् अवगच्छ। उज्झितायाः शरीरसंवर्द्धनादिभिः तातकाश्यपः अस्याः पिता।

प्रभवः— प्रभवत्यस्मात् इति प्रभवः उत्पादयिता। उज्झितायाः प्रसवानन्तरं जनन्या मेनकया परित्यक्तायाः।

---

(१) अणुग्गहो विश्र। १। २। ३। ४। ५। ६। ८। अणुग्गहो एव्व। ९।

(२) भगवांश्च। १। २। ४। ५। भगवान्। ३।

(३) गोत्तणामहेओ। १। ३। ४। ५। किदगोत्तणामहेओ। २।

राजा । उज्झितशब्देन जनितं मे कौतूहलम् । आ मूलात् श्रोतुमिच्छामि ।

अनसूया । सुणादु अज्जो (१) । पुरा किल तस्स राएसिणो उग्गे तवसि वट्टमाणस्स किंवि जादसङ्केहिं देवेहिं मेणआ णाम अच्छरा पेसिदा णिअमविग्घकारिणी (क) ।

राजा । अस्त्येतदन्यसमाधिभीरुत्वं देवानाम् ।

अनसूया । तदो वसन्तोदारसमए से उम्मादइत्तअं रूवं पेक्खिअ (ख) ।

अर्द्धोक्ते लज्जया विरमति ।

राजा । परस्ताज्ज्ञायत एव (२) । सर्व्वथा अप्सरःसम्भवैषा ।

अनसूया । अहइं (ग) ।

राजा । उपपद्यते (घ) ।

(क) शृणोतु आर्य्यः । पुरा किल तस्य राजर्षेः उग्रे तपसि वर्त्तमानस्य किमपि जातशङ्कैः देवैः मेनका नाम अप्सराः प्रेषिता नियमविघ्नकारिणी ।

किमपि— केनापि निमित्तेन ।

(ख) ततः वसन्तोदारसमये अस्याः उन्मादयितृ रूपं प्रेक्ष्य ।

वसन्तोदारसमये— वसन्तेन वसन्तऋतोराविर्भावेण उदारे नितरां रमणीये समये ।

(ग) अथकिम् ।

अथकिंशब्दः स्वीकारसूचकः भवता सम्यगवबुद्धमित्यर्थः ।

(घ) उपपद्यते सङ्गच्छते अप्सरःसम्बन्धं विना नेदृशं रूपं सम्भवतीत्यर्थः ।

---

(१) एतदनन्तरं । १ । २ । ६ । ७ । ८ । पुस्तकेषु गोदमीतीरे । ४ । ५ । पुस्तकयोः गोमदीतीरे । इति पाठो दृश्यते ।

(२) पुरस्तात् । १ । परस्तात् । २ । ३ । ४ । ५ । ६ ।

मानुषीषु कथं वा स्यादस्य रूपस्य सम्भवः ।
न प्रभातरलं ज्योतिरुदेति वसुधातलात् (क) ॥

शकुन्तला । अधोमुखी तिष्ठति ।

राजा । आत्मगतम् । लब्धावकाशो मे मनोरथः । किन्तु सख्या परिहासोदाहृतां वरप्रार्थनां श्रुत्वा धृतद्वैधीभावकातरं (१) मेमनः (ख) ।

(क) मानुषीषु मानुषगर्भसम्भवासु अस्य ईदृशस्य रूपस्य आकारस्य कथं वा सम्भवः न तत् कदाचित् सम्भवतीत्यर्थः यतः प्रभया दीप्त्या तरलम् उज्ज्वलं ज्योतिः विद्युत् वसुधातलात् भूतलात् न उदेति आविर्भवति यथा भूगर्भात् विद्युदुद्भवो न सम्भवति तथा मानुषीगर्भादीदृशं रूपं न सम्भवतीत्यर्थः । पथ्यावक्त्रं वृत्तम् ।

(ख) लब्धावकाशो मे मनोरथः— मे मम मनोरथः शकुन्तलापरिणयाभिलाषः लब्धः प्राप्तः अवकाशः अवसरः येन सः तथोक्तः यदीयं महर्षेः सवर्णक्षेत्रसम्भवा स्यात् तदास्या उत्कृष्टवर्णतया निकृष्टवर्णस्य मम परिणयवासना सर्व्वथा निरवकाशा भवेत् सम्प्रति तु क्षत्रियादप्सरोगर्भसम्भूतत्वनिर्णयात् मयैतस्याः परिणयनं नैकान्तमसम्भवीत्यर्थः । परिहासोदाहृतां वरप्रार्थनाम्— जइ वणजोसिणी अणुरूवेण पाअवेण सङ्गदा अवि णाम एव्वं अहं वि अत्तणो अणुरूवं वरं लहेअं इत्यत्र परिहासेन नर्म्मणा प्रियंवदया उदाहृताम् उल्लिखितां वरप्रार्थनां शकुन्तलाया अभिमतवरलाभाभिलाषम् । धृतद्वैधीभावकातरम्— धृतः अवलम्बितः द्वैधीभावः किमियं काश्यपेन कस्मैचिद्वाचा दत्ता स एव प्रियंवदया अभिमतवरत्वेनोल्लिखितः उत स्वयमेवेयं कमपि वरीतुं सङ्कल्पितवती तमेवाभिसन्धाय अत्तणो अणुरूवं वरं लहेअं इत्युक्तमित्येवंरूपः संशयः येन तत् तथोक्तम् अत एव कातरं विक्लवम् उभयथापि मम शकुन्तलापरिणयाभिलाषः सुदूरपराहत इति भावः ।

---

(१) धृतम्द्वैधीभावकातरम् ।१।२।५। धृतद्वैधीभावम् । ४ ।
धृतद्वैतभावकातरम् । ३ ।

प्रियंवदा । सस्मितम् । शकुन्तलां विलोक्य नायकाभिमुखी भूत्वा । पुणो वि वत्तुकामो विअ अज्जो (क) ।

शकुन्तला । सखीमङ्गुल्या तर्जयति ।

राजा । सम्यगुपलक्षितं भवत्या । अस्ति नः सच्चरितश्रवणलोभादन्यदपि प्रष्टव्यम् ।

अनसूया । अलं विआरिअ अणिअन्तणाणुओओ (१) तवस्सिअणो णाम (ख) ।

राजा । इति सखीं ते ज्ञातुमिच्छामि
वैखानसं किमनया व्रतमा प्रदानात्
व्यापाररोधि मदनस्य निषेवितव्यम् ।
अत्यन्तमेव सदृशेक्षणवल्लभाभि- (२)
राहो निवत्स्यति समं हरिणाङ्गनाभिः (ग) ॥

(क) पुनः अपि वक्तुकामः इव आर्य्यः ।

(ख) अलं विचार्य्य । अनियन्त्रणानुयोगः तपस्विजनः नाम ।

अनियन्त्रणानुयोगः— अनियन्त्रणः अप्रतिबन्धः अनुयोगः पृच्छा यस्य सः तथोक्तः यदि किञ्चित् प्रष्टव्यमस्ति स्वच्छन्दं पृच्छ मा सङ्कोचं कार्षीरिति भावः ।

(ग) अनया तव सख्या शकुन्तलया किम् आ प्रदानात् पात्रसात्करणात् विवाहं यावदित्यर्थः मदनस्य अनङ्गस्य व्यापारं प्रसरं रुणद्धीति तथोक्तम् वैखानसाः वानप्रस्थाः तेषामिदं वैखानसं व्रतं विषयवैमुख्येन वनवासरूपं धर्म्मं निषेवितव्यम् अनुसर्त्तव्यम् आहो अथवा अत्यन्तं यावज्जीवम् एव सदृशे तुल्ये ईक्षणे चक्षुषी यासां ताश्च ताः वल्लभाः प्रियाश्चेति ताहशीभिः हरिणा-

(१) अणिअन्तणाणिओओ ।१।२।३।८।९। अत्यन्तमेव सदृशेक्षणवल्लभाभिः ।२। अणिअन्तणाणुओओ ।४।५।६।७। अत्यन्तमेव मदिरेक्षणवल्लभाभि ।३।४।५।६। (२) अत्यन्तमात्मसदृशेक्षणवल्लभाभिः ।१।

प्रियंवदा । अज्ज धम्मचरणे वि परवसो अअं जणो । गुरुणो उण से अणुरूववरप्पदाणे संकप्पो (क) ।

राजा । आत्मगतम् । न खलु दुरवापेयं प्रार्थना (१) (ख) ।

भव हृदय साभिलाषं सम्प्रति सन्देहनिर्णयो जातः ।
आशङ्कसे यदग्निं तदिदं स्पर्शक्षमं रत्नम् (ग) ॥

शकुन्तला । सरोषमिव । अणसूए गमिस्सं अहं (२) (घ) ।

अनसूया । किं णिमित्तं (ङ) ।

शकुन्तला । इमं असंबद्धप्पलाविणिं पिअंवदं अज्जाए गोदमीए णिवेदइस्सं (च) ।

कुनाभिः हरिणीभिः समं सह निवत्स्यति वसतिं करिष्यति इति किमियमा विवाहात् वने वत्स्यति उत यावज्जीवम् इत्येवं ते तव सखीं ज्ञातुम् अवधारयितुम् इच्छामि । वसन्ततिलका वृत्तम् ।

(क) आर्य्ये धर्म्मचरणे अपि परवशः अयं जनः । गुरोः पुनः अस्याः अनुरूपवरप्रदाने सङ्कल्पः ।

धर्म्मचरणेऽपि परवशः— गुरोरनुज्ञां विना धर्म्मक्रियानुष्ठानेऽपि प्रवर्त्तितुं न शक्नोति किमुत पाणिग्रहणव्यापारे इति भावः ।

(ख) इयं प्रार्थना शकुन्तलापरिणयविषयिणी वासना न दुरवापा दुःसम्पादा खलु ।

(ग) आर्य्या जातिः ।

(घ) अनसूये गमिष्यामि अहम् ।

(ङ) किं निमित्तम् ।

(च) इमाम् असम्बद्धप्रलापिनीं प्रियंवदाम् आर्य्यायै गोतम्यै निवेदयिष्यामि ।

---

(१) दुरवापेयं खलु प्रार्थना । आत्मगतम् । १ । २ । ५ ।
दुरवापेयं न खलु प्रार्थना । आत्मगतम् । २ ।
आत्मगतम् । दुरवापेयं प्रार्थना । ४ ।

(२) अहं गमिस्सं । १ । ७ । ८ ।
गमिस्सं अहं । २ । ३ । ४ । ५ । ६ । ८ ।

अनसूया । सहि ण जुत्तं (१) अकिदसक्कारं अदिहि-विसेसं विसज्जिअ (२) सच्छन्ददो गमणम् (क) ।

शकुन्तला । न किञ्चिदुक्त्वा प्रस्थितैव ।

राजा । ग्रहीतुमिच्छन् निगृह्यात्मानम् । आत्मगतम् । अहो चेष्टाप्रतिरूपिका कामिजनमनोवृत्तिः (३) (ख) । अहं हि

अनुयास्यन् मुनितनयां सहसा विनयेन वारितप्रसरः ।
स्थानादनुच्चलन्नपि गत्वेव पुनः प्रतिनिवृत्तः (ग) ॥

प्रियंवदा । शकुन्तलां निरुध्य । हला ण दे जुत्तं गन्तुं (घ) ।

शकुन्तला । सभ्रूभेदम् । किं णिमित्तं (ङ) ।

असम्बद्धप्रलापिनीम्— असम्बद्धं सम्बन्धरहितं निरर्थकमिति यावत्, प्रलपति यथेच्छं भाषते इति ताम् ।

(क) सखि न युक्तम् अकृतसत्कारम् अतिथिविशेषं विसृज्य स्वच्छन्दतः गमनम् ।

विसृज्य परित्यज्य । स्वच्छन्दतः स्वेच्छया ।

(ख) चेष्टाप्रतिरूपिका कामिजनमनोवृत्तिः— चेष्टा प्रतिरूपं प्रतिबिम्बं यस्याः सा तथोक्ता कामिजनस्य मनोवृत्तिः हृदयावस्था कामिजनस्य हि चेष्टा हृदयोदितस्य भावस्य बहिरभिलक्ष्यमाणां मूर्त्यन्तरमित्यर्थः ।

(ग) आर्य्या जातिः ।

(घ) हला न ते युक्तं गन्तुम् ।

(ङ) किं निमित्तम् ।

---

(१) ण ते जुत्तं ।१।२।४।५।७।८।९।
ण जुत्तं ।३।६।

(२) विसज्जिअ ।१।२।३।५।६।७।८।९।
वज्जिअ ।४।

(३) कामिमनोवृत्तिः ।१।२।३।
कामिजनमनोवृत्तिः ।४।
कामिमनःप्रवृत्तिः ।५।

प्रियंवदा। रुक्खसेअणे दुवे धारेसि मे। एहि दाव अत्ताणं मोआवेहि तदो गमिस्ससि (१) (क)।

बलादेनां निवर्त्तयति।

राजा। भद्रे वृक्षसेचनादेव परिश्रान्तामत्रभवतीं (२) [illegible] तथाह्यस्याः

[illegible]ांसावतिमात्रलोहिततलौ बाहू घटोत्क्षेपणात्
अद्यापि स्तनवेपथुं जनयति श्वासः प्रमाणाधिकः।
स्रस्तं कर्णशिरीषरोधि वदने घर्म्माम्भसां जालकं
बन्धे स्रंसिनि (३) चैकहस्तयमिताः पर्य्याकुला मूर्द्धजाः (ख)॥

तदहमेनामनृणां करोमि।

अङ्गुलीयं दातुमिच्छति।

(क) वृक्षसेचने द्वे धारयसि मे। एहि तावत् आत्मानं मोचय ततः गमिष्यसि।

(ख) घटस्य जलपूर्णस्य कलसस्य उत्क्षेपणात् उत्तोलनात् बाहू करौ स्रस्तौ सन्नमितौ अंसौ भुजशिरसी ययोः तादृशौ तथा अतिमात्रं लोहितं तलं ययोः तादृशौ प्रमाणं स्वाभाविकं श्वासमानं तस्मादधिकः प्रबलतरः श्वासः अद्य अस्मिन् क्षणे अपि स्तनयोः वेपथुं कम्पं जनयति वदने मुखे कर्णावतंसीकृतं शिरीषपुष्पं रुणद्धीति कर्णशिरीषरोधि तादृशं घर्म्माम्भसां स्वेदजलानां जालकं मण्डलं स्रस्तं विगलितं बन्धे बन्धने स्रंसिनि स्खलिते सति एकेन वामेन हस्तेन दक्षिणस्य घटोत्क्षेपणव्यापृतत्वात् यमिताः बद्धाः मूर्द्धजाः केशाः पर्य्याकुलाः विक्षिप्ताश्च।

---

(१) मोचिअ तदो गमिस्ससि। १। २। ४। ५। ६। ७। ८।
मोचिअ गमिस्ससि। ३।
मोआवेहि तदो गमिस्ससि। ९।

(२) अत्रभवतीम्। १। २। ४। ५।
तत्रभवतीम्। ३।

(३) स्रंसिनि। १। २। ४। ५।
ध्वंसिनि। ३।

उभे। नाममुद्राक्षराण्यनुवाच्य परस्परमवलोकयतः (क)।

राजा। अलमस्मानन्यथा सम्भाव्य। राज्ञः परिग्रहोऽयमिति राजपुरुषं मामवगच्छत (ख)।

प्रियंवदा। तेण हि ण अरिहदि एदं अङ्गुलीअअं अङ्गुलीविओअं। अज्जस्स वअणेण अरिणा दाणिं एसा। किञ्चिद्विहस्य। हला सउन्दले मोइदा सि अणुअम्पिणा अज्जेण अहवा महाराएण। गच्छ दाणिं (ग)।

शकुन्तला। आत्मगतम्। जइ अत्तणो पहविस्सं। प्रकाशम्। का तुमं विसज्जिदव्वस्स रुन्धिदव्वस्स वा (घ)।

राजा। शकुन्तलां विलोक्य। आत्मगतम्। किं नु खलु यथा

(क) नाममुद्राक्षराण्यनुवाच्य— नाम्नः मुद्राकृतानि अङ्गुरीयस्योपरि उत्कीर्णानि इत्यन्न इत्यक्षराणि अनुवाच्य वाचयित्वा पठित्वा इत्यर्थः।

(ख) अलमस्मानन्यथा सम्भाव्य— अस्मान् अन्यथा अस्मदृते अङ्गुरीये राजनामाक्षरदर्शनेन राजैवायं न राजपुरुषः इति सम्भाव्य तर्कयित्वा अलम् तादृशं तर्कं मा कार्ष्ट इत्यर्थः। राज्ञः परिग्रहोऽयमिति राजपुरुषं मामवगच्छत— राज्ञः राजसकाशात् अयं परिग्रहः प्रतिग्रहः इदमङ्गुरीयं राजप्रसादलब्धमित्यर्थः इति हेतोः मां राजपुरुषं अवगच्छत जानीत। मुनितनयानां विमोहनार्थमयमर्थः आत्मापहारपरिहारार्थन्तु अयं मल्लक्षणो जनः राज्ञः मत्पितुः परिग्रहः परिजनः इति हेतोः मां राजा च असौ पुरुषश्च तम् अवगच्छत इत्यर्थान्तरमनुसन्धेयम्।

(ग) तेन हि न अर्हति एतत् अङ्गुलीयकम् अङ्गुलीवियोगम्। आर्यस्य वचनेन अनृणा इदानीम् एषा। हला शकुन्तले मोचिता असि अनुकम्पिना आर्येण अथवा महाराजेन। गच्छ इदानीम्।

(घ) यदि आत्मनः प्रभविष्यामि। का त्वं विसृष्टव्यस्य रोद्धव्यस्य वा। विसृष्टव्यस्य विसर्जनस्य। रोद्धव्यस्य रोधनस्य। उभयत्र भावे तव्यप्रत्ययः।

वयमस्याम् एवमियमप्यस्मान् प्रति स्यात् । अथवा लब्धावकाशा मे प्रार्थना । कुतः

वाचं न मिश्रयति यद्यपि मद्वचोभिः
कर्णं ददात्यवहिता मयि भाषमाणे ।
कामं न तिष्ठति मदाननसंमुखीना (१)
भूयिष्ठमन्यविषया न तु दृष्टिरस्याः (क) ॥

नेपथ्ये (२)

भो भोस्तपस्विनः (३) सन्निहितास्तपोवनसत्त्वरक्षायै भवत । प्रत्यासन्नः किल मृगयाविहारी पार्थिवो दुष्यन्तः ।

तुरगखुरहतस्तथाहि रेणु-
र्विटपविषक्तजलार्द्रवल्कलेषु ।
पतति परिणतारुणप्रकाशः
शलभसमूह इवाश्रमद्रुमेषु (ख) ॥

(क) मदाननसम्मुखीना मम्मुखाभिमुखवर्त्तिनी । अन्यविषया—अन्यः मदाननव्यतिरिक्तः विषयः गोचरः यस्याः सा तथोक्ता मन्मुखं विहाय अन्यत्र न भूयिष्ठमवतिष्ठते इत्यर्थः । वसन्ततिलका वृत्तम् ।

(ख) तथाहि तुरगाणां दुष्यन्तसेनासंक्रान्तानाम् अश्वानां खुरैः हतः उत्कीर्णः परिणतः दिवसावसानकालीनः अरुणः सूर्यः इव प्रकाशते इति परिणतारुणप्रकाशः लोहितवर्ण इत्यर्थः एतेन अश्वसञ्चरणभूमीनां गैरिकादि-धातुमत्ता सूचिता रेणुः धूलिः शलभानां पतङ्गानां समूहः इव विटपेषु शाखासु विषक्तानि लम्बितानि जलार्द्राणि वल्कलानि येषां तादृशेषु जल-

---

(१) मदाननसम्मुखी सा ।१।२।४।५।६। आकाशे ।३।
मदाननसम्मुखीना ।१।
(२) नेपथ्ये ।१।२।४।५।
(३) भो भोस्तपस्विनः ।१।२।५।
भोस्तपस्विनः ।३।४।

अपि च ।

तीव्राघातप्रतिहततरुः स्कन्धलग्नैकदन्तः (१)
पादाकृष्टव्रततिवलयासङ्गसञ्जातपाशः ।
मूर्त्तो विघ्नस्तपस इव नो भिन्नसारङ्गयूथो
धर्म्मारण्यं प्रविशति (२) गजः स्यन्दनालोकभीतः (क) ॥

सर्व्वाः । कर्णं दत्त्वा किञ्चिदिव संभ्रान्ताः (ख) ।

शोषार्थं वल्कलानां विटपविषञ्जनम् आश्रमद्रुमेषु तपोवनतरुषु पतति । धूलिपातेन वल्कलानां वैवर्ण्यसम्भावनया विटपेभ्यस्तान्यपसार्य्यन्तामिति ध्वनितम् । पुष्पिताग्रा वृत्तम् ।

(क) स्यन्दनस्य रथस्य अदृष्टचरस्येत्यर्थः आलोकात् अवलोकनात् भीतः प्राप्तभयः तीव्रेण प्रचण्डेन आघातेन प्रहारेण प्रतिहताः भग्नाः तरवः आश्रमद्रुमाः येन सः तथोक्तः स्कन्धे स्वीये स्कन्धदेशे लग्नः संसक्तः एकः दन्तः यस्य सः तथोक्तः रथं प्रबलतरं जन्तुविशेषमाशङ्क्य किमयं पश्चात् धावति वा नवेत्यवधारयितुं मुखस्य विवर्त्तितत्वात् एकस्य दन्तस्य स्कन्धलग्नत्वम् पादैः चरणैः आकृष्टम् आकृष्यमाणं यत् व्रततिवलयं लतामण्डलं तस्य आसङ्गेन संयोगेन सञ्जातः पाशः बन्धनरज्जुः यस्य स तथोक्तः पादलग्नं व्रततिवलयं बन्धनरज्जुरिव प्रतीयते इत्यभिप्रायः न तु वस्तुतः स तेन बद्धपादः संवृत्तः तथात्वे धर्म्मारण्यं प्रविशतीत्युक्तिरसङ्गता स्यात् भिन्नानि भयात् पलायमानानि सारङ्गयूथानि मृगकुलानि यस्मात् स तथोक्तः गजः नः अस्माकं तपसः तपश्चरणस्य मूर्त्तः मूर्त्तिमान् विघ्नः प्रत्यूहः इव धर्म्मारण्यं प्रविशति धर्म्मारण्याभिमुखं धावतीत्यर्थः । मन्दाक्रान्ता वृत्तम् ।

(ख) सम्भ्रान्ता भयाकुलाः ।

---

(१) तीव्राघातप्रतिहततरुः स्कन्धलग्नैकदन्तः । १ । ६ ।
तीव्राघातप्रतिहततरुस्कन्धलग्नैकदन्तः । २ । ३ । ४ । ५ ।

(२) व्रजति हि । १ । ४ । ५ ।
व्रजति च । २ ।
प्रविशति । ३ । ६ ।

राजा । आत्मगतम् । अहो धिक् पौरा अस्मदन्वेषिणस्तपोवनमुपरुन्धन्ति (क) । भवतु प्रतिगमिष्यामस्तावत् ।

अनसूया । अज्ज दूमिणा (१) आरणअवुत्तन्तेण पज्जाउल म्ह । अणुजाणाहि णो उड़अगमणस्स (ख) ।

असम्भ्रमम् (ग) । गच्छन्तु भवत्यः । वयमप्याश्रमा यथा न भवति (२) तथा प्रयतिष्यामहे ।

सर्व्वे । उत्तिष्ठन्ति ।

सख्यौ । अज्ज असम्भाविदअदिहिसक्कारा (३) भूओ वि पेक्खणणिमित्तं लज्जेमो अज्जं विसविदुं (घ) ।

(क) उपरुन्धन्ति पीड़यन्ति ।

(ख) आर्य्य अनेन आरण्यकवृत्तान्तेन पर्य्याकुलाः स्मः । अनुजानीहि अस्मान् उटजगमनाय ।

आरण्यकवृत्तान्तेन— अरण्ये भवः आरण्यकः वन्यो गजः तस्य वृत्तान्तेन धर्म्मारण्यप्रवेशवार्त्तया ।

(ग) असम्भ्रमम्— अविद्यमानः सम्भ्रमः आवेगः यस्मिन् तत् यथा तथा अनाकुलचित्ततां प्रदर्श्येत्यर्थः ।

(घ) आर्य्य असम्भाविताातिथिसत्काराः भूयः अपि प्रेक्षणनिमित्तं लज्जामहे आर्य्यं विज्ञापयितुम् ।

असम्भावितातिथिसत्काराः— असम्भावितः अननुष्ठितः अतिथिसत्कारः याभिः ताः । प्रेक्षणनिमित्तं दर्शनार्थम् ।

---

(१) दूमिणा । १ । २ । ३ । ४ । ५ । ६ । ६ ।
एदिणा । ७ । ८ ।

(२) भवति । १ । ४ । ५ ।
भविष्यति । २ । ३ ।

(३) असम्भाविदअदिहिसक्कारम् । १ । २ । ६ । ७ । ८ ।
असम्भाविदअदिहिसक्कारा । ३ । ४ । ५ । ६ ।

राजा । मा मैवम् । दर्शनेनैव(१)भवतीनां पुरस्कृतोऽस्मि(क) ।

शकुन्तला । अणसूए अहिणअकुससूईए परिक्खदं मे चलणं कुरवअसाहापरिलग्गं अ वक्कलं । दाव परिवालेध मं जाव णं मोआवेमि (२) (ख) ।

राजानमवलोकयन्ती (३) सव्याजं विलम्ब्य (ग) सह सखीभ्यां निष्क्रान्ता ।

राजा । मन्दौत्सुक्योऽस्मि नगरगमनं प्रति । यावद याात्रिकान् समेत्य नातिदूरेण (४) तपोवनस्य निवेशयेयम् । न खलु शक्नोमि शकुन्तलाव्यापारादात्मानं निवर्त्तयितुम् (घ) । मम हि

(क) पुरस्कृतः सत्कृतः ।

(ख) अनसूये अभिनवकुशसूच्या परिक्षतं मे चरणम् कुरवकशाखा-परिलग्नं च वल्कलम् । तावत् परिपालयतं मां यावत् एतत् मोचयामि ।

परिपालयतं युवामिति शेषः । एतत् वल्कलम् ।

(ग) सव्याजं विलम्ब्य— वस्तुतः शकुन्तलायाश्चरणं न कुशसूचीपरिक्षतं नापि वल्कलं कुरवकशाखालग्नमासीत् दुष्यन्तदर्शनार्थं तद्व्याजेन विलम्बः कृत इत्यर्थः ।

(घ) मन्दौत्सुक्यः— मन्दम् शिथिलम् औत्सुक्यम् इच्छा यस्य सः तथोक्तः शकुन्तलादर्शनात् पूर्व्वं राजा नगरप्रतिगमने नितरामुत्सुक आसीत् अधुना तु शकुन्तलां दृष्ट्वा तदाक्रान्तचित्ततया तत्र शिथिलितौत्सुक्यः संवृत्त इत्यर्थः । शकुन्तलाव्यापारात् शकुन्तलारूपात् विषयात् ।

---

(१) दर्शनेन । १ । ४ ।
दर्शनेनैव । २ । ३ । ५ ।

(२) अणसूए इत्यादिः मोआवेमि इत्यन्तोऽंशः ।१।२।३।४।५।६।७।८। पुस्तकेषु न दृश्यते ।

(३) राजानमवलोकयन्ती । १ । ४ ।
राजानमेवावलोकयन्ती ।२।५।
३।६।पुस्तकयोरयमंशो न दृश्यते ।

(४) नातिदूरे । १ । २ । ४ । ५ ।
नातिदूरेण । ३ ।

गच्छति पुरः शरीरं धावति पश्चादसंस्थितं चेतः (१) ।
चीनांशुकमिव केतोः प्रतिवातं नीयमानस्य (क) ॥

॥ निष्क्रान्ताः सर्वे ।

प्रथमोऽङ्कः ।

(क) असंस्थितम् अनवस्थितम् अस्थिरमिति यावत् । चीनांशुकं चीनदेशीयं वसनं रेसम इत्याख्यया प्रसिद्धैः कृमिकोषोद्भवैस्तन्तुभिर्निर्मितं वस्त्रमित्यर्थः तन्तूनामेषां प्रथमं चीनदेशोत्पन्नतया तन्निर्मितं वस्त्रं चीनांशुकमिति प्रसिद्धम् । प्रतिवातम् वाताभिमुखम् । आर्य्या जातिः ।

---

(१) असंस्तुतम् । १ । २ । ४ । ५ । ६ । असंस्थितम् । २ ।

ततः प्रविशति विषण्णो विदूषकः।

विदूषकः। निश्वस्य। भो दिट्ठं एदस्स मअआसीलस्स रण्णो वअस्सभावेण णिव्विणो म्हि। अअं मओ अअं वराहो अअं सद्दूलो त्ति मज्झणे वि गिम्हविरलपाअवच्छाआसु वणराइसु आहिण्डीअइ अडवीदो अडवी। पत्तसंकरकसाआइ कडुआइ गिरिणईजलाइ पीअन्ति। अणिअदवेलं सूलमंसभूइट्ठो आहारो अण्हीअइ। तुरगाणुधाअणकण्डिदसंधिणो रत्तिम्मि वि (१) णिकामं सइदव्वं णत्थि। तदो महन्ते एव्व पच्चूसे दासीए पुत्तेहिं सउणिलुद्धएहिं वणगाहणकोलाहलेण पडिवोधिदो म्हि। एत्तएण दाणिं वि पीडा ण णिक्कमइ। तदो गण्डस्स उवरि पिण्डओ संवुत्तो। हिओ किल अम्हेसु ओहीणेसु तत्तहोदो (२) मआणुसारेण अस्समपदं पविट्ठस्स तावसकण्णआ सउन्दला णाम (३) मम अधण्णदाए दंसिदा। संपदं णअरगमणस्स मणं कहं वि ण करइ। अज्ज वि तस्स तं एव्व चिन्तअन्तस्स अक्खीसु पहादं आसि। का गदी। जाव णं किदाचारपरिक्कमं पेक्खामि। परिक्रम्यावलोक्य च। एसो बाणासणहत्थाहिं जवणीहिं वणपुप्फमालाधारिणीहिं परिवुदो इदो एव्व आअच्छइ पिअवअस्सो।

---

(१) रत्तिम्मि वि ।१।२।६।७।८।९।
रत्तिम्मि मे । ३ ।
रत्तिम्मि । ४ । ५ ।

(२) तत्तहोदो । १ । २ । ५ । ६ ।
तत्तभवदो । ३ । ४ ।

(३) सउन्दला णाम ।१।२।४।८।९।
सउन्दला । ३ । ५ । ६ । ७ ।

होदु अङ्गभङ्गविअलो विअ भविअ चिट्ठिस्सं जइ एव्वं वि णाम विस्समं लहेअं।

दण्डकाष्ठमवलम्ब्य (१) स्थितः (क)।

(क) भोः दृष्टम् एतस्य मृगयाशीलस्य राज्ञः वयस्यभावेन निर्विण्णोऽस्मि। अयं मृगः अयं वराहः अयं शार्दूलः इति मध्याह्ने अपि ग्रीष्मविरलपादपच्छायासु वनराजिषु आहिण्ड्यते अटवीतः अटवी। पत्रसङ्करकषायाणि कटुकानि गिरिनदीजलानि पीयन्ते। अनियतवेलं शूल्यमांसभूयिष्ठः आहारः भुज्यते। तुरगानुधावनकण्डितसन्धेः रात्रौ अपि निकामं शयितव्यं नास्ति। ततः महति एव प्रत्यूषे दास्याः पुत्रैः शकुनिलुब्धकैः वनगाहनकोलाहलेन परिबोधितः अस्मि। इयता इदानीम् अपि पीड़ा न निष्क्रामति। ततः गण्डस्य उपरि पिण्डकः संवृत्तः। ह्यः किल अस्मासु अवहीनेषु तत्रभवतः मृगानुसारेण आश्रमपदं प्रविष्टस्य तापसकन्यका शकुन्तला नाम मम अधन्यतया दर्शिता। साम्प्रतं नगरगमनाय मनः कथम् अपि न करोति। अद्य अपि तस्य ताम् एव चिन्तयतः अक्ष्णोः प्रभातम् आसीत्। का गतिः। यावत् एनं कृताचारपरिक्रमं प्रेक्षे। एषः बाणासनहस्ताभिः यवनीभिः वनपुष्पमालाधारिणीभिः परिवृतः इतः एव आगच्छति प्रियवयस्यः। भवतु अङ्गभङ्गविकलः इव भूत्वा स्थास्यामि यदि एवम् अपि नाम विश्रामं लभेय।

भोः दृष्टम्— भोः दृष्टं प्रत्यक्षीकृतं भवद्भिरिति शेषः। वयस्यभावेन सहचरतया। निर्विण्णः नितरां क्लिशितः। ग्रीष्मविरलपादपच्छायासु— ग्रीष्मे निदाघर्त्तौ विरला पत्राणां शोषणेन स्खलनेन च अविद्यमानप्राया पादपानां वृक्षाणां छाया यासु। आहिण्ड्यते— आपूर्व्वकस्य गत्यर्थस्य हिड़िधातोः प्रयोगः। पत्रसङ्करकषायाणि— पत्राणां तीरतरुभ्यः स्खलितानां पर्णानां सङ्करेण संसर्गेण कषायाणि विरसानि। अनियतवेलम्— अनियता अनवस्थिता वेला समयः यस्मिन् तत् यथा तथा। शूल्यमांसभूयिष्ठः— शूले लौहशलाकायां संस्कृतानि शूल्यानि तादृशैः

---

(१) अवलम्ब्य। १।२।३।४। आलम्ब्य। ५।

ततः प्रविशति यथानिर्द्दिष्टपरिवारो (१) राजा (क) ।

राजा (२) ।

कामं प्रिया न सुलभा मनस्तु(३) तद्भावदर्शनायासि (४) ।

मांसैः भूयिष्ठः प्रचुरः । तुरगानुधावनकण्डितस्कन्धेः— तुरगेण अश्वेन यत् अनुधावनं मृगयाकाले राज्ञोऽनुगमनं तेन कण्डिताः श्लथीभूताः स्कन्धाः यस्य सः तस्य । निकामं शयितव्यम्— निकामं पर्य्याप्तम् इच्छानुरूपमिति यावत् शयितव्यं शयनम् । शकुनिलुब्धकैः— शकुनीनां पक्षिणां लुब्धकाः व्याधाः तैः पक्षिवधेन जीवद्भिरित्यर्थः । वनगाहनं वनप्रवेशः । न निष्क्रामति न अपैति न समाप्तिं गच्छतीत्यर्थः । गण्डस्य विस्फोटकस्य । पिण्डकः विस्फोटकः । ह्यः गते अहनि पूर्व्वदिने इत्यर्थः । अवहीनेषु पश्चात् स्थितेषु । मृगानुसारेण मृगस्य अनुसरणवशेन । अधन्यतया मन्दभाग्यतया कतरां । अक्ष्णोः प्रभातमासीत्— अक्ष्णोः निद्राविरहेण अमुद्रितयोश्चक्षुषोः उपरि प्रभातं निशावसानम् आसीत् । कृताचारपरिक्रमम्— कृतः अनुष्ठितः आचारस्य प्रातःकर्त्तव्यक्रियाकलापस्य परिक्रमः परिपाटी येन तम् । बाणासनहस्ताभिः यवनीभिः— बाणाः शराः अस्यन्ते क्षिप्यन्ते अनेनेति बाणासनं धनुः तत् हस्ते यासां तादृशीभिः यवनीभिः मृगयासहचरीभिर्यवनकन्याभिः । अङ्गभङ्गविकलः— अङ्गानां करचरणाद्यवयवानां भङ्गेन वैकल्येन विकलः विक्लवः । दण्डकाष्ठम्— दण्डभावापन्नं काष्ठं काष्ठनिर्म्मितां यष्टिमिति यावत् ।

(क) यथानिर्द्दिष्टपरिवारः यथोक्तपरिजनः वनपुष्पमालाधारिणीभि बाणासनहस्ताभिः यवनीभिः परिवृत इत्यर्थः ।

---

(१) यथानिर्द्दिष्टवेशः । १ ।
यथानिर्द्दिष्टपरिवारः । २ । ३ । ४ । ५ । ६ ।

(२) राजा । १ । ५ ।
राजा । निश्वस्यात्मगतम् । २ ।
राजा । आत्मगतम् । ३ ।
राजा । स्वगतम् । ४ ।

(३) मनस्तु । १ । ३ । ६ ।
मनश्च । २ । ४ । ५ ।

(४) तद्भावदर्शनायासि । १।३।४।५।६।
तद्भावदर्शनाश्वासि । २ ।

अकृतार्थेऽपि मनसिजे रतिमुभयप्रार्थना कुरुते (क) ॥

स्मितं कृत्वा (१) । एवमात्माभिप्रायसम्भावितेष्टजनचित्तवृत्तिः प्रार्थयिता विडम्ब्यते (२) (ख) ।

स्निग्धं वीक्षितमन्यतोऽपि नयने यत्प्रेषयन्त्या तया
यातं यच्च नितम्बयोर्गुरुतया मन्दं विलासादिव ।
मा गा इत्युपरुद्धया यदपि सा सासूयमुक्ता सखी
सर्व्वं तत् किल मत्परायणमहो कामी स्वतां पश्यति (ग) ॥

(क) कामम् अकामेनापि मया अनुमन्तव्यमित्यर्थः प्रिया शकुन्तला न सुलभा न अनायासलभ्या तु किन्तु मनः मदीयं चित्तं तस्याः शकुन्तलायाः भावदर्शनाय अनुरागव्यञ्जकचेष्टावलोकनाय आयस्यति यतते इति तद्भावदर्शनायासि तदीयभावदर्शनेनात्मानं प्रीणयितुमेकान्तमुत्सुकं भवतीत्यर्थः । मनसिजे मदने अकृतार्थेऽपि उभयप्रार्थना उभयोर्मनोरथः रतिं प्रीतिं कुरुते जनयति अपूर्णेऽप्यभिलाषे अन्योन्यस्य अनुरागसूचकचेष्टादर्शनेन उभावेव निरतिशयां प्रीतिमनुभवत इत्यर्थः । आर्य्या जातिः ।

(ख) आत्मनः स्वस्य अभिप्रायेण मनोरथेन सम्भाविता अनुमिता इष्टजनस्य प्रार्थनाविषयीभूतस्य प्रियजनस्य चित्तवृत्तिः हृदयावस्था येन तादृशः प्रार्थयिता कामयानो जनः विडम्ब्यते विप्रलभ्यते उपहासास्पदं भवतीत्यर्थः ।

(ग) अन्यतः मत्तोऽन्यत्रापि नयने चक्षुषी प्रेषयन्त्या यथेच्छं सञ्चारयन्त्या तया शकुन्तलया यत् स्निग्धं सानुरागं वीक्षितम् यच्च तया नितम्बयोः गुरुतया भारवत्तया हेतुना विलासादिव मन्दं मन्थरं यातं गतं मा गाः मा गच्छ इति उपरुद्धया निवारितया तया यदपि यच्च सा सखी प्रियंवदा सासूयं सेर्ष्याकोपम् उक्ता तत् सर्व्वं मत्परायणम् मद्विषयं किल मामेव लक्ष्यीकृत्य कृतमिति मन्ये इत्यर्थः अहो आश्चर्यं कामी कामयानो जनः स्वताम् आत्मीयतां

---

(१) सस्मितम् । १ ।
स्मितं कृत्वा । २ । ३ । ४ । ५ ।

(२) एतदनन्तरं । १ । २ । ५ । पुस्तकेषु तद्यथा इति पाठो दृश्यते ।

विदूषकः । तथास्थित एव (क)। भो वअस्स (१) ण मे हत्थपाआ पसरन्ति वाआमेत्तएण (२) जीआवइस्सं (ख) ।

राजा । कुतोऽयं गात्रोपघातः (ग) ।

विदूषकः । कुदो किल सअं अच्छी आउलीकरिअ अस्सुकारणं पुच्छसि (घ) ।

राजा । न खल्ववगच्छामि ।

विदूषकः । भो वअस्स जं वेअसो कुज्जलीलं विड़म्बेइ तं किं अत्तणो पहावेण णं णईवेअस्स (ङ) ।

पश्यति नायिकाकृतवीक्षणादेः आत्मविषयत्वानिश्चयेऽपि नायिकायां स्वाभिप्रायानुरूपां चेष्टां कल्पयित्वा तत् सर्वं स्वविषयमेव सम्भावयतीत्यर्थः । शार्दूलविक्रीड़ितं वृत्तम् ।

(क) तथास्थितः अङ्गभङ्गविकल इव अवस्थितः ।

(ख) भो वयस्य न मे हस्तपादं प्रसरति वाङ्मात्रेण जीवयिष्यामि ।

हस्तपादम्— हस्तौ च पादौ च हस्तपादम् । जीवयिष्यामि आशिषं प्रयोक्ष्यामि आशीर्हि अञ्जलिं बद्धा वाचा प्रयुज्यते अङ्गानां वैकल्यात् हस्तसञ्चालनस्य क्लेशबहुलतया अञ्जलिबन्धं विना वाङ्मात्रेणैव आशीः प्रयुज्यते इत्यर्थः ।

(ग) गात्रोपघातः— गात्राणाम् अङ्गानाम् उपघातः वैकल्यम् ।

(घ) कुतः किल स्वयम् अक्षि आकुलीकृत्य अश्रुकारणं पृच्छसि ।

कुतः किल— कुतस्तवायं गात्रोपघातः इति पृच्छसि ।

(ङ) भो वयस्य यत् वेतसः कुब्जलीलां विड़म्बयति तत् किम् आत्मनः प्रभावेण ननु नदीवेगस्य ।

कुब्जलीलां विड़म्बयति— कुब्जस्य लीलां क्रियां विड़म्बयति अनुकरोति कुब्जभावमवलम्बते इत्यर्थः । ननु उत अथवा ।

---

(१) भो वअस्स ।१।२।४।५।७।८।६। वअस्स । ३ । (२) ता वाआमेत्तएण । ३ । ६ । वाआमेत्तएण ।२।३।४।५।७।८।६।

राजा । नदीवेगस्तत्र कारणम् ।

विदूषकः । मम वि भवं (१) (क) ।

राजा । कथमिव ।

विदूषकः । एव्वं (२) राअकज्जाइं उज्झिअ एआरिसे (३) आउलप्पदेसे वणचरवुत्तिणा तुए होदव्वं । जं सच्चं (४) पच्चहं सावदसमुच्छारणेहिं संखोहिअसंधिबंधाणं मम गत्ताणं अणीसो म्हि संवुत्तो । ता पसाददूस्सं विसज्जिदुं मं एक्काहं वि दाव विस्समिदुं (ख) ।

राजा । स्वगतम् । अयं चैवमाह । ममापि काश्यपसुतामनुस्मृत्य मृगयाविक्लवं चेतः (ग) । कुतः

(क) मम अपि भवान् ।

मम गात्रोपघातस्य भवानेव कारणमित्यर्थः ।

(ख) एवं राजकार्य्याणि उज्झित्वा एतादृशे आकुलप्रदेशे वनचरवृत्तिना त्वया भवितव्यम् । यत् सत्यं प्रत्यहं श्वापदसमुत्सारणैः संक्षोभितसन्धिबन्धानां मम गात्राणाम् अनीशः अस्मि संवृत्तः । तत् प्रसादयिष्यामि विसृष्टुं माम् एकाहम् अपि तावत् विश्रमितुम् ।

एतादृशे आकुलप्रदेशे— एतादृशे मानुषसमागमशून्ये आकुलप्रदेशे श्वापदसङ्कुलतया भयावहे स्थाने । श्वापदसमुत्सारणैः— श्वापदानां हिंस्रजन्तूनां समुत्सारणैः अनुसरणैः । संक्षोभितसन्धिबन्धानाम्— संक्षोभितः श्लथीकृतः सन्धिबन्धो येषां तेषाम् । विसृष्टुं माम्—मां विसृष्टुं मृगयागमनकाले मां परित्यक्तुम् मां विहाय मृगयायै गन्तुमित्यर्थः ।

(ग) मृगयाविक्लवम्— मृगयायां मृगवधे विक्लवं निरुत्सुकम् ।

---

(१) तह मम वि भवं । १ ।
मम वि भवं । २ । ३ । ५ । ७ । ८ ।
एव्वं मम वि भवं । ९ ।

(२) एव्वं । १ । ३ । ४ । ५ । ६ । ७ । ८ ।
जुत्तं णाम एव्वं । २ । ९ ।

(३) तारिसे । १ । ३ । ४ । ५ । ६ । ९ ।
एआरिसे । २ । ७ । ८ ।

(४) जं सच्चं । १ । २ । ३ । ५ । ६ । ७ । ८ । ९ ।
जेण । ४ ।

न नमयितुमधिज्यमस्मि शक्तो धनुरिदमाहितसायकं मृगेषु।
सहवसतिमुपेत्य यैः प्रियायाः कृत इव मुग्धविलोकितोपदेशः(क)॥

विदूषकः। राज्ञो मुखं विलोक्य। अत्तभवं किं वि हिअए करिअ मन्तेदि। अरस्से मए रुदिअं आसि (ख)।

राजा। सस्मितम्। किमन्यत्। अनतिक्रमणीयं मे सुहृद्वाक्यमिति स्थितोऽस्मि (ग)।

विदूषकः। चिरं जीअ (घ)।

गन्तुमिच्छति।

राजा। वयस्य तिष्ठ सावशेषं मे वचः (ङ)।

विदूषकः। आणवेदु भवं (च)।

राजा। विश्रान्तेन भवता ममाप्येकस्मिन्ननायासे कर्मणि(१) सहायेन भवितव्यम् (छ)।

(क) पुष्पिताग्रा वृत्तम्।

(ख) अत्रभवान् किम् अपि हृदये कृत्वा मन्त्रयते। अरण्ये मया रुदितम् आसीत्।

(ग) किमन्यत्— अन्यत् भवदुक्तादितरत् किं मन्त्रये भवदुक्तमेव चिन्तयामि न ततोऽन्यत् किमपीत्यर्थः। स्थितोऽस्मि भवदनुरोधेन अद्य मृगयाव्यापाराद्विरतोऽस्मीत्यर्थः।

(घ) चिरं जीव।

(ङ) सावशेषं मे वचः— मे मम वचः अवशेषेण सह सावशेषम् मद्वक्तव्यं न परिसमाप्तं किञ्चिदवशिष्टमस्ति तदश्रुत्वा त्वया नेतो गन्तव्यमित्यर्थः।

(च) आज्ञापयतु भवान्।

(छ) अनायासे— आयासं विना सम्पादयितुं शक्ये अनतिक्लेशसाध्ये इत्यर्थः।

---

(१) अनायासकर्मणि। १।२।५। अनायासे कर्मणि। ३।४।

विदूषकः । किं मोदअखण्डिआए । तेण हि अअं सुग-हीदो जणो (१) (क) ।

राजा । यत्र (२) वक्ष्यामि । कः कोऽत्र भोः ।

प्रविश्य

दौवारिकः । प्रणम्य । आणवेदु भट्टा (ख) ।

राजा । रैवतक सेनापतिस्तावदाहूयताम् ।

दौवारिकः । तह । निष्क्रम्य सेनापतिना सह पुनः प्रविश्य । एसो आणावअणुक्कण्ठो इदो दिण्णदिट्ठी एव्व भट्टा चिट्ठदि । उपसप्पदु अज्जो (ग) ।

सेनापतिः । राजानमवलोक्य । दृष्टदोषापि (३) स्वामिनि मृगया केवलं गुण एव संवृत्ता (घ) । तथाहि देवः

(क) किं मोदकखण्डिकायाम् । तेन हि अयं सुगृहीतः जनः ।

मोदकखण्डिकायाम्— मोदकानां खण्डिका भक्षणं तस्याम् । तेन हि अयं सुगृहीतः जनः— तेन हि तर्हि मोदकभक्षणं चेदभिप्रेतमित्यर्थः अयं मत्स्वरूपः जनः सुगृहीतः सुविचार्य्य इतः मम मोदकभक्षणकौशलस्य सुविदितत्वादहमेव तादृशे कर्म्मणि वरीतुं योग्यतम इत्यर्थः ।

(ख) आज्ञापयतु भर्त्ता ।

(ग) तथा । एषः आज्ञावचनोत्कण्ठः इतः दत्तदृष्टिः एव भर्त्ता तिष्ठति । उपसर्पतु आर्य्यः ।

आज्ञावचनोत्कण्ठः— आज्ञावचनाय उन्नमितः कण्ठो येन सः आज्ञा-प्रदानार्थमुद्ग्रीव इत्यर्थः ।

(घ) मृगया दृष्टाः उद्भाविताः दोषाः यस्याः सा तादृशी अपि यद्यपि मृगयायां सन्ति बहवो दोषाः इति कैश्चिदभिमन्यते तथापि स्वामिनि अस्मा-प्रभौ केवलं गुणाः एव संवृत्ता गुणोत्पादिकैव जाता ।

---

(१) जणो । १ । २ । ४ । ५ । ८ । ६ ।
खणो । ३ । ६ । ७ ।
(२) अथ । १ ।
यत्र । २ । ३ । ४ । ५ ।
(३) दृष्टदोषापि । १ । २ । ४ । ५ ।
अदृष्टदोषा । ३ ।

अनवरतधनुर्ज्यास्फालनक्रूरपूर्व्वं
रविकिरणसहिष्णु स्वेदलेशैरभिन्नम्।
अपचितमपि गात्रं व्यायतत्वादलक्ष्यं
गिरिचर इव नागः प्राणसारं बिभर्त्ति (क)॥

उपेत्य। जयतु स्वामी (१)। गृहीतश्वापदमरण्यं किमन्यत्रा-वस्थीयते (२) (ख)।

राजा। मन्दोत्साहः कृतोऽस्मि मृगयापवादिना माठ-व्येन (ग)।

सेनापतिः। जनान्तिकम्। सखे स्थिरप्रतिबन्धो भव। अहं

(क) देवः स्वामी गिरिचरः पार्व्वतीयः नागः गजः इव अनवरतम् अवि-श्रान्तं धनुर्ज्यायाः शिञ्जिन्याः आस्फालनेन आकर्षणेन क्रूरः कर्कशः दृढीभाव-मापन्न इति यावत् पूर्व्वः पूर्व्वाङ्गं यस्य तत् रवेः सूर्य्यस्य किरणान् सहिष्णु सोढुं समर्थम् आतपे सञ्चरणेऽपि क्लमरहितमित्यर्थः स्वेदलेशैः श्रमघर्म्म-विन्दुभिः अभिन्नम् अस्पृष्टं श्रमजयीत्यर्थः अपचितं जातकार्श्यमपि व्यायतत्वात् दैर्घ्यशालित्वात् अलक्ष्यं कृशत्वेनासंलक्ष्यमाणम् प्राणः बलं सारः यस्य तत् तादृशं गात्रं शरीरं बिभर्त्ति धरति। मालिनी वृत्तम्।

(ख) गृहीतश्वापदम्— गृहीताः तत्तत्स्थानस्थितत्वेनावधारिताः श्वापदाः यस्मिन् तत् तथोक्तम्। किमन्यत्रावस्थीयते— किं किमर्थम् अन्यत्र अन्यस्मिन् व्यापारे अवस्थीयते मृगयाव्यतिरिक्ते विषये व्यासक्तेन भूत्वा किमिति वृथा कालोऽतिपात्यते इत्यर्थः।

(ग) मृगयापवादिना— मृगयाम् अपवदति निन्दति इति मृगयाप-वादी तेन मृगयायां दोषोद्भावकेनेत्यर्थः।

---

(१) जयतु स्वामी। १। ३। ४। ५। (२) किमन्यत्रावस्थीयते। १।
जयतु जयतु स्वामी। २। किमन्यदवस्थीयते। २। ३। ४। ५।

तावत् स्वामिनश्चित्तवृत्तिमनुवर्त्तिष्ये। प्रकाशम्। प्रलपत्वेष (१) वैधेयः (२)। ननु प्रभुरेव निदर्शनम् (क)।

मेदश्छेदकृशोदरं लघु भवत्युत्थानयोग्यं वपुः
सत्त्वानामपि लक्ष्यते विकृतिमच्चित्तं भयक्रोधयोः।
उत्कर्षः स च धन्विनां यदिषवः सिध्यन्ति लक्ष्ये चले
मिथ्यैव व्यसनं वदन्ति मृगयामीदृग्विनोदः कुतः (ख)॥

विदूषकः। अत्तभवं पकिदिं आपस्सो। तुमं दाव अड़वीदो

(क) स्थिरप्रतिबन्धः— स्थिरः अविचलितः प्रतिबन्धः मृगयाप्रतिषेधः यस्य सः तथोक्तः। प्रलपतु अनर्थकं वचो वदतु। वैधेयः मूर्खः मृगया दोषाय वा गुणाय वा इत्यवधारयितुं सर्व्वथा असमर्थ इत्यर्थः। निदर्शनं दृष्टान्तः प्रमाणमिति यावत्।

(ख) वपुः शरीरं मेदसः वसायाः छेदेन अपगमेन कृशं स्थूलताविमुक्तम् उदरं यस्मिन् तत् तथोक्तम् अतएव लघु सत् उत्थानस्य उद्योगस्य योग्यं क्षमं भवति सत्त्वानां जन्तूनाम् अपि भयक्रोधयोः भये क्रोधे च सति विकृतिमत् सञ्जातविकारं चित्तं लक्ष्यते सत्त्वानां भये जाते कीदृशश्चित्तविकारो भवति कीदृशो वा क्रोधे जाते इति परिज्ञायते इत्यर्थः स च धन्विनां धनुर्भृताम् उत्कर्षः प्रशंसा यत् चले अस्थिरे लक्ष्ये शरव्ये इषवः शराः सिद्धन्ति सफल-प्रयोगाः भवन्ति लक्ष्यं विध्यन्तीत्यर्थः एतत् सर्व्वं मृगयायाः फलम् अतः मृगयां मिथ्यैव व्यसनं वदन्ति मृगया व्यसनत्वेन परिगणयितुं न युज्यत एवेत्यर्थः ईदृक् एवंविधः विनोदः प्रीतिः कुतः मृगयाभिन्नात् कस्मात् कर्म्मणः सम्भवति। शार्दूलविक्रीडितं वृत्तम्।

(१) प्रलपत्वेवः। १। २। ३। ५। ६। प्रलपत्वेवैष। ४।

(२) वैधेयः। १। ५। वैधवेयः। २। ३। ४। ६।

अड़वीं आहिण्डन्तो णरणासिआलोलुवस्स जिस्सरिच्छस्स कस्स वि (१) मुहे पड़िस्ससि (क) ।

राजा । भद्र सेनापते आश्रमसन्निकृष्टे स्थिताः स्मः अतस्ते वचो नाभिनन्दामि (ख) । अद्य तावत्

गाहन्तां महिषा निपानसलिलं शृङ्गैर्मुहुस्ताड़ितं
छायाबद्धकदम्बकं मृगकुलं रोमन्थमभ्यस्यतु ।
विस्रब्धं (२) क्रियतां वराहततिभिर्मुस्ताक्षतिः (३) पल्वले
विश्रामं लभतामिदञ्च शिथिलज्याबन्धमस्मद्धनुः (ग) ॥

सेनापतिः । यत् प्रभविष्णवे रोचते ।

(क) अत्रभवान् प्रकृतिम् आपन्न । त्वं तावत् अटन्नीतः अटवीम् आहिण्डमानः नरनासिकालोलुपस्य जीर्णऋक्षस्य कस्य अपि मुखे पतिष्यसि ।

नरनासिकालोलुपस्य— नराणां मानुषाणां नासिकायां नासिकाच्छेदने इत्यर्थः लोलुपस्य अतिशयेन लुब्धस्य । जीर्णऋक्षस्य वृद्धभल्लूकस्य ।

(ख) नाभिनन्दामि न आद्रिये ।

(ग) महिषाः शृङ्गैः मुहुः वारं वारं ताड़ितम् आस्फालितं निपानानाम् उपकूपजलाशयानां सलिलं जलं गाहन्तां प्रविशन्तु तत्र विहरन्तु इत्यर्थः मृगाणां हरिणानां कुलं यूथं छायासु बद्धं कदम्बकं वृन्दं येन तादृशं सत् रोमन्थम् उद्गिलितकवलचर्व्वणम् अभ्यस्यतु परिचिनोतु वराहततिभिः शूकरयूथैः विस्रब्धं स्वच्छन्दं पल्वले अल्पसरसि मुस्तानां क्षतिः उत्खननं क्रियताम् इदं शिथिलः अवरोपितः ज्याबन्धः यस्य तत् तथोक्तम् अस्मद्धनुश्च विश्रामं लभताम् । शार्दूलविक्रीड़ितं वृत्तम् ।

---

(१) कस्स वि जिस्सरिच्छस्स । १ । ५ । ८ । ९ ।
जिस्सरिच्छस्स कस्स वि । २ । ३ । ४ । ६ । ७ ।

(२) विस्रब्धैः । १ ।
विस्रब्धम् । २ । ३ । ४ । ५ । ६ ।

(३) वराहपतिभिः । १ । ६ ।
वराहततिभिः । २ । ३ । ४ । ५ ।

राजा । तेन हि निवर्त्तय पूर्व्वगतान् वनग्राहिणः । यथा न मे सैनिकास्तपोवनमुपरुन्धन्ति तथा निषेद्धव्याः (क) । पश्य

शमप्रधानेषु तपोधनेषु गूढं हि दाहात्मकमस्ति तेजः ।
स्पर्शानुकूला इव सूर्य्यकान्तास्तदन्यतेजोऽभिभवाद्वमन्ति (ख) ॥

सेनापतिः । यदाज्ञापयति स्वामी ।

विदूषकः । धंसदु दे उच्छाहवुत्तन्तो (ग) ।

निष्क्रान्तः सेनापतिः ।

राजा । परिजनं विलोक्य । अपनयन्तु भवत्यो मृगयावेशम् । रैवतक त्वमपि स्वं नियोगमशून्यं कुरु (घ) ।

परिजनः । जं देओ आणावेदि (ङ) ।

निष्क्रान्तः ।

विदूषकः । कदं भवदा णिम्मच्छिअं । सम्पदं एदस्सिं

(क) वनग्राहिणः— वनं गृह्णन्ति तत्रत्यानां मृगाणां पलायननिवारणार्थं वेष्टित्वा तिष्ठन्तीति तथोक्तान् । उपरुन्धन्ति पीडयन्ति ।

(ख) शमः शान्तिः प्रधानं येषां तेषु तपोधनेषु तपस्विषु गूढम् अनभिभवावस्थायामसंलक्ष्यं दाहात्मकं दाहस्वभावकं दाहसमर्थमिति यावत् तेजः अस्ति हि ते तपस्विनः स्पर्शानुकूलाः स्पर्शक्षमाः स्पर्शशीतला इत्यर्थः सूर्य्यकान्ताः मणिविशेषाः इव अन्यस्य तेजसा अभिभवात् आक्रमणात् तत् गूढं दाहात्मकं तेजः वमन्ति प्रकटयन्ति यथा सूर्य्यकान्ताः स्पर्शशीतला अपि सूर्य्यकराभिमर्शे अग्निमुद्गिरन्ति तद्वत् तपस्विनः शमप्रधाना अपि अन्यैरभिभवे कृते दाहकरं तेजः प्रकटयन्ति अतस्तपोवनोपरोधः सर्व्वप्रयत्नेन परिहर्त्तव्य इत्यर्थः । इन्द्रवज्रोपेन्द्रवज्रयोः सङ्कररूपा उपजातिः वृत्तम् ।

(ग) ध्वंसतां ते उत्साहवृत्तान्तः ।

उत्साहवृत्तान्तः मृगयायामुत्साहनव्यापारः ।

(घ) नियोगं द्वाररक्षणरूपमधिकारम् ।

(ङ) यत् देवः आज्ञापयति ।

पाअवच्छाआए विरइदलदाविदाणदंसणीआए आसणे णिसी-दटु भवं जाव अहं वि सुहासीणो होमि (क) ।

राजा । गच्छाग्रतः ।

विदूषकः । एदु भवं (ख) ।

उभौ । परिक्रम्योपविष्टौ ।

राजा । माठव्य (१) अनवाप्तचक्षुःफलोऽसि येन त्वया दर्शनीयं वस्तु (२) न दृष्टम् ।

विदूषकः । णं भवं अग्गदो मे वट्टइ (ग) ।

राजा । सर्व्वः कान्तमात्मानं पश्यति । तामाश्रमललामभूतां (३) शकुन्तलामधिकृत्य ब्रवीमि (घ) ।

(क) कृतं भवता निर्मक्षिकम् । साम्प्रतम् एतस्यां पादपच्छायायां विरचितलतावितानदर्शनीयायाम् आसने निषीदतु भवान् यावत् अहम् अपि सुखासीनः भवामि ।

कृतं भवता निर्मक्षिकम्— मक्षिकाणामभावः निर्मक्षिकम् स्थानमेतदेकान्तनिर्जनं कृतमित्यर्थः । विरचितलतावितानदर्शनीयायाम्— विरचितेन सम्पादितेन लतावितानेन लतामयचन्द्रातपेन दर्शनीयायाम् मनोहारिण्याम् ।

(ख) एतु भवान् ।

(ग) ननु भवान् अग्रतः मे वर्त्तते ।

(घ) सर्व्वः कान्तमात्मानं पश्यति— सर्व्वो लोकः आत्मानम् आत्मवत् प्रीतिभाजनं जनं कान्तं मनोहरं पश्यति मन्यते । आश्रमललामभूताम्— आश्रमस्य ललामभूताम् अलङ्कारस्वरूपाम् स्वीयेन रूपोत्कर्षेण आश्रममण्डलमलङ्कुर्व्वतीमित्यर्थः ।

---

(१) सखे माठव्य । १ ।
माठव्य त्वम् । २ ।
माठव्य । ३ । ४ । ५ ।

(२) दर्शनीयं वस्तु । १ । २ । ५ ।
दर्शनीयम् । ३ । ४ ।

(३) तामाश्रमललामभूताम् । १ । ३ । ४ । ५ ।
अहन्तु तामाश्रमललामभूताम् । २ ।

विदूषकः । स्वगतम् । होदु से अवसरं न दाइस्सं । प्रकाशम् । भो वअस्स दे तावसकसा अब्भत्थणीआ दीसइ (क) ।

राजा । सखे न परिहार्य्ये वस्तुनि पौरवाणां मनः प्रवर्त्तते (ख) ।

[illegible]युवतिसम्भवं किल मुनेरपत्यं तदुज्झिताधिगतम् ।
[illegible]र्कस्योपरि शिथिलं च्युतमिव नवमल्लिकाकुसुमम् (ग) ॥

[illegible]दूषकः । विहस्य । जह कस्स वि पिण्डखज्जूरेहिं उव्वेदु-दस्स तिन्तिलीए अहिलासो होइ तह इत्थिआरअणपरि-हाइणो भअदो (१) इअं अब्भत्थणा (घ) ।

(क) भवतु अस्मै अवसरं न दास्यामि । भो वयस्य ते तापसकन्यका अभ्यर्थनीया दृश्यते ।

अवसरं शकुन्तलारूपवर्णनादौ । अभ्यर्थनीया प्रार्थनीया अभिलषणीयेति यावत् ।

(ख) परिहार्य्ये अवैधत्वात् वर्जनीये ।

(ग) मुनेः कण्वस्य अपत्यं कन्या शकुन्तला किल निश्चये सुरयुवतिः मेनका तत्सम्भवम् तद्गर्भसम्भूतं तया मेनकया उज्झितं ततो मुनिना कण्वेन अधिगतं प्राप्तम् । अत्रोपमां दर्शयति शिथिलं वृन्तश्लथम् अर्कस्य आकन्द इत्याख्यया प्रसिद्धस्य वृक्षस्य उपरि च्युतं स्खलितं नवमल्लिकाकुसुमम् इव । आर्य्या जातिः ।

(घ) यथा कस्य अपि पिण्डखर्ज्जूरैः उद्वेजितस्य तिन्तिल्याम् अभिलाषः भवति तथा स्त्रीरत्नपरिभाविणः भवतः इयम् अभ्यर्थना ।

उद्वेजितस्य अतिभक्षणात् उत्पादितारुचिकस्य । स्त्रीरत्नपरिभाविणः— स्त्रीरत्नानि अवरोधवधूः परिभवति अवमन्यते तस्य स्त्रीरत्नानामात्यन्तिक-परिभोगेण तत्र वीतस्पृहस्येत्यर्थः ।

---

(१) भअदो । १ । २ । ३ । ४ । ५ । ६ । ९ । णं भअदो । ७ । ८ ।

राजा। न तावदेनां पश्यसि येनैवमवादीः।

विदूषकः। तं क्खु रमणिज्जं जं भवदो वि विम्हअं उप्पादेइ (क)।

राजा। वयस्य किं बहुना

चित्रे निवेश्य परिकल्पितसत्त्वयोगा
रूपोच्चयेन मनसा विधिना कृता नु।
स्त्रीरत्नसृष्टिरपरा प्रतिभाति सा मे
धातुर्विभुत्वमनुचिन्त्य वपुश्च तस्याः (ख)॥

विदूषकः। जइ एव्वं पच्चादेसो दाणिं रूववदीणं (ग)।

राजा। इदं च मे मनसि वर्त्तते

(क) तत् खलु रमणीयं यत् भवतः अपि विस्मयम् उत्पादयति।

(ख) शकुन्तला विधिना ब्रह्मणा चित्रे आलेख्ये निवेश्य तूलिकया उन्मील्य परिकल्पितः योजितः सत्त्वयोगः प्राणसम्बन्धः यस्याः सा तथोक्ता चित्रे हि यथारुचि लेखनं सम्भवति अतस्तदीयं वपुः विधात्रा प्रथमं चित्रे तूलिकया रूपानुरूपमुन्मीलितं पश्चात् प्राणैर्योजितमिति प्रतिभाति अन्यथा तादृशं निरतिशयकमनीयं रूपं लावण्यं वा न सम्पद्येत इति भावः शकुन्तलाया रूपाविष्करणे चित्रकर्म्मापि न पर्य्याप्तमिति मन्यमानः ततोऽपि अधिकतर-फलोपधायकेन साधनान्तरेण तस्या निर्म्माणप्रकारमुपन्यस्यति रूपोच्चयेनेति नु अथवा रूपोच्चयेन सौन्दर्य्यसमुदयेन मनसा कृता निर्म्मिता विधात्रा त्रिलोक-सौन्दर्य्यस्य सारं समाकृष्य सर्व्वेभ्यो निर्म्माणसाधनेभ्यो विशिष्टतमेन मनसैव सा निर्म्मिता इति प्रतीयते अन्यथा तादृशं लोकातीतं सौन्दर्य्यं सौकुमार्य्यं वा न सम्भवेदिति भावः। धातुः ब्रह्मणः विभुत्वं सामर्थ्यं निर्म्माणकौशलातिशय-मिति यावत् तस्याः शकुन्तलायाः वपुः शरीरञ्च अनुचिन्त्य आलोच्य मे मम सा अपरा अन्यादृशी जगद्विलक्षणेति यावत् स्त्रीरत्नसृष्टिः प्रतिभाति। वसन्ततिलका वृत्तम्।

(ग) यदि एवम् प्रत्यादेशः इदानीं रूपवतीनाम्।
प्रत्यादेशः पराभवस्थानं शकुन्तलया सर्व्वा रूपवत्यः पराभूता इत्यर्थः।

अनाघ्रातं पुष्पं किसलयमलूनं कररुहै-

रनाविद्धं रत्नं मधु नवमनास्वादितरसम्।

अखण्डं पुण्यानां फलमिव च तद्रूपमनघं

न जाने भोक्तारं कमिह समुपस्थास्यति विधिः (क)॥

विदूषकः। तेन हि लहुं परित्ताअदु णं भवं। मा कस्स वि तवस्सिणो इङ्गुदितेल्लमिस्सचिक्कणसीसस्स हत्थे पड़िस्सदि (ख)।

राजा। परवती (ग) खलु तत्रभवती। न च सन्निहितोऽत्र गुरुजनः (१)।

विदूषकः। अत्तभवन्तं अन्तरेण केरिसो से दिट्ठिराओ (घ)।

राजा। निसर्गादेव अप्रगल्भस्तपस्विकन्याजनः (२)। तथापि तु

अभिमुखे मयि संहृतमीक्षितं (३)

हसितमन्यनिमित्तकृतोदयम्।

(क) कररुहैः नखैः। अनाविद्धं अनाप्तवेधदोषम्। अनघं सर्व्वथा दोषस्पर्शशून्यम्। समुपस्थास्यति घटयिष्यति। शिखरिणी वृत्तम्।

(ख) तेन हि लघु परित्रायताम् एनां भवान्। मा कस्य अपि तपस्विनः इङ्गुदीतैलमिश्रचिक्कणशीर्षस्य हस्ते पतिष्यति।

लघु शीघ्रम्। इङ्गुदीतैलमिश्रचिक्कणशीर्षस्य— इङ्गुदीतैलेन मिश्रं लिप्तम् अतएव चिक्कणं स्निग्धं चाक्चक्योपेतमिति यावत् शीर्षम् उत्तमाङ्गं यस्य सः तस्य।

(ग) परवती पराधीना।

(घ) अत्रभवन्तम् अन्तरेण कीदृशः अस्याः दृष्टिरागः।

अन्तरेण प्रति। दृष्टिरागः नयनानुरागः।

---

(१) गुरुजनः। १। २। ३। ४। तपस्विकन्यकाजनः। ४। कुलपतिः। ५।

(२) तपस्विकन्याजनः। १। २। ३। ५।

(३) ईक्षणम्। १। ईक्षितम्। २। ३। ४। ५।

विनयवारितवृत्तिरतस्तया
न विवृतो मदनो न च संवृतः (क) ॥

विदूषकः । ण क्खु दिट्ठमेत्तस्स तुह अङ्कं आरोहदि (ख) ।

राजा । मिथः प्रस्थाने (१) पुनः शालीनतयापि (२) काममाविष्कृतो (३) भावस्तत्रभवत्या (ग) । तथाहि

दर्भाङ्कुरेण चरणः क्षत इत्यकाण्डे
तन्वी स्थिता कतिचिदेव पदानि गत्वा ।
आसीद्विवृत्तवदना च विमोचयन्ती
शाखासु वल्कलमसक्तमपि द्रुमाणाम् (घ) ॥

(क) अन्यनिमित्तकृतोदयम्—अन्येन अनुरागादितरेणैव निमित्तेन कारणेन कृतः जनितः उदयः उद्भवः यस्य तत् यथा तथा । विनयवारितवृत्तिः—विनयेन शालीनतया कलत्रो वारिता प्रतिरुद्धा वृत्तिः प्रसरः यस्य सः तथोक्तः । द्रुतविलम्बितं वृत्तम् ।

(ख) न खलु दृष्टमात्रस्य तव अङ्कम् आरोहति ।

(ग) मिथः अन्योन्यं प्रस्थाने पुनः प्रस्थानकाले तु समागमस्थानादावयोरुभयोः स्वं स्वमावासं प्रति प्रत्यावर्त्तनसमये इत्यर्थः तत्रभवत्या शकुन्तलया शालीनतया अधृष्टतया अपि शालीनताम् अपरित्यज्यापि इत्यर्थः कामं यथेप्सितं भावः अनुरागः आविष्कृतः प्रकटितः ।

(घ) अकाण्डे अकस्मात् कारणं विना इत्यर्थः । विवृत्तवदना मां विलोकयितुं परावृत्तमुखी । असक्तम् अलग्नम् । वसन्ततिलका वृत्तम् ।

---

(१) सखीभ्यां मिथः प्रस्थाने ।१।५। शालीनतयापि । ६ ।
मिथः प्रस्थामे । २ । ३ । ४ । (३) कामम् । १ । २ । ३ । ५ । ६ ।
(२) शालीनतया ।१।२।३।४।५। निकामम् । ४ ।

विदूषकः। तेण हि गहीदपाहेओ होहि। किदं तुए उववणं तवोवणं त्ति पेक्खामि (क)।

राजा। सखे तपस्विभिः कैश्चित् परिज्ञातोऽस्मि। चिन्तय तावत् केनापदेशेन सकृदपि आश्रमे (१) वसामः (ख)।

विदूषकः। को अवरो अवदेसो तुम्हाणं राआणं (२) णीवारछट्ठभाअं अम्हाणं उवहरन्तु त्ति (ग)।

राजा। मूर्ख अन्यद्भागधेयमेतेषां रक्षणे निपतति यद्रत्नराशीनपि विहायाभिनन्द्यम् (घ)। पश्य

> यदुत्तिष्ठति वर्णेभ्यो नृपाणां क्षयि तत्फलम्।
> तपःषड्भागमक्षय्यं ददत्यारण्यका हि नः॥

(क) तेन हि गृहीतपाथेयः भव। कृतं त्वया उपवनं तपोवनम् इति प्रेक्षे।

गृहीतपाथेयः— पथि हितं पाथेयम् पथिगमनकाले भोजनाद्यर्थं द्रव्यम् तत् गृहीतं येन सः तथोक्तः शकुन्तलापरिणयार्थं सज्जो भवेत्यर्थः नातः परं तव शकुन्तलालाभो दुर्घट इति भावः। कृतं त्वया उपवनं तपोवनम्— त्वया तपोवनम् उपवनं कृतम् उपवनं हि राज्ञां प्रणयस्थानम् शकुन्तलालाभेन तपोवनमिदं तव उपवनस्थानीयं संवृत्तमिति भावः।

(ख) अपदेशेन छलेन। सकृदपि स्वल्पकालमपि।

(ग) कः अपरः अपदेशः युष्माकं राज्ञाम् नीवारषष्ठभागम् अस्माकम् उपहरन्तु इति।

(घ) भागधेयं राजग्राह्यो भागः। निपतति उत्तिष्ठति।

---

(१) आश्रमपदे। १। ५। आश्रमे। २। ३। ४।

(२) तुम्हाणं राआणं।१।२।४।५।७।८।९। तुमं राआणं। ३।

नेपथ्ये

हन्त सिद्धार्थौ स्वः (१) (क)।

राजा। कर्णं दत्त्वा। अये धीरप्रशान्तस्वरैस्तपस्विभिर्भवितव्यम्।

प्रविश्य

दौवारिकः। जेदु जेदु (२) भट्टा। एदे दुवे इसिकुमारआ पड़िहारभूमिं उवट्ठिदा (ख)।

राजा। तेन हि अविलम्बितं (३) प्रवेशय तौ।

दौवारिकः। एसो पवेसेमि। निष्क्रम्य ऋषिकुमारकाभ्यां सह प्रविश्य। इदो इदो भअवन्ता (४) (ग)।

उभौ। राजानं विलोकयतः।

प्रथमः। अहो दीप्तिमतोऽपि विश्वसनीयतास्य वपुषः (घ)। अथवा उपपन्नमेतदृषिभ्यो नातिभिन्ने राजनि। कुतः

(क) सिद्धार्थौ निष्पन्नप्रयोजनौ राजदर्शनार्थिनोः राजदर्शनलाभात् सिद्धार्थत्वम्।

(ख) जयतु जयतु भर्त्ता। एतौ द्वौ ऋषिकुमारकौ प्रतिहारभूमिम् उपस्थितौ।

प्रतिहारभूमिं द्वारदेशम्।

(ग) एषः प्रवेशयामि। इतः इतः भगवन्तौ।

(घ) दीप्तिमतः प्रतापशालिनः। विश्वसनीयता निर्भयेणोपसर्पणीयता।

---

(१) सिद्धार्थौ स्वः। १। २। ५। ६। सिद्धार्थाः स्मः। ३। ४।

(२) जेदु जेदु।१।२।३।६।७।८। जेदु। ४। ५। ९।

(३) अविलम्बितम्। १। २। ३। ५। अविलम्बेन। ४।

(४) भअवन्ता। १। २। ४। ५। भअन्ता। ३। ६। ७। ८। ९।

अध्याक्रान्ता वसतिरमुनाप्याश्रमे सर्व्वभोग्ये
रक्षायोगादयमपि तपः प्रत्यहं सञ्चिनोति ।
अस्यापि द्यां स्पृशति वशिनश्चारणद्वन्द्वगीतः
पुण्यः शब्दो मुनिरिति मुहुः केवलं राजपूर्ब्बः (क) ॥

द्वितीयः । गौतम अयं स बलभित्सखो दुष्यन्तः (ख) ।

प्रथमः । अथकिम् ।

द्वितीयः । तेन हि

नैतच्चित्रं यदयमुदधिश्यामसीमां धरित्री-
मेकः कृत्स्नां नगरपरिघप्रांशुबाहुर्भुनक्ति ।
आशंसन्ते समितिषु सुरा बद्धवैरा हि दैत्यै-
रस्याधिज्ये धनुषि विजयं पौरुहूते च वज्रे (ग) ॥

(क) अध्याक्रान्ता आलम्बिता । आश्रमे सर्व्वभोग्ये— सर्व्वेषां ब्रह्मचारिप्रमुखाणाम् आश्रमिणां भोग्ये भोगसाधके आश्रमे सर्व्वश्रेष्ठे गृहस्थाश्रमे इत्यर्थः गृहस्थाश्रमो हि सर्व्वेषामाश्रमाणां श्रेष्ठ आश्रयभूतश्च यथा मनुः

सर्व्वेषामपि चैतेषां वेदस्मृतिविधानतः ।
गृहस्थ उच्यते श्रेष्ठः स त्रीनेतान् बिभर्त्ति हि ॥ ६ । ८९ ॥

रक्षायोगात् प्रजापालनात् । वशिनः जितेन्द्रियस्य । चारणद्वन्द्वगीतः— चारणानां वन्दिनां द्वन्द्वैः स्त्रीपुंसयुगलैः गन्धर्व्वमिथुनैरित्यर्थः गीतः कृतगानः । मन्दाक्रान्ता वृत्तम् ।

(ख) बलभित्सखः— बलं तदाख्यम् असुरं भिनत्तीति बलभित् इन्द्रः तस्य सखा रणकर्म्मणि सहायः ।

(ग) उदधिश्यामसीमाम्— उदधिरेव श्यामा नीलवर्णा सीमा यस्याः ताम् नीलजलजलधिपरिवृतामित्यर्थः । नगरपरिघप्रांशुबाहुः— नगरपरिघः पुरार्गला तद्वत् प्रांशू दीर्घौ बाहू भुजौ यस्य सः तथोक्तः । बद्धवैराः— बद्धं चिरस्थं वैरं विरोधो येषां ते तथोक्ताः । पौरुहूते— पुरुहूतस्य इन्द्रस्य इदं पौरुहूतं तस्मिन् । मन्दाक्रान्ता वृत्तम् ।

उभौ। उपगम्य। विजयस्व राजन्।

राजा। आसनादुत्थाय। अभिवादये भवन्तौ।

उभौ। स्वस्ति भवते।

फलान्युपहरतः।

राजा। सप्रणामं परिगृह्य। आज्ञामिच्छामि (१) (क)।

उभौ। विदितो भवानाश्रमसदामिहस्थः (ख)। तेन भवन्तं प्रार्थयन्ते।

राजा। किमाज्ञापयन्ति।

उभौ। तत्रभवतः कण्वस्य महर्षेरसान्निध्यात् रक्षांसि नः इष्टिविघ्नमुत्पादयन्ति। तत् कतिपयरात्रं सारथिद्वितीयेन भवता सनाथीक्रियतामाश्रम इति।

राजा। अनुगृहीतोऽस्मि।

विदूषकः। अपवार्य्य। एसा दाणिं अणुऊला दे अब्भत्थणा (२) (ग)।

(क) आज्ञामिच्छामि— आज्ञाम् भवतोरादेशम् इच्छामि श्रोतुमिति शेषः आगमनप्रयोजनं वदतां भवन्तावित्यर्थः।

(ख) आश्रमसदाम्— आश्रमे तपोवने सीदन्ति अवतिष्ठन्ते इति आश्रमसदः तपोवनवासिनः तेषाम्।

(ग) एषा इदानीम् अनुकूला ते अभ्यर्थना।

(१) आगमनकारणं ज्ञातुमिच्छामि।१। आज्ञापयितुमिच्छामि। ३। ४। आज्ञामिच्छामि। ५।

(२) एसा दाणिं दे अणुऊला अवरा अब्भत्थणा। १। ५। एसा दाणिं दे अणुऊला अब्भत्थणा। २। ६। एसा दाणिं अणुऊला अवरा गेसणा। ३। एसा दाणिं अणुऊला दे अब्भत्थणा। ४। ६। एसा दाणिं अणुऊवा ते अब्भत्थणा। ७। एसा दाणिं अणुऊला अब्भत्थणा। ८।

राजा । स्मितं कृत्वा । रैवतक मद्वचनादुच्यतां सारथिः सबाणासनं रथमुपस्थापयेति ।

दौवारिकः । जं देओ आणवेदु (क) ।

निष्क्रान्तः ।

उभौ । सहर्षम् ।

अनुकारिणि पूर्व्वेषां युक्तरूपमिदं त्वयि ।
आपन्नाभयसत्रेषु दीक्षिताः खलु पौरवाः (ख) ॥

राजा । सप्रणामम् । गच्छतां (१) पुरो भवन्तौ । अह-मपि अनुपदमागत एव ।

उभौ । विजयस्व ।

निष्क्रान्तौ ।

राजा । माठव्य अप्यस्ति (२) शकुन्तलादर्शने कुतूहलम् ।

विदूषकः । पढमं सपरिवाहं आसि दाणिं रक्खसवुत्तन्तेण विन्दू वि ण अवसेसिदो (ग) ।

(क) यत् देवः आज्ञापयति ।

(ख) आपन्नाभयसत्रेषु दीक्षिताः— आपन्नाः आपत्प्राप्ताः तेषां यत् अभयम् अभयदानं तदेव सत्रं यज्ञः तत्र दीक्षिताः व्रतव्रताः ।

(ग) प्रथमं सपरिवाहम् आसीत् इदानीं राक्षसवृत्तान्तेन बिन्दुः अपि न अवशेषितः ।

सपरिवाहम्— परिवाहः जलोच्छ्वासः तेन सह सपरिवाहम् उच्छ्-लितम् अतिप्रभूतं मम कौतूहलमासीदित्यर्थः ।

---

(१) गच्छेताम् । १ । ५ ।
गच्छताम् । २ । ३ । ४ ।

(२) अप्यस्ति । १ । २ । ४ । ५ ।
कच्चिदस्ति ते । ३ ।

राजा। मा भैषीः ननु मत्समीपे वर्त्तिष्यसे (१)।

विदूषकः। एस रक्खसादो रक्खिदो म्हि (क)।

प्रविश्य

दौवारिकः। सज्जो रहो भट्टिणो विजअप्पत्थाणं अवे-क्खदि (२)। एस उण णअरादो देईणं आणत्तिहरओ कर-हओ आअदो (ख)।

राजा। सादरम्। किमम्बाभिः प्रेषितः।

दौवारिकः। अह इं (ग)।

राजा। ननु प्रवेश्यताम्।

दौवारिकः। तह। निष्क्रम्य करभकेण सह प्रविश्य। एसो भट्टा उवसप्प (३) (घ)।

करभकः। जेदु जेदु भट्टा (४)। देई आणवेदु आआ-

(क) एषः राक्षसात् रक्षितः अस्मि।

(ख) सज्जः रथः भर्त्तुः विजयप्रस्थानम् अपेक्षते। एषः पुनः नगरात् देवीनाम् आज्ञप्तिहरः करभकः आगतः।

आज्ञप्तिहरः— आज्ञप्तिम् आदेशं हरति वहतीति तथोक्तः।

(ग) अथकिम्।

(घ) तथा। एषः भर्त्ता उपसर्प।

---

(१) मत्समीपे वर्त्तिष्यसे।१।२।४।५। मत्समीपवर्त्तिना त्वया भवितव्यम्।३।

(२) पेक्खदि।१।२।३।४।५।७।८।६। अवेक्खदि।६।

(३) उवसप्प।१।२।३।५।६।७।८।६। उवसप्प णं।४।

(४) जेदु भट्टा।१।२।६। जेदु जेदु भट्टा।३।४।५।७।८।६।

मिणि चउत्थदिअहे पउत्तपारणो मे उववासो होहिइ तहिं दीहाउणा अवस्सं संभाविदव्व त्ति (क)।

राजा। इतस्तपस्विकार्य्यम् इतो गुरुजनाज्ञा (१) द्वयमप्यनतिक्रमणीयम् (२)। किमत्र प्रतिविधेयम् (३) (ख)।

विदूषकः। तिसङ्कू विअ अन्तराले चिट्ठ (ग)।

राजा। सत्यमाकुलीभूतोऽस्मि।

> कृत्ययोर्भिन्नदेशत्वाद् द्वैधीभवति मे मनः।
>
> पुरः प्रतिहतं शैले स्रोतः स्रोतोवहो यथा॥

विचिन्त्य। सखे (४) त्वमम्बया पुत्र इति प्रतिगृहीतः। अतो

(क) जयतु जयतु भर्त्ता। देवी आज्ञापयति आगामिनि चतुर्थदिवसे प्रवृत्तपारणः मे उपवासः भविष्यति तत्र दीर्घायुषा अवश्यं सम्भावयितव्या इति।

प्रवृत्तपारणः— प्रवृत्ता आरब्धा पारणा उपवासान्तभोजनं यस्य स तथोक्तः। सम्भावयितव्या सन्निधानेन तात्कालिकपुत्रकर्त्तव्यानुष्ठानेन च समादरणीया।

(ख) अनतिक्रमणीयम् अनुल्लङ्घनीयम्। किमत्र प्रतिविधेयम्— अत्र अस्मिन् कार्य्यविरोधे किं प्रतिविधेयं क उपायः कर्त्तव्यः।

(ग) त्रिशङ्कुः इव अन्तराले तिष्ठ।

---

(१) गुरुजनाज्ञा। १। २। ४। ५।
गुरुजनानुज्ञा। ३।

(२) इदं द्वयमपि। १। ५।
द्वयमपि। २। ३। ४।

(३) विधेयम्। १ २। ५।
प्रतिविधेयम्। ३। ४। ६।

(४) सखे माठव्य। १।
सखे। २। ३। ४। ५।

भवान् इतः प्रतिनिवृत्य तपस्विकार्य्यव्यग्रमनसं मामावेद्य तत्रभवतीनां पुत्त्रकृत्यमनुष्ठातुमर्हति (१) ।

विदूषकः । ण (२) क्खु मं रक्खोभीरुअं गणेसि (क) ।

राजा । सस्मितम् । कथमेतद्भवति सम्भाव्यते ।

विदूषकः । जह राआणुएण गन्तव्वं तह गच्छामि (ख) ।

राजा । ननु तपोवनोपरोधः परिहरणीय इति सर्व्वान् अनुयात्रिकांस्त्वयैव सह प्रस्थापयामि ।

विदूषकः । तेण हि जुअराओ म्हि दाणिं संवुत्तो (३) (ग) ।

राजा । आत्मगतम् । चपलोऽयं वटुः । कदाचिदस्मत्प्रार्थनाम् अन्तःपुरेभ्यः कथयेत् (घ) । भवतु एनमेवं वक्ष्ये । विदूषकं हस्ते गृहीत्वा । प्रकाशम् । वयस्य ऋषिगौरवादाश्रमं गच्छामि । न खलु सत्यमेव तापसकन्यायां (४) ममाभिलाषः ।

(क) न खलु मां रक्षोभीरुकं गणयसि ।

(ख) यथा राजानुजेन गन्तव्यं तथा गच्छामि ।

(ग) तेन हि युवराजः अस्मि इदानीं संवृत्तः ।

(घ) अन्तःपुरेभ्यः अन्तःपुरवासिनीभ्यः राजपत्नीभ्यः । अस्मत्प्रार्थनाम् अस्माकं शकुन्तलापरिणयाभिलाषम् ।

---

(१) पुत्त्रकृत्यम् । १ । २ । ५ ।
पुत्त्रत्वम् । ३ । ४ ।

(२) णं । १ ।
णा । ३ । ४ । ५ । ६ । ७ । ८ । ९ ।

(३) दाणिं संवुत्तो । १ । २ । ३ । ४ ।
५ । ६ । ९ ।
संवुत्तो दाणिं । ७ । ८ ।

(४) न खलु तापसकन्यकायां सत्यमेव शकुन्तलायाम् ।१।२।५।
न खलु सत्यमेव तापसकन्यायाम् । ३ ।
न खलु सत्यमेव तापसकन्यायां शकुन्तलायाम् । ४ ।

पश्य

क्व वयं क्व परोक्षमन्मथो मृगशावैः सममेधितो जनः ।
परिहासविजल्पितं सखे परमार्थेन न गृह्यतां वचः (क) ॥

विदूषकः । अहह (१) (ख) ।

निष्क्रान्ताः सर्वे ।

द्वितीयोऽङ्कः ।

(क) परोक्षमन्मथः-- परोक्षः अगोचरः मन्मथः मदनः यस्य स तथोक्तः, अननुभूतमदनविकार इत्यर्थः । एधितः वृद्धिं गतः । वैतालीयं वृत्तम् ।

(ख) अथकिम् ।

---

(१) १ । ६ । ८ । पुस्तकेषु अयमंशो न दृश्यते ।
विदूषकः । अहह ।

ततः प्रविशति यजमानशिष्यः (क) कुशानादाय (१) ।

शिष्यः । अहो महानुभावः पार्थिवो दुष्यन्तः । प्रविष्टमात्र एवाश्रमं तत्रभवति राजनि निरुपद्रवाणि नः कर्म्माणि प्रवृत्तानि भवन्ति (२) (ख) ।

का कथा बाणसन्धाने ज्याशब्देनैव दूरतः ।
हुङ्कारेणेव धनुषः स हि विघ्नानपोहति (ग) ॥

यावदिमान् वेदिसंस्तरणार्थं दर्भानृत्विग्भ्य उपनयामि । परिक्रम्यावलोक्य च । आकाशे । प्रियंवदे कस्येदमुशीरानुलेपनं मृणालवन्ति च नलिनीपत्राणि (३) नीयन्ते । श्रुतिमभिनीय । किं ब्रवीषि(४) आतपलङ्घनात् बलवदस्वस्था शकुन्तला तस्याः शरीरनिर्व्वापणाय

(क) यजमानशिष्यः— यजमानस्य आरब्धयज्ञस्य महर्षेः कण्वस्य शिष्यः ।
(ख) महानुभावः महाप्रभावः । प्रवृत्तानि आरब्धानि ।
(ग) अपोहति निरस्यति । पथ्यावक्त्रं वृत्तम् ।

---

(१) यजमानशिष्यः कुशानादाय ।१। २ । ३ । ५ ।
कुशानादाय यजमानशिष्यः ।४।

(२) प्रविष्टमात्र एवाश्रमं तत्रभवति राजनि निरुपद्रवाणि नः कर्म्माणि प्रवृत्तानि भवन्ति ।१। २ । ४ । ५ ।
प्रविष्टमात्र एव सारथिद्वितीये तत्रभवति इदमाश्रमं निवृत्तरक्षोविघ्नं संवृत्तम् निरुपप्लवानि च नः कर्म्माणि सिद्धानि । ३ ।

(३) नलिनीपत्राणि ।१।२।४।५।
कमलिनीपत्राणि । ३ ।

(४) आकर्ण्य किं ब्रवीषि ।१।४।६।
श्रुतिमभिनीय किं ब्रवीषि ।३।
किं ब्रवीषि । २ । ५ ।

इति (१)। तर्हि त्वरितं गम्यताम्। सखि सा खलु भगवतः कण्वस्य कुलपतेरुच्छ्वसितम्। अहमपि तावत् वैतानिकं शान्त्युदकम् अस्यै (२) गौतमीहस्ते विसर्जयिष्यामि (३) (क)।

निष्क्रान्तः।

शुद्धविष्कम्भकः।

(क) वेदिसंस्तरणार्थम्— वेद्याः संस्तरणम् आच्छादनम् तदर्थम्। आतपलङ्घनात्— आतपस्य उत्तापस्य लङ्घनम् अभिभवः तस्मात्। उच्छ्वसितं जीवितम्। वैतानिकम्— वितानं यज्ञः तस्येदं वैतानिकम्। शान्त्युदकम्— शान्तिः उपद्रवोपशमनं तदर्थमुदकं शान्त्युदकम्। अस्यै शकुन्तलायै अस्याः शरीरनिर्वापणार्थमित्यर्थः।

---

(१) शरीरनिर्वापणाय।१।२।४।५। दाहनिर्वापणाय।३।

(२) शान्त्युदकम्।१।२।४।५। शान्त्युदकमस्यै।३।

(३) विसर्जयिष्यामि।१।२।४।५। विसर्जयामि।३।

ततः प्रविशति कामयानावस्थो (१) राजा (क)।

राजा। निश्वस्य (२)।

जाने तपसो वीर्य्यं सा बाला परवतीति मे विदितम्।
अलमस्मि ततो हृदयं तथापि नेदं निवर्त्तयितुम् (३) (ख)॥

मदनबाधां निरूप्य। भगवन् कुसुमायुध त्वया चन्द्रमसा च विश्वसनीयाभ्याम् अतिसन्धीयते कामिजनसार्थः (ग)। कुतः

तव कुसुमशरत्वं शीतरश्मित्वमिन्दो-
र्द्वयमिदमयथार्थं दृश्यते मद्विधेषु।

(क) कामयानावस्थः— कामयानः जातपूर्व्वरागो नायकः तस्येव अवस्था दशा यस्य सः तथोक्तः।

(ख) परवती पराधीना। अलं समर्थः। आर्य्या जातिः।

(ग) निरूप्य अभिनीय। विश्वसनीयाभ्याम्— अयं कुसुमशरः असौ शीतरश्मिः नैताभ्यां कस्यापि क्लेशः सम्भवतीतिविश्वासभूमिभ्याम्। अतिसन्धीयते वञ्च्यते वञ्चनाप्रकारश्च तव कुसुमशरत्वमित्यादिना श्लोकेन विवृतः।

---

(१) कामयानावस्थः। १। २। ४। ५। ६।
कामयानः। ३।

(२) राजा। १। २। ५।
राजा। चिन्ताकुलीकुलम्। ३।
राजा। निश्वस्य। ४।

(३) २। पुस्तके उत्तरार्द्धे
न च निम्नादिव सलिलं
निवर्त्तते मे ततो हृदयम्।
इति पाठो दृश्यते।

विसृजति हिमगर्भैरग्निमिन्दुर्मयूखै-
स्त्वमपि कुसुमबाणान् वज्रसारीकरोषि (१) (क)॥

(क) मालिनी वृत्तम् ।

---

(१) मदनबाधां निरूप्येत्यादेः वज्रसारीकरोषीत्यन्तस्यांशस्य स्थले बहुतरः पाठभेदो दृश्यते। यथा

१। मदनबाधां निरूप्य। भगवन् मन्मथ कुतस्ते कुसुमायुधस्य शरतैक्ष्ण्यमेतत्। स्मृत्वा। आं ज्ञातम्

अद्यापि नूनं हरकोपवह्निस्त्वयि ज्वलत्यौर्व्व इवाम्बुराशौ।
त्वमन्यथा मन्मथ मद्विधानां भस्मावशेषः कथमेवमुष्णः॥

अपिच। भगवन् कुसुमायुध त्वया चन्द्रमसा च विश्वसनीयाभ्याम् अतिसन्धीयते कामिजनसार्थः। कुतः

तव कुसुमशरत्वं शीतरश्मित्वमिन्दो-
र्द्वयमिदमयथार्थं दृश्यते मद्विधेषु।
विसृजति हिमगर्भैरग्निमिन्दुर्मयूखै-
स्त्वमपि कुसुमबाणान् वज्रसारीकरोषि॥

अथवा

अनिशमपि मकरकेतुर्मनसो रुजमावहन्नभिमतो मे।
यदि मदिरायतनयनां तामधिकृत्य प्रहरतीति॥

भगवन् काम एवमुपालब्धस्य ते न मां प्रत्यनुक्रोशः

वृथैव सङ्कल्पशतैरजस्रमनङ्ग नीतोऽसि मयातिवृद्धिम्।
आकृष्य चापं श्रवणोपकण्ठे मय्येव योग्यस्तव बाणमोक्षः॥ १। २। ५।

२। मदनस्य बाधां निरूप्य। सासूयम्। भगवन् कुसुमायुध त्वया चन्द्रमसा च विश्वसनीयाभ्यामतिसन्धीयते कामिजनसार्थः। कुतः

तव कुसुमशरत्वं शीतरश्मित्वमिन्दो-
र्द्वयमिदमयथार्थं दृश्यते मद्विधेषु।
विसृजति हिमगर्भैरग्निमिन्दुर्मयूखै-
स्त्वमपि कुसुमबाणान् वज्रसारीकरोषि॥

परिक्रम्य (१)। क्व नु खलु संस्थिते कर्म्मणि सदस्यैरनुज्ञातः श्रम-क्लान्तमात्मानं विनोदयामि। निश्वस्य। किं नु खलु मे प्रिया-दर्शनादृते शरणमन्यत्। यावदेनामन्विष्यामि। सूर्य्यमवलोक्य। इमामुग्रातपवेलां प्रायेण लतावलयवत्सु मालिनीतीरेषु ससखी-जना शकुन्तला गमयति तत्रैव तावद्गच्छामि। परिक्रम्य संस्पर्शं रूपयित्वा (२)। अहो प्रवातसुभगोऽयमुद्देशः (क)।

(क) संस्थिते समाप्ते। सदस्यैरनुज्ञातः— सदसि सभायां साधवः सदस्याः विधिदर्शिनः यज्ञस्य सम्यगनुष्ठानप्रत्यवेक्षणार्थं नियुक्ता यज्ञसहायास्तपस्विन इत्यर्थः तैः अनुज्ञातः नातः परं भवत्सन्निधिरावश्यकः अतो भवान् राजधानीं प्रतिगच्छतु इत्येवमादिष्टः। श्रमक्लान्तम्— श्रमेण पूर्व्वरागसमुद्भव-चिन्तोद्वेगनिद्राच्छेदादिनिबन्धनेन आयासेन क्लान्तं ग्लानम्। उग्रातप-

---

भगवन् काम एवमभ्युपालब्धस्य ते न मय्यनुक्रोशः कुतश्च ते कुसुमायुधस्य सतस्तीक्ष्णत्वम्। विचिन्त्य। आः ज्ञातम्

अद्यापि नूनं हरकोपवह्निस्त्वयि ज्वलत्यौर्व्व इवाम्बुराशौ।
त्वमन्यथा मन्मथ मद्विधानां भस्मावशेषः कथमेवमुष्णः॥ ३॥

३। मदनबाधां निरूप्य। भगवन् कुसुमायुध त्वया चन्द्रमसा च विश्वस-नीयाभ्यामतिसन्धीयते कामिजनसार्थः। कुतः

तव कुसुमशरत्वं शीतरश्मित्वमिन्दो-
र्द्वयमिदमयथार्थं दृश्यते मद्विधेषु।
विसृजति हिमगर्भैरग्निमिन्दुर्मयूखै-
स्त्वमपि कुसुमबाणान् वज्रसारीकरोषि॥ ४। ६॥

(१) सखेदं परिक्रम्य। १।   परिक्रम्य। २। ३। ४। ५।

(२) परिक्रम्येत्येतदनन्तरं संस्पर्शं रूपयित्वेत्येतत्पूर्व्वं १। २ पुस्तकयोः अनया बालपादपवीथ्या सुतनुरचिरं गतेति तर्कयामि। कुतः

सम्मीलन्ति न तावद्बन्धनकोषास्तयावचितपुष्पाः।
क्षीरस्निग्धाश्चामी दृश्यन्ते किसलयच्छेदाः॥

अयमंशो दृश्यते।

शक्यमरविन्दसुरभिः (१) कणवाही मालिनीतरङ्गाणाम् ।
अङ्गैरनङ्गतप्तैरविरलमालिङ्गितुं पवनः (क) ॥

परिक्रम्यावलोक्य च । अस्मिन् वेतसपरिक्षिप्ते लतामण्डपे सन्निहितया शकुन्तलया (२) भवितव्यम् (३) (ख) । तथाहि (४)

अभ्युन्नता पुरस्तादवगाढा जघनगौरवात् पश्चात् ।
द्वारेऽस्य पाण्डुसिकते पदपङ्क्तिर्दृश्यतेऽभिनवा (ग) ॥

यावत् विटपान्तरेणावलोकयामि । परिक्रम्य तथा कृत्वा । सहर्षम् (५) ।

वेलाम्— उग्रः तीक्ष्णः दुःसह इति यावत् आतपः उत्तापः यस्यां सा चासौ वेला च ताम् । गमयति अतिवाहयति । रूपयित्वा अभिनीय । प्रवातसुभगोऽयमुद्देशः— अयम् उद्देशः प्रदेशः प्रकृष्टः शीतलः सुरभिश्च वातः पवनो यत्र स प्रवातः अतएव सुभगः सुखसेव्यः ।

(क) अविरलं गाढम् । आर्य्या जातिः ।

ननु शकिसहोश्चेति कर्म्मणि यति कृते शक्यं सह्यम् इति रूपं सिद्धम् तेन सह पवनस्य भिन्नलिङ्गस्य सामानाधिकरण्यं कुत इति चेत् न महाभाष्यवचनात् शक्यश्च श्मांसादिभिरपि श्वा प्रतिहन्तुमिति । राघवभट्टः ।

(ख) वेतसपरिक्षिप्ते— वेतसैः वञ्जुलैः परिक्षिप्ते परिवेष्टिते ।

(ग) अवगाढा निम्ना । अस्य वेतसपरिक्षिप्तस्य लतामण्डपस्य । पाण्डुसिकते— पाण्डुः शुक्लपीता सिकता वालुका यस्मिन् तथोक्ते । पदपङ्क्तिः पादन्यासपरम्परा । आर्य्या जातिः ।

---

(१) शक्यमरविन्दसुरभिः ।१।४।५।
शक्योऽरविन्दसुरभिः । २ ।
शक्यमरविन्दसुभगः । २ । ६ ।
(२) सन्निहितया शकुन्तलया ।१।२।४।५।
सन्निहितया तया । ३ ।
(३) भवितव्यम् । १ । २ । ३ । ४ ।
भाव्यम् । ५ ।
(४) तथाहि । १ । २ । ४ । ५ ।
तथाहि । अधो विलोक्य । ३ ।
(५) तथा कृत्वा सहर्षम् ।१।२।३।
तथा कृत्वा । ४ । ५ ।

अये लब्धं नेत्रनिर्व्वाणम् एषा मे मनोरथप्रियतमा सकुसुमास्तरणं शिलापट्टमधिशयाना सखीभ्यामन्वास्यते। भवतु श्रोष्यामि आसां विस्रम्भकथितानि (क)।

विलोकयन् स्थितः।

ततः प्रविशति यथोक्तव्यापारा सह सखीभ्यां शकुन्तला।

सख्यौ। उपवीज्य। सस्नेहम्। हला सउन्तले अवि सुहेदि दे णलिणीपत्तवाओ (ख)।

शकुन्तला। किं वीएन्ति मं सहीओ (ग)।

सख्यौ। विषादं नाटयित्वा। परस्परमवलोकयतः।

राजा। बलवदस्वस्थशरीरा शकुन्तला दृश्यते। तत् (१) किमयमातपदोषः स्यात् उत यथा मे मनसि वर्त्तते। विचिन्त्य (२)। अथवा कृतं सन्देहेन

स्तनन्यस्तोशीरं शिथिलितमृणालैकवलयं
प्रियायाः साबाधं किमपि कमनीयं वपुरिदम्।

(क) विटपान्तरेण— विटपानां तरुशाखानाम् अन्तरेण अवकाशेन। लब्धं नेत्रनिर्व्वाणम्— नेत्रयोः नयनयोः निर्व्वाणं निरतिशयं सुखं लब्धं प्राप्तम् शकुन्तलादर्शनेन नेत्रे चरितार्थे संवृत्ते इत्यर्थः। सकुसुमास्तरणम्— कुसुमास्तरणं पुष्पमयी शय्या तेन सह। शिलापट्टम् प्रस्तरखण्डम्। अन्वास्यते परिचर्य्यते। विस्रम्भकथितानि विश्रब्धालापान्।

(ख) हला शकुन्तले अपि सुखयति त्वां नलिनीपत्रवातः।

(ग) किं वीजयतः मां सख्यौ।

---

(१) तत्। १। २। ४। ५।
सवितर्कम्। तत्। ३।

(२) विचिन्त्य। १। २। ४। ५।
साभिलाषं निर्वर्ण्य। ३।

समस्तापः कामं मनसिजनिदाघप्रसरयो-
र्न तु ग्रीष्मस्यैवं सुभगमपराद्धं युवतिषु (क) ॥

प्रियंवदा । जनान्तिकम् । अणसूए (१) तस्स राएसिणो पढमदंसणादो आरहिअ पज्जुसुआ विअ सउन्तला । किं णु (२) क्खु से तण्णिमित्तो अअं आतङ्को भवे (ख) ।

अनसूया । सहि मम वि एरिसी आसङ्का हिअअस्स । होदु पुच्छिस्सं दाव णं । प्रकाशम् । सहि पुच्छिअव्वा सि किं वि । वलिअं क्खु दे सन्तावो (ग) ।

(क) स्तनयोः न्यस्तम् अर्पितम् उशीरम् उशीरानुलेपनं यस्मिन् सन्तापनिवारणाय स्तनयोरुशीरानुलिप्तमित्यर्थः शिथिलितं सन्तापातिशयेन शुष्कतया श्लथीभूतं मृणालस्य एकं वलयं यस्मिन् आबाधया प्रबलया पीड़या सह साबाधं निरतिशयवेदनाभिभूतमित्यर्थः प्रियायाः शकुन्तलायाः इदं पुरोवर्त्ति वपुः शरीरं किमपि लोकोत्तरतया कमनीयं मनोहरम् । मनसिजस्य मदनस्य निदाघप्रसरस्य ग्रीष्मप्रादुर्भावस्य च तापः सन्तापः समः तुल्यः कामम् अनुमतम् उभावेव शरीरं तुल्यतया सन्तापयतः इत्यत्र संशयो नास्तीत्यर्थः तु किन्तु युवतिषु विषये ग्रीष्मस्य अपराद्धम् अपराधः अभिभव इति यावत् एवं सुभगं रमणीयं न भवति अतः असंशयं मदनाभिभूतेयमिति भावः । शिखरिणी वृत्तम् ।

(ख) अनसूये तस्य राजर्षेः प्रथमदर्शनात् आरभ्य पर्य्युत्सुका इव शकुन्तला । किं नु खलु अस्याः तन्निमित्तः अयम् आतङ्कः भवेत् ।

आतङ्कः व्याधिः ।

(ग) सखि मम अपि ईदृशी आशङ्का हृदयस्य । भवतु प्रक्ष्यामि तावत् एनाम् । सखि प्रष्टव्या असि किमपि । बलीयान् खलु ते सन्तापः ।

---

(१) सहि अणसूए । १ । २ । ४ । ५ ।
अणसूए । ३ । ६ । ७ । ८ । ९ ।

(२) णु । १ । ३ । ४ । ५ । ६ । ७ । ८ । ९ ।
ण । २ ।

शकुन्तला। पूर्व्वार्द्धेन पुष्पशय्यास्तरस्य (क)। हला किं वत्तु-कामा सि (ख)।

अनसूया। हला सउन्तले अणब्भन्तरा क्खु अम्हे मअणगअस्स वुत्तन्तस्स। किन्तु जारिसी इतिहासणिबन्धेसु कामअमाणाणं अवत्था सुणीअइ तारिसिं दे पेक्खामि। काहेहि किं णिमित्तं दे सन्तावो। विआरं क्खु परमत्थदो अजाणिअ अणारम्भो पडिआरस्स (ग)।

राजा। अनसूयामप्यनुगतो मदीयस्तर्कः। नहि स्वाभिप्रायेण मे दर्शनम् (घ)।

शकुन्तला। आत्मगतम्। बलअं (१) क्खु मे अहि-

(क) उदरस्य परित्यज्य।

(ख) हला किं वक्तुकामा असि।

(ग) हला शकुन्तले अनभ्यन्तरे खलु आवां मदनगतस्य वृत्तान्तस्य। किन्तु यादृशी इतिहासनिबन्धेषु कामयमानानाम् अवस्था श्रूयते तादृशीं ते प्रेक्षे। कथय किं निमित्तं ते सन्तापः। विकारं खलु परमार्थतः अज्ञात्वा अनारम्भः प्रतिकारस्य।

अनभ्यन्तरे— अविद्यमानम् अभ्यन्तरं रहस्यं तज्ज्ञानमिति यावत् ययोः ते रहस्यानभिज्ञे इत्यर्थः। मदनगतस्य वृत्तान्तस्य मन्मथसंक्रान्तस्य व्यापारस्य। इतिहासनिबन्धेषु उपाख्यानग्रन्थेषु। कामयमानानां जातपूर्व्वरागाणां कामिनाम्। विकारं व्याधिम्। परमार्थतः याथातथ्येन।

(घ) मदीयस्तर्कः शकुन्तला मदनग्लानैव न पुनरन्यस्मात् कारणात् अस्या ईदृशी अवस्थेत्येवंरूपो विचारः अनसूयामपि अनुगतः आश्रितः अनसूययापि मदीयस्तर्कोऽनुसृत इत्यर्थः। नहि मे मम स्वाभिप्रायेण आत्माभिप्रायानुसारेण दर्शनं शकुन्तलायाश्चित्तवृत्तिसम्भावनम्।

---

(१) बलवं। १। ६। ७। ८। ६। बलिअं। २। ३। ४। ५।

णिएसो। दाणिं वि सहसा एदाणं (१) ण सक्कणोमि णिएदेउं (क)।

प्रियंवदा। सहि (२) सुट्ठु एसा भणइ। किं अत्तणो आतङ्कं उवेक्खसि (३)। अणुदिअहं क्खु परिहीअसि अङ्गेहिं। केवलं लावसमई छाआ तुमं ण मुञ्चइ (ख)।

राजा। अवितथमाह प्रियंवदा। तथाहि

क्षामक्षामकपोलमाननमुरः काठिन्यमुक्तस्तनं
मध्यः क्लान्ततरः प्रकामविनतावंसौ छविः पाण्डुरा।
शोच्या च प्रियदर्शना च मदनक्लिष्टेयमालक्ष्यते
पत्राणामिव शोषणेन मरुता स्पृष्टा लता माधवी (ग)॥

(क) बलवान् खलु मे अभिनिवेशः। इदानीम् अपि सहसा एतयोः न शक्नोमि निवेदयितुम्।

अभिनिवेशः निर्बन्धः अकथने इतिशेषः सन्तापकारणकथने एकान्तवैमुख्यमित्यर्थः। इदानीमपि एतदवस्थायामपि सखीभ्यां प्रश्ने कृतेऽपीत्यर्थः।

(ख) सखि सुष्ठु एषा भणति। किम् आत्मनः आतङ्कम् उपेक्षसे। अनुदिवसं खलु परिहीयसे अङ्गैः। केवलं लावण्यमयी छाया त्वां न मुञ्चति।

आतङ्कम् उपेक्षसे— आतङ्कं व्याधिम् उपेक्षसे प्रतिकारवैमुख्येन तस्मै प्रसरं ददासीत्यर्थः। परिहीयसे अङ्गैः— अङ्गैः अवयवैः परिहीयसे परित्यज्यसे दिने दिने नितरां कृशा भवसीत्यर्थः। लावण्यमयी छाया लावण्यपूर्णा कान्तिः।

(ग) आननं मुखं क्षामक्षामौ अतिकृशौ कपोलौ गण्डदेशौ यस्मिन् तत्

---

(१) सहीणं। १।
एदाणं।२।३।४।५।६।७।८।९।

(२) सहि। १। २। ३। ४। ५। ९।
सहि सउन्दले। ७। ८।

(३) किं अत्तणो आतङ्कं उवेक्खसि।
१। २। ३। ५। ६। ७। ८।
अत्तणो आतङ्कं किं उवेक्खसि
१४। ९।

शकुन्तला (१)। सहि कस्स वा अस्स कहइस्सं। आआस-
इत्तिआ दाणिं वो भविस्सं (क)।

उभे। अदो एव्व क्खु णिव्वन्धो सिणिद्धजणसंविहत्तं हि
दुक्खं सज्झवेअणं (२) होइ (ख)।

राजा।

पृष्टा जनेन समदुःखसुखेन बाला
नेयं न वक्ष्यति मनोगतमाधिहेतुम्।

तथोक्तम् उरः वक्षः काठिन्येन कार्कश्येन मुक्तौ विरहितौ स्तनौ यस्मिन् तत् तथोक्तम् मध्यः अवलग्नभागः क्लान्ततरः नितरां क्लिष्टः अंसौ भुजशिरसी प्रकामम् अत्यर्थं विनतौ अवनतौ छविः कान्तिः पाण्डुरा पाण्डुवर्णा मदनक्लिष्टा मन्मथग्लाना इयं शकुन्तला पत्राणां पर्णानां शोषणेन शोषयित्वा मरुता वायुना स्पृष्टा अभिभूता माधवी वासन्ती लता इव शोच्या शोचनीया च दृष्टा दुःखमुत्पादयतीत्यर्थः प्रियं मधुरं दर्शनम् अवलोकनं यस्याः सा तथोक्ता च आलक्ष्यते। शार्दूलविक्रीडितं वृत्तम्।

(क) सखि कस्य वा अन्यस्य कथयिष्यामि। आयासयित्री इदानीं युवयोः भविष्यामि।

आयासयित्री आत्मदुःखकथनेन क्लेशजनयित्री अतः अकथनमेव श्रेय इति भावः।

(ख) अतः एव खलु निर्बन्धः स्निग्धजनसंविभक्तं हि दुःखं सह्यवेदनं भवति।

अत एव तव दुःखश्रवणेन आवामपि दुःखिते भविष्यावः इत्यस्मादेव कारणात् निर्बन्धः तव सन्तापकारणश्रवणे आवयोरभिनिवेशः हि यतः दुःखं स्निग्धजनेन प्रियजनेन संविभक्तम् अंशितं सत् सह्या सोढुं शक्या वेदना यातना यस्य तादृशं भवति।

---

(१) शकुन्तला। १। २। ४। ५। शकुन्तला। निश्वस्य। २। (२) दुक्खं सज्झवेअणं। १। २। ३। ४। ५। ६। ९। दुक्खं एव्व सुहं। ७। ८।

दृष्टो विवृत्य बहुशोऽप्यनया सतृष्ण-
मत्रान्तरे श्रवणकातरतां (१) गतोऽस्मि (क) ॥

शकुन्तला । सहि जदो पहुदि मम दंसणपहं आअओ सो तवोवणरक्खिआ राएसी (२) तदो आरहिअ तग्गएण अहिलासेण एतदवत्थ म्हि संवुत्ता (ख) ।

राजा । सहर्षम् । श्रुतं श्रोतव्यम् ।

स्मर एव तापहेतुर्निर्व्वापयिता स एव मे जातः ।
दिवस इवार्द्रश्यामस्तपात्यये (३) जीवलोकस्य (ग) ॥

(क) इयं बाला शकुन्तला समे तुल्ये दुःखसुखे यस्य तादृशेन जनेन दुःखे दुःखिना सुखे सुखिना च सखीजनेनेत्यर्थः पृष्टा अनुयुक्ता सती मनोगतं हृदयस्थितम् आधिहेतुं मानसव्यथानिदानं न वक्ष्यति न अपितु वक्ष्यत्येव तत्र मम अणुरपि संशयो नास्तीत्यर्थः किन्तु अनया शकुन्तलया बहुशः वारं वारं विवृत्य परावृत्य सुखं विवर्त्त्य इत्यर्थः सतृष्णं साभिलाषं दृष्टोऽपि प्रथमसमागमादनन्तरम् आश्रमप्रतिगमनकाले इति शेषः अत्र अस्मिन् अन्तरे अवसरे श्रवणकातरतां उत्तरश्रवणे भयविह्वलतां गतः प्राप्तः अस्मि भवामि यदि इयं मदासक्तचित्तताव्यतिरिक्तम् अन्यत् किमपि आधिहेतुतया निर्दिशेत् तदा हतोऽस्मि मन्दभाग्य इत्यर्थः । वसन्ततिलका वृत्तम् ।

(ख) सखि यतः प्रभृति मम दर्शनपथम् आगतः सः तपोवनरक्षिता राजर्षिः ततः आरभ्य तद्गतेन अभिलाषेण एतदवस्था अस्मि संवृत्ता ।

(ग) स्मरः मन्मथः एव मे मम तापस्य विरहसन्तापस्य हेतुः निदानम्

---

(१) अत्रान्तरे श्रवणकातरताम् । १ । २ । ४ । ५ । ६ ।
अतोत्तरश्रवणकातरताम् । ३ ।
(२) राएसी इत्येतदनन्तरं तदो आरहिअ इत्येतत् पूर्व्वं १ । २ । ४ । ७ । पुस्तकेषु अर्द्धोक्ते लज्जां नाटयति । उभे । कहेदु पिअसही । शकुन्तला । अयमंशो दृश्यते ।
(३) आर्द्रश्यामः । १ । ३ । ४ । ५ । ६ ।
अभ्रश्यामः । २ ।

शकुन्तला । तं जइ वो अणुमअं तह वट्टह (१) जह तस्स राएसिणो अणुकम्पणीआ होमि । अण्णहा अवस्सं सिञ्चह मे तिलोदअं (क) ।

राजा । संशयच्छेदि वचनम् ।

प्रियंवदा । जनान्तिकम् । अणसूए दूरगअवम्महा अक्खमा इअं कालहरणस्स । जस्सिं बद्धभावा एसा सो ललामभूतो पोरवाणं । ता जुत्तं से अहिलासो अहिणन्दिउं (ख) ।

अभूदिति शेषः सः स्मरः एव मे निर्व्वापयिता मयि शकुन्तलाया अनुरागोत्पादनेन सन्तापहारकः जातः संवृत्तः अत्रोपमां दर्शयति तपस्य निदाघस्य अत्यये अपगमे प्रावृषि इत्यर्थः अर्द्धे अंशविशेषे श्यामः मेघाच्छन्नतया श्यामवर्णः निरातपः शीतलश्चेत्यर्थः दिवसः दिवाभागः जीवलोकस्य प्राणिवर्गस्य इव यथा प्रावृषि दिवाभागः कियत्कालं सातपतया जीवलोकस्य सन्तापकारकः कियत्कालञ्च मेघाच्छन्नतया सन्तापहारकश्च भवति तद्वदित्यर्थः अर्द्धशब्दोऽत्र न समांशवचनपरः समांशेन दिवसस्य सातपताया मेघाच्छन्नतायाश्चासम्भवात् ।

(क) तत् यदि युवयोः अनुमतं तथा वर्त्तेथां यथा तस्य राजर्षेः अनुकम्पनीया भवामि । अन्यथा अवश्यं सिञ्चतं मे तिलोदकम् ।

अन्यथा अवश्यं सिञ्चतं मे तिलोदकम्— अन्यथा यद्यहं तस्य राजर्षेरनुकम्पनीया न भवेयं तदा अवश्यम् असंशयम् मे मह्यं तिलोदकं तिलमिश्रं सलिलं सिञ्चतं दत्तम् सतिलोदकसेचनं हि प्रेततर्पणम् अन्यथा अहमसंशयं मरिष्यामीत्यर्थः ।

(ख) अनसूये दूरगतमन्मथा अक्षमा इयं कालहरणस्य । यस्मिन् बद्धभावा एषा सः ललामभूतः पौरवाणाम् । तत् युक्तम् अस्याः अभिलाषः अभिनन्दितुम् ।

दूरगतमन्मथा— दूरगतः अत्यारूढ़ः मन्मथः कामो यस्याः सा तथोक्ता

(१) ता तह वट्टह । १।२।६।६। तह वट्टह । ३।४।५।७।८।

अनसूया । तह जह भणासि (क) ।

प्रियंवदा । प्रकाशम् । सहि दिट्ठिआ अणुरूवो दे अहिणिवेसो । साअरं वज्जिअ कहिं वा महाणई ओतरइ । को दाणिं सहआरं अन्तरेण अतिमुत्तलअं पल्लविअं सहइ (ख) ।

राजा । किमत्र चित्रं यदि विशाखे शशाङ्कलेखामनुवर्त्तेते (१) (ग) ।

अनसूया । को उण उवाओ भवे जेण अविलम्बिअं णिहुअं अ सहीए मणोरहं सम्पादेम्ह (घ) ।

मदनवेदनया नितरामभिभूतेत्यर्थः । सक्तभावा— सक्तः आसक्तितः भावः अनुरागः यया सा तथोक्ता एकान्तमनुरक्तेत्यर्थः । ललामभूतः पौरवाणाम्, पौरवकुलालङ्कारभूतः ।

(क) तथा यथा भणसि ।

(ख) सखि दिष्ट्या अनुरूपः ते अभिनिवेशः । सागरं वर्जयित्वा कुत्र वा महानदी अवतरति । कः इदानीं सहकारम् अन्तरेण अतिमुक्तलतां पल्लवितां सहते ।

अभिनिवेशः चित्तासङ्गः । क इदानीमित्यादि— सहकारं विना नान्यो वृक्षः पल्लवितायाः अतिमुक्तलतायाः भरं सोढुं समर्थ इत्यर्थः ।

(ग) यदि विशाखे विशाखाभिधाने द्वे तारके शशाङ्कलेखां चन्द्रबिम्बम् अनुवर्त्तेते अनुसरतः अत्र अस्मिन् विषये किं चित्रम् आश्चर्यम् विशाखयोः शशाङ्कलेखानुसरणमिव अनसूयाप्रियंवदयोः शकुन्तलाया अभिलाषाभिनन्दनं सर्व्वथा समुचितमित्यर्थः ।

(घ) कः पुनः उपायः भवेत् येन अविलम्बितं निभृतं च सख्याः मनोरथं सम्पादयावः ।

(१) एतदनन्तरं । २ । पुस्तके अयमंशो दृश्यते ।
अयमत्र सत्यमक्रीती जनः ।

प्रियंवदा । णिहुअं त्ति चिन्तणीअं भवे सिग्घं त्ति सुअरं (क) ।

अनसूया । कहं विअ (ख) ।

प्रियंवदा । णं सो राएसी इमस्सिं सिणिद्धदिट्ठिए सूइदा-हिलासो (१) इमाइं दिअहाइं पजाअरकिसो लक्खीअइ (ग) ।

राजा । सत्यमित्यम्भूत एवास्मि । तथाहि

इदमशिशिरैरन्तस्तापाद्विवर्णमणीकृतं
निशि निशि भुजन्यस्तापाङ्गप्रसारिभिरश्रुभिः ।
अनभिलुलितज्यावाताङ्कं मुहुर्मणिबन्धनात्
कनकवलयं स्रस्तं स्रस्तं मया प्रतिसार्यते (घ) ॥

(क) निभृतम् इति चिन्तनीयं भवेत् शीघ्रम् इति सुकरम् ।

(ख) कथमिव ।

(ग) ननु सः राजर्षिः अस्यां स्निग्धदृष्ट्या सूचिताभिलाषः इमानि दिवसानि प्रजागरकृशः लक्ष्यते ।

अस्यां शकुन्तलायाम् । प्रजागरकृशः— प्रजागरेण निद्राच्छेदेन कृशः शीर्णः ।

(घ) निशि निशि प्रतिरजनि भुजे बाहौ न्यस्तात् निहितात् अपाङ्गात् नेत्रान्तात् प्रसरन्ति निर्गच्छन्तीति तथोक्तैः अन्तस्तापात् अभ्यन्तरसन्तापात् अशिशिरैः उष्णैः अश्रुभिः बाष्पैः विवर्णाः विकृतवर्णाः मणयः यस्मिन् तत् विवर्णमणि अविवर्णमणि विवर्णमणि कृतं विवर्णमणीकृतं अविरतमश्रुसेकेन वलयखचितमणीनां वैवर्ण्यं जातमित्यर्थः अनभिलुलितः अनभिस्पृष्टः ज्याघाताङ्कः मौर्वीकिणलाञ्छनं येन तथोक्तं मणिबन्धनात् माणिमूलात् स्रस्तं

(१) सिणिद्धदिट्ठिए सूइदाभिलासो । १ । ६ । ७ । ८ । ९ । सिणिद्धदिट्ठिसूइदाहिलासो । २ । । ३ । ४ । ५ ।

प्रियंवदा। विचिन्त्य। हला मअणलेहो से करीअउ। इमं देअसेसावदेसेण (१) सुमणोगोविअं करिअ से हत्थअं पावइस्सं (क)।

अनसूया। रोअइ मे सुउमारो पओओ। किं वा सउन्तला भणादि (ख)।

शकुन्तला (२)। को णिओओ (३) विकप्पीअदि (ग)।

प्रियंवदा। तेण हि अत्तणो उवणासपुव्वं चिन्तेहि दाव किंवि ललिअपदबन्धणं (घ)।

स्रस्तं असकृत् स्खलितम् इदं कनकवलयं मया मुहुः वारं वारं प्रतिसार्य्यते मणिबन्धनं नीयते एतेन मणिबन्धनस्य निरतिशयं कार्श्यं सूचितम्। हरिणी वृत्तम्।

(क) हला मदनलेखः अस्यै क्रियताम्। इमं देवशेषापदेशेन सुमनोगोपितं कृत्वा अस्य हस्तं प्रापयिष्यामि।

देवशेषापदेशेन— देवेभ्यो निवेदितस्य द्रव्यस्य शेषं देवशेषं तस्य अपदेशेन तत्प्रदानव्याजेन।

(ख) रोचते मह्यं सुकुमारः प्रयोगः। किं वा शकुन्तला भणति।

(ग) कः नियोगः विकल्प्यते।

विकल्प्यते विचार्य्यते युवयोः सर्व्व एव नियोगो मया अविचारितमनुष्ठियते इत्यर्थः।

(घ) तेन हि आत्मनः उपन्यासपूर्व्वं चिन्तय तावत् किमपि ललितपदबन्धनम्।

उपन्यासपूर्व्वम्— उपन्यासः अभिप्रायः पूर्व्वः पुरोगामी यस्य तत्

---

(१) देवप्पसादावदेसेण।१।४।६। देअसेसावदेसेण।२।३।५।७।८।९।

(२) शकुन्तला।१।२।४।५। शकुन्तला। सलज्जम्।३।

(३) को णिओओ।१।२।३।४।५।६।७।९। तुम्हाणं को णिओओ।८।

शकुन्तला । चिन्तेमि (१) अहं । अवहीरणाभीरुअं उण वेवइ मे हिअअं (क) ।

राजा (२) ।

अयं स ते तिष्ठति सङ्गमोत्सुको
विशङ्कसे भीरु यतोऽवधीरणाम् ।
लभेत वा प्रार्थयिता न वा श्रियं
श्रिया दुरापः कथमीप्सितो भवेत् (३) (ख) ॥

सख्यौ । अत्तगुणावमाणिणि को दाणिं सरीरणिव्वावइत्तिअं सारदिअं जोसिणिं पडन्तेण वारेइ (ग) ।

उपन्यासपूर्व्वम् अभिप्रायानुगामि अभिप्रायानुरूपमितियावत् । ललितपदबन्धनम्— ललितं कमनीयम् पदबन्धनं गीतिः ।

(क) चिन्तयामि अहम् । अवधीरणाभीरुकं पुनः वेपते मे हृदयम् ।

(ख) सङ्गमोत्सुकः— सङ्गमे समागमे उत्सुकः व्यग्रहृदयः । वंशस्थविलं वृत्तम् ।

(ग) आत्मगुणावमानिनि कः इदानीं शरीरनिर्व्वापयित्रीं शारदीं ज्योत्स्नां पटान्तेन वारयति ।

आत्मगुणावमानिनि— आत्मनः स्वस्याः गुणान् अवमन्यते अवजानातीति तत्सम्बोधनम् । शरीरनिर्व्वापयित्रीम् शरीरस्य देहस्य निर्व्वापयित्रीं सन्तापहारिणीम् ।

---

(१) हला चिन्तेमि अहं । १ । २ । ३ । ४ ।
चिन्तेमि अहं । ६ । ७ । ८ । ९ ।

(२) राजा । १ । ५ ।
राजा । सहर्षम् । ३ । ४ ।

(३) एतदनन्तरं । २ । पुस्तके अपिच ।
अयं स यस्मात् प्रणयावधीरणां
विशङ्कनीयां करभोरु मन्यसे ।
उपागतस्त्वां प्रणयोन्मुखो जनो
न रत्नमन्विष्यति मृग्यते हि तत् ॥
अयमंशो दृश्यते ।

शकुन्तला। सस्मितम्। णिओइआ दाणिं म्हि (क)।

। उपविष्टा चिन्तयति।

राजा। स्थाने खलु विस्मृतनिमेषेण चक्षुषा प्रियामवलोकयामि (ख)। यतः

उन्नमितैकभ्रूलतमाननमस्याः पदानि रचयन्त्याः।
कण्टकितेन प्रथयति मय्यनुरागं कपोलेन (ग)॥

शकुन्तला। हला चिन्तिअं मए (१) गीअवत्थु। णङ्क सण्णिहिआणि उण लेहणसाहणाणि (घ)।

प्रियंवदा। इमस्सिं सुओदरसुउमारे णलिणीवत्ते णहेहिं णिक्खित्तवर्ण्णं करसु (ङ)।

(क) नियोजिता इदानीम् अस्मि।

नियोजिता व्यापृता पदबन्धने इति शेषः।

(ख) विस्मृतः परिहृतः निमेषः स्पन्दः येन तेन निर्निमेषेणेत्यर्थः चक्षुषा प्रियां शकुन्तलाम् अवलोकयामि पश्यामि एतत् स्थाने युक्तं खलु निर्निमेषेण नेत्रेण प्रियाया अवलोकनं युज्यते इत्यर्थः।

(ग) कण्टकितेन रोमाञ्चितेन। प्रथयति प्रकटयति। आर्य्या जातिः।

(घ) हला चिन्तितं मया गीतवस्तु। नहि सन्निहितानि पुनः लेखनसाधनानि।

गीतवस्तु गीते निबन्धनीयो विषयः।

(ङ) अस्मिन् शुकोदरसुकुमारे नलिनीपत्रे नखैः निक्षिप्तवर्णं कुरु।

शुकोदरसुकुमारे— शुकस्य उदरमिव सुकुमारं मसृणं तस्मिन्। निक्षिप्तवर्णम्— निक्षिप्ताः निहिताः उत्कीर्णा इति यावत् वर्णाः अक्षराणि यस्य तत् गीतमिति शेषः।

---

(१) चिन्तिअं मए।१।२।४।५।६।७।८।६। मए चिन्हिअं।३।

शकुन्तला । यथोक्तं रूपयित्वा । हला सुणुह दाणिं संगअत्थं णव त्ति (क) ।

उभे । अवहिद म्ह (ख) ।

शकुन्तला । वाचयति ।

तुज्झ ण आणे हिअअं मह उण कामो दिवा वि रत्तिं वि ।
णिग्घिण (१) तवइ वलीअं तुइ वुत्तमणोरहाइ अङ्गाइ (ग) ॥

राजा । सहसोपसृत्य ।

तपति तनुगात्रि मदनस्त्वामनिशं मां पुनर्दहत्येव ।
ग्लपयति यथा शशाङ्कं न तथा हि कुमुद्वतीं दिवसः (घ) ॥

सख्यौ । सहर्षम् । साअअं अविलम्बिणो मणोरहस्स (ङ) ।

(क) हला शृणुतम् इदानीं सङ्गतार्थं नवा इति ।

(ख) अवहिते स्वः ।

(ग) तव न जाने हृदयं मम पुनः कामः दिवा अपि रात्रौ अपि ।
निर्घृण तपति बलीयः त्वयि वृत्तमनोरथानि अङ्गानि ॥

निर्घृण निर्दय । बलीयः अत्यधिकम् । त्वयि वृत्तमनोरथानि— त्वयि वृत्ताः जाताः मनोरथाः अभिलाषाः येषां तानि तथोक्तानि एकान्तत-स्त्वत्समागमाकाङ्क्षीणीत्यर्थः । गीतिः ।

(घ) आर्य्या जातिः ।

(ङ) स्वागतम् अविलम्बिनः मनोरथस्य ।

अविलम्बिनः कालक्षेपमन्तरेण उपनतस्य मनोरथस्य मनोरथविषयीभूतस्य अभिमतजनस्य भवतः स्वागतं शोभनमागमनं यथाकालमागतं भवन्तमवलोक्य आवां निरतिशयं प्रीते स्व इत्यर्थः ।

---

(१) णिग्घिण ।१।२।५।६।७।८।९। णिक्किव ।२।४।

शकुन्तला । अभ्युत्थातुमिच्छति (१) ।

राजा । अलमलमायासेन ।

सन्दष्टकुसुमशयनान्याशु क्लान्तविसभङ्गसुरभीणि ।
गुरुपरितापानि न ते गात्राण्युपचारमर्हन्ति (क) ॥

अनसूया । इदो सिलातलेक्कदेसं अलङ्करेउ वअस्सो (ख) ।

राजा । उपविशति ।

शकुन्तला । सलज्जं तिष्ठति (२) ।

(क) सन्दष्टं लुलितम् अवमर्द्दनेन म्लानिमापादितमिति यावत् कुसुमशयनं पुष्पमयी शय्या यैः तानि आशु शीघ्रं तत्क्षणमितियावत् क्लान्तैः परिम्लदितैः विसभङ्गैः मृणालखण्डैः सुरभीणि संक्रान्तमृणालसौरभाणीत्यर्थः गुरुः महान् परितापः सन्तापः येषां तानि ते तव गात्राणि अङ्गानि उपचारं शिष्टाचारपरिगृहीतम् अभ्युत्थानादिकं न अर्हन्ति न तदनुष्ठाने क्षमाणि भवन्तीत्यर्थः । आर्य्या जातिः ।

(ख) इतः शिलातलैकदेशम् अलङ्करोतु वयस्यः ।

---

(१) शकुन्तला । अभ्युत्थातुमिच्छति ।१।२।४।५।६। शकुन्तला । ससाध्वसमात्मगतम् । हिअअ तह उत्तम्मिअ दाणिं किंवि ण पडिवज्जसि । अभ्युत्थातुमिच्छति ।३। प्राकृतविकृतित्रये (७।८।९। पुस्तकेषु) अस्य प्राकृतांशस्य विकृतिर्न दृश्यते ।

(२) राजा । उपविशति । शकुन्तला । सलज्जं तिष्ठति ।१।२।४।५।६। राजा । उपविशति । राजा । कच्चित् सखीं वो नातिबाधते सन्तापः । प्रियंवदा । सस्मा सह उपविश्य । लद्धोसहो सम्पदं उवसमं गमिस्सदि । अनसूया । जनान्तिकम् । पिअंवदे कीलिसेण किं पेक्ख सेहवादाहद-मोरीं विअ णिमिसन्तरेण पञ्चाअदं पिअसहिं । शकुन्तला । सलज्जं तिष्ठति । प्राकृतविकृतित्रये (७।८।९। पुस्तकेषु) अनयोः प्राकृतांशयोर्विकृतिर्न दृश्यते ।

प्रियंवदा। दुवेण्णं वि वो (१) अण्णोण्णाणुराओ पच्चक्खो। सहीसिणेहो मं पुणरुत्तवादिणिं करदि (क)।

राजा। भद्रे नैतत् परिहार्य्यम् विवचितं हि अनुक्तम् अनुतापं जनयति (ख)।

प्रियंवदा। आवण्णस्स विसअवासिणो अत्तिहरेण रण्णा होअव्वं त्ति एसो वो धम्मो (ग)।

राजा। नास्मात् परम् (घ)।

प्रियंवदा। तेण हि इअं णो पिअसही तुमं उद्दिसिअ इमं अवत्थन्तरं भअवता मअणेण आरोविआ। ता अरिहसि अब्भुववत्तीए जीविअं से अवलम्बिदुं (ङ)।

(क) द्वयोः अपि युवयोः अन्योन्यानुरागः प्रत्यक्षः। सखीस्नेहः मां पुनरुक्तवादिनीं करोति।

(ख) परिहार्य्यम् उपेक्षणीयम्।

(ग) आपन्नस्य विषयवासिनः आर्त्तिहरेण राज्ञा भवितव्यम् इति एषः वः धर्म्मः।

आपन्नस्य आपत्प्राप्तस्य। विषयवासिनः— विषये देशे वसतीति विषयवासी तस्य प्रजाजनस्य इत्यर्थः।

(घ) अस्मात् विषयवासिनामार्त्तिहरणात् परम् अधिकं न अस्तीति शेषः एष एवास्माकं परमो धर्म्म इत्यर्थः।

(ङ) तेन हि इयम् आवयोः प्रियसखी त्वाम् उद्दिश्य इदम् अवस्थान्तरम् भगवता मदनेन आरोपिता। तत् अर्हसि अभ्युपपत्त्या जीवितम् अस्याः अवलम्बितुम्।

आरोपिता प्रापिता। अभ्युपपत्त्या अनुग्रहेण। अवलम्बितुम् आश्रयप्रदानेन परित्रातुम्।

---

(१) दुवेण्णं वि वो। १। २। ४। ५। ७ दुवेण्णं वो। ३।
। ८। ९। दुवेण्णं ण वो। ६।

राजा । भद्रे साधारणोऽयं प्रणयः (क) । सर्व्वथा अनुगृहीतोऽस्मि ।

शकुन्तला । प्रियंवदामवलोक्य । हला किं अन्तेउरविरहपज्जुस्सुअस्स राएसिणो उवरोहेण (ख) ।

राजा (१) ।

> द्रुदमनन्यपरायणमन्यथा
> हृदयसन्निहिते हृदयं मम ।
> यदि समर्थयसे मदिरेक्षणे
> मदनबाणहतोऽस्मि हतः पुनः (ग) ॥

(क) अयं प्रणयः त्वत्कृता जीविताल्लम्बनप्रार्थना साधारणः उभयत्र समानः यथा त्वं प्रियसखीकृते मामभ्यर्थयसे तथैव मदर्थं प्रियसखीमभ्यर्थयितुमर्हसि इत्यर्थः ।

(ख) हला किम् अन्तःपुरविरहपर्य्युत्सुकस्य राजर्षेः उपरोधेन ।

अन्तःपुरविरहपर्य्युत्सुकस्य— अन्तःपुरस्य लक्षणया अन्तःपुरवर्त्तिनीनां कामिनीनां विरहेण पर्य्युत्सुकस्य उत्कण्ठितहृदयस्य । उपरोधेन अवरोधनेन ।

(ग) माद्यत्याभ्यामिति मदिरे मादयितृणी तादृशे ईक्षणे चक्षुषी यस्याः तत्सम्बोधनम् हृदयस्य मच्चित्तस्य सन्निहिता समीपवर्त्तिनी तदधिवसन्तीत्यर्थः तत्सम्बोधनम् हे मदिरेक्षणे हे हृदयसन्निहिते यदि त्वम् अन्यः त्वदितरो जनः परं प्रधानम् अयनम् आश्रयः यस्य तत्र भवतीत्यनन्यपरायणं त्वदेकपरायणमित्यर्थः इदं मम हृदयम् अन्यथा प्रकारान्तरेण समर्थयसे अन्यपरायणं मन्यसे चेदित्यर्थः तदा मदनस्य मन्मथस्य बाणैः हतः अहं पुनः हतोऽस्मि यो यस्य सन्निहितः स तच्चरिताभिज्ञो भवति त्वन्तु मम हृदयस्य सन्निहितापि न तच्चरितमभिजानासीत्याश्चर्य्यम् । द्रुतविलम्बितं वृत्तम् ।

---

(१) राजा । १ । २ । ४ । ५ । राजा । सुन्दरि । २ ।

अनसूया। वअस्स (१) बहुवल्लहा राआणो सुणीअन्ति। जह णो पिअसही बन्धुअणसोअणीआ ण होइ तह णिव्वा-हेहि (२) (क)।

राजा। भद्रे किं बहुना

परिग्रहबहुत्वेऽपि द्वे प्रतिष्ठे कुलस्य मे।
समुद्रवसना चोर्वी (३) सखी च युवयोरियम् (४) (ख)॥

(क) वयस्य बहुवल्लभाः राजानः श्रूयन्ते। यथा आवयोः प्रियसखी बन्धुजनशोचनीया न भवति तथा निर्व्वाहय।

(ख) परिग्रहाणां पत्नीनां बहुत्वे अनेकत्वेऽपि सत्स्वपि बहुषु परिग्रहे-ष्वित्यर्थः समुद्रः वसनम् आवरणं यस्याः सा तथोक्ता समुद्रपरिवेष्टितेत्यर्थः उर्व्वी पृथिवी च इयं युवयोः सखी च इति द्वे मम कुलस्य प्रतिष्ठे गौरवहेतू भविष्यतः। पथ्यावक्त्रं वृत्तम्।

---

(१) अवस्सं। १। ३। वअस्स। २। ४। ५। ६। ८।
(२) णिव्वत्तेहि। १। ५। ६। ७। ८। ९। णिव्वहेहि। २। ३। ४।
(३) समुद्रवसना चोर्व्वी। १। २। ४। ५। धर्म्मेणोल्लिखिता लक्ष्मीः। ३।
(४) एतदनन्तरं। ३। पुस्तके

शकुन्तला। हला मरिसावेध लोअवालं जं अम्हेहिं उवआरातिक्कमेण विस्सद्धप्पलाविणीहिं भणिअं।

सख्यौ। जेण तं मन्तिअं सा मरिसावेउ अस्सस्स को अच्चओ।

शकुन्तला। अरिहइ क्खु महाराओ अजुत्तवअणाणि सोढुं परोक्खं को वा किं ण मन्तेइ।

राजा। सस्मितम्।

अपराधमिमं ततः सहिष्ये यदि रम्भोरु तवाङ्गसंगतोऽहम्।
कुसुमास्तरणे क्लमापहं मे सुजनत्वादनुमन्यसेऽवकाशम्॥

प्रियंवदा। णं एत्तिएण उण दे तुट्ठी भवे।

शकुन्तला। सरोषमिव। विरम दुल्ललिए एतदवत्थं पि मं कीळेसि।

अयमंशो दृश्यते।

उभे । णिव्वुद म्ह (क) ।

प्रियंवदा । सदृष्टिक्षेपम् । अणसूए जह एसो दूदो दिसादिट्ठी उस्सुओ मअपोअओ मादरं अणेसइ एहि संजोएम णं (ख) ।

उभे । प्रस्थिते ।

शकुन्तला । हला असरणा म्हि अण्णदरा वो आअच्छदु (ग) ।

उभे । पुहवीए जो सरणं सो तुह समीवे वट्टइ (घ) । निष्क्रान्ते ।

शकुन्तला । कहं गदाओ एव्व (ङ) ।

राजा । अलमावेगेन । नन्वयमाराधयिता जनस्तव समीपे वर्त्तते ।

किं शीतलैः क्लमविनोदिभिरार्द्रवातान्
सञ्चारयामि नलिनीदलतालवृन्तैः ।
अङ्के निधाय करभोरु यथासुखं ते
संवाहयामि चरणावुत पद्मताम्रौ (च) ॥

(क) निर्वृते स्वः ।

निर्वृते निश्चिन्ते ।

(ख) अनसूये यथा एषः दूतः दत्तदृष्टिः उत्सुकः मृगपोतकः मातरम् अन्विष्यति एहि संयोजयावः एनम् ।

(ग) हला अशरणा अस्मि अन्यतरा युवयोः आगच्छतु ।

अशरणा— अविद्यमानं शरणं सहायः यस्याः सा अशरणा असहाया एकाकिनीत्यर्थः ।

(घ) पृथिव्याः यः शरणं सः तव समीपे वर्त्तते ।

(ङ) कथं गते एव ।

(च) क्लमविनोदिभिः— क्लमं क्लान्तिं विनुदन्ति विशेषेणापनयन्ति तैः ।

शकुन्तला । ण माणणीएसु अत्ताणं अवराहइस्सं (क) ।
उत्थाय गन्तुमिच्छति ।

राजा । सुन्दरि अनिर्वाणो दिवसः (ख) । इयं च ते समवस्था ।

उत्सृज्य कुसुमशयनं नलिनीदलकल्पितस्तनावरणम् (१) ।
कथमातपे गमिष्यसि परिबाधापेलवैरङ्गैः (ग) ॥

बलादेनां निवर्त्तयति ।

शकुन्तला । पोरव रक्ख अविणअं मअणसन्तत्ता वि णहु अत्तणो पभवामि (घ) ।

आर्द्रवातान्— आर्द्रान् शीतलान् वातान् वायून् । नलिनीदलतालवृन्तैः— नलिनीदलानि कमलिनीपत्राण्येव तालवृन्तानि व्यजनानि तैः । करभोरु— मणिबन्धकनिष्ठयोर्मध्यवर्त्ती बाह्यः करांशः करभः स इव ऊरू यस्याः सा तत्सम्बोधनम् । वसन्ततिलका वृत्तम् ।

(क) न माननीयेषु आत्मानम् अपराधयिष्यामि ।

(ख) अनिर्वाणः अवसानमप्राप्तः अधुनापि उत्तापबहुल इत्यर्थः ।

(ग) नलिनीदलकल्पितस्तनावरणम्— नलिनीदलैः कल्पितं विरचितं स्तनयोः आवरणम् आच्छादनं यस्मिन् तत् तथोक्तम् कुसुमशयनस्य विशेषणमिदम् । परिबाधापेलवैः— परिबाधा गुरुक्लेशः तस्यां पेलवैः सुकुमारैः तत्सहनासमर्थैरित्यर्थः । आर्य्या जातिः ।

(घ) पौरव रक्ष अविनयम् । मदनसन्तप्ता अपि नहि आत्मनः प्रभवामि । रक्ष अविनयम्— अविनयम् अशालीनतां यथेष्टाचारमितियावत् रक्ष नियमय ।

---

(१) नलिनीदलकल्पितं स्तनावरणम् । १।२।४।६। नलिनीदलकल्पितस्तनावरणम् । ३।५।

राजा। भीरु अलं गुरुजनभयेन (१)। दृष्ट्वा (२) ते विदितधर्म्मा तत्रभवानत्र दोषं न ग्रहीष्यति (३) कुलपतिः (क)।
अपिच -

गान्धर्व्वेण विवाहेन बह्व्यो राजर्षिकन्यकाः (४)।
श्रूयन्ते परिणीतास्ताः पितृभिश्चाभिनन्दिताः (ख)॥

शकुन्तला। मुञ्च दाव मं। भूओ वि सहीजणं अणुमाणइस्सं (ग)।

राजा। भवतु मोक्ष्यामि।

शकुन्तला। कदा।

(क) दृष्ट्वा मया सह तव परिणयं ज्ञात्वा। विदितधर्म्मा— विदितः परिज्ञातः धर्म्मः श्रुतिस्मृतिविहित आचारः येन सः तथोक्तः।

(ख) गान्धर्व्वेण विवाहेन— अनुरक्तयोर्वरकन्ययोरन्योन्येच्छया निर्वृत्तो विवाहः गान्धर्व्वः। यथा मनुः

इच्छयान्योन्यसंयोगः कन्यायाश्च वरस्य च।
गान्धर्व्वः स तु विज्ञेयः ॥ ३ ॥ ३२ ॥

गन्धर्व्वाणामिव निर्वर्त्त्यते इति गान्धर्व्वः गन्धर्व्वाणां हि वरकन्ययोरन्योन्येच्छया विवाहो निर्व्वृत्ति। पथ्यावक्त्रं वृत्तम्।

(ग) मुञ्च तावत् माम्। भूयः अपि सखीजनम् अनुमानयिष्यामि। अनुमानयिष्यामि अनुयास्यामि तयोः सन्निहिता भविष्यामीत्यर्थः।

---

(१) अलं गुरुजनभयेन। १। ५।
भीरु अलं गुरुजनभयेन। २। ३। ४।
(२) दिष्ट्या। १। ५।
दृष्ट्वा। २। ४। ६।
दृष्ट्वा चैनं। ३।
(३) तत्रभवान् न तत्र दोषं ग्रहीष्यति। १। २। ५।
तत्रभवान् न दोषं ग्रहीष्यति। ३।
तत्रभवानत्र दोषं न ग्रहीष्यति। ४।
(४) राजर्षिकन्यकाः। १। २। ४। ५।
राजन्यकन्यकाः। ३।

राजा।

अपरिक्षतकोमलस्य यावत् (१)
कुसुमस्येव नवस्य षट्पदेन।
अधरस्य पिपासता मया ते
सदयं सुन्दरि गृह्यते रसोऽस्य (क)॥

मुखमस्याः समुन्नमयितुमिच्छति (२)।

शकुन्तला। परिहरति नाट्येन (३)।

(क) अपरिक्षतकोमलस्य— परिक्षतः दशनसन्दष्टः सः न भवतीत्यपरिक्षतः अनधिगतदशनक्षतव्रण इत्यर्थः स चासौ कोमलश्च तस्य अधरविशेषणमिदम्। यावत् यदा। नवस्य अचिरस्फुटितस्य। पिपासता पातुमिच्छता रसपानेन पिपासाम् अपनेतुम् अभिलषता इत्यर्थः। औपच्छन्दसिकं वृत्तम्।

---

(१) तावत्। १। २। ४। ५।
यावत्। ३। ६।

(२) समुन्नमयितुम्। १। २। ३। ५।
उन्नमयितुम्। ४।

(३) एतदनन्तरं। २। पुस्तके
राजा। कथं प्रकाशं गतोऽस्मि।
शकुन्तलां मुक्त्वा तेनैव पदेन पुनः प्रतिनिवर्त्तते।
शकुन्तला। पदान्तरे निवृत्य। पोरव अणिच्छापूरओ वि सम्भासणमेत्तपरिचिओ अअं जणो ण विसुमरिदव्वो।
राजा।
त्वं दूरमपि गच्छन्ती हृदयं न जहासि मे।
दिनावसाने छायेव तरोर्मूलं न मुञ्चति॥
शकुन्तला। आत्मगतम्। हद्धी हद्धी इमं सुणिअ ण चरणा पुरोमुहा पसरन्ति। भोदु। इमेहिं रत्तकुरुअएहिं ओवारिअसरीरा पेक्खिस्सं दाव से भावाणुबन्धं। तथा कृत्वा स्थिता।
राजा। प्रिये कथमनुरागैकरसं मामुपेक्ष्य निरपेक्षैव कामं गच्छसि।

नेपथ्ये

चक्कवाकवहुए आमन्तेहि सहअरं उवट्ठिआ रअणी (क)।

(क) चक्रवाकवधु आमन्त्रयस्व सहचरम् उपस्थिता रजनी।

अनिर्दयोपभोगस्य रूपस्य मृदुनः कथम्।
कठिनं खलु ते चेतः शिरीषस्येव बन्धनम्॥

शकुन्तला। एदं सुणिअ ण मे अत्थि विभवो गन्तुं।

राजा। सम्प्रति प्रियाशून्ये लतामण्डपे कथमस्मि। विचिन्त्य। अग्रतोऽवलोक्य। हन्त व्याहतं गमनम्।

मणिबन्धनतो गलितं संक्रान्तोशीरपरिमलं तस्याः।
हृदयस्य निगड़मिव मे मृणालवलयं स्थितं पुरतः॥

सादरमादत्ते।

शकुन्तला। हस्तं विलोक्य। अम्मो दोव्वल्लसिढ़िलताए परिब्भट्ठं मुणालवलअं ण विस्साअं।

राजा। मृणालवलयमुरसि निक्षिप्य।

अनेन लीलाभरणेन ते प्रिये विहाय कान्तं भुजमत्र तिष्ठता।
जनः समाश्वासित एष दुःखभागचेतनेनापि सता न तु त्वया॥

शकुन्तला। अदो अवरं असह म्हि विलम्बिउं। एदेण एव्व ववदेसेण अत्ताणअं दंसइस्सं।

उपसर्पति।

राजा। सहर्षम्। अये जीवितेश्वरी मे प्राप्ता। परिदेवनानन्तरं प्रसादेनोपकृतोऽस्मि दैवस्य।

पिपासाक्षामकण्ठेन याचितञ्चाम्बु पक्षिणा।
नवमेघोज्झिता चास्य धारा निपतिता मुखे॥

शकुन्तला। सम्मुखे स्थित्वा। अज्ज अद्धपदे सुमरिअ मुणालवलअस्स कारम्भस्सिणी कदे पड़िणिउत्त म्हि। कहिअं मे हिअएण तुए गहीअं त्ति। ता णिक्खिव एदं मा मं अत्ताणअं अ मुणिअणेसु पआसइस्ससि।

शकुन्तला । ससम्भ्रमम् । पोरव असंसअं मम सरीरवुत्तन्तो-वलम्भस्स अज्जा गोतमी इदो एव्व आअच्छइ । दाव विडवन्तरिओ होसु (क) ।

राजा । तथा ।

आत्मानमाहृत्य तिष्ठति ।

(क) पौरव असंशयं मम शरीरवृत्तान्तोपलम्भाय आर्य्या गौतमी इतः एव आगच्छति तावत् विटपान्तरितः भव ।

राजा । एकेनाभिसन्धिना प्रत्यर्पयामि । एहि अहमेव ते यथास्थानं निवेशयामि ।

शकुन्तला । स्वगतम् । हद्धी हद्धी का गई । प्रकाशम् । एव्वं करेसु ।

राजा । इतः शिलातलमेव संश्रयावः ।

उभौ । परिक्रम्योपविष्टौ ।

राजा । शकुन्तलाया हस्तमादाय । अहो स्पर्शः ।

हरकोपाग्निदग्धस्य दैवेनामृतवर्षिणा ।
प्ररोहः सम्भृतो भूयः किंस्वित् कामतरोरयम् ॥

शकुन्तला । तुवरेउ तुवरेउ अज्जउत्तो ।

राजा । सहर्षमात्मगतम् । इदानीमस्मि विश्वस्तः यतः भर्त्तुराभाषणपदमिदम् । प्रकाशम् । सुन्दरि नातिश्लिष्टः सन्धिरस्य तदन्यथा घटयितव्यः ।

शकुन्तला । जह दे रोअइ तह दंसेसु ।

राजा । सव्याजं विलम्ब्य । प्रतिमुच्य । सुन्दरि दृश्यताम्

अयं स ते श्यामलतामनोहरो विशेषशोभार्थमिवोज्झिताम्बरः ।
मृणालरूपेण नवो निशाकरः करं समेत्योभयकोटिमाश्रितः ॥

शकुन्तला । ण दाव पेक्खामि पवणप्पलोलिअकसुप्पलरेणुणा कलुसीकआ मे दिट्ठी ।

राजा । सस्मितम् । यदि मन्यसे अहमेनां वदनमारुतेन विशदां करिष्ये ।

ततः प्रविशति पात्रहस्ता गौतमी (१) सख्यौ च।

सख्यौ। इदो इदो अज्जा गोतमी (क)।

गौतमी। शकुन्तलामुपेत्य। जादे (२) अवि लहुसन्तावाइं दे अङ्गाइं (ख)।

(क) इतः इतः आर्य्या गौतमी।

(ख) जाते अपि लघुसन्तापानि ते अङ्गानि।

शकुन्तला। अणुकम्पिआ होमि णं उणा दे विस्ससामि।

राजा। मा मैवं नहि परिजना आदेशात् परमतिवर्त्तन्ते।

शकुन्तला। अअं एव्व पञ्जुवआरो अविस्साससज्जाओ।

राजा। स्वगतम्। नाहमेवं रमणीयमात्मनः सेवावकाशं शिथिलयिष्ये। सुखसुप्तमयितुं प्रवृत्तः।

शकुन्तला। अकामप्रतिबन्धं रूपयन्ती विरमति।

राजा। आत्मगतम्।

चारुणा स्फुरितेनायमपरिक्षतकोमलः।
पिपासतो ममानुज्ञां ददातीव प्रियाधरः।

शकुन्तला। पड्डिसाणमन्थरो विअ अज्जउत्तो।

राजा। कर्णोत्पलसन्निकर्षादीक्षणस्य साहस्यमूढोऽस्मि। सुखमारुतेन चक्षुः सेवते।

शकुन्तला। होउ पद्दिसदंसणा म्हि संवुत्ता। लज्जामि उणा अणुवआरिणी पिअआरिणो अज्जउत्तस्स।

राजा। सुन्दरि किमन्यत्

इदमप्युपकृतिपक्षे सुरभि मुखं ते मया यदाघ्रातम्।
ननु कमलस्य मधुकरः सन्तुष्यति गन्धमात्रेण॥

शकुन्तला। असन्तोसेण किं करइ।

राजा। इदमिदमिति व्यवसितो वक्त्रं ढौकयति। व्ययमंशो दृश्यते।

(१) गौतमी। १। २। ४। ५। तापसी। ३।

(२) जादे। १।२।४।५।६।७।८।९। अइ जादे। ३।

शकुन्तला। अत्थि मे विसेसो (क)।

गौतमी। इमिणा दब्भोदएण णिराबाधं एव्व दे सरीरं होहिदि। शिरसि शकुन्तलामभ्युक्ष्य। वच्छे परिणदो दिअहो एहि उडअं एव्व गच्छामो (ख)।

प्रस्थिताः।

शकुन्तला। आत्मगतम्। हिअअ पढमं एव्व सुहोवणए मणोरहे कादरभावं ण मुञ्चसि। साणुसअविहडिअस्स कहं दे संपदं सन्दावो (१)। पदान्तरे स्थित्वा। प्रकाशम्। लदावलअ सन्दावहारअ आमन्तेमि तुमं भूओ वि परिभोअस्स (ग)।

दुःखेन निष्क्रान्ता शकुन्तला सहेतराभिः।

राजा। पूर्व्वस्थानमुपेत्य। सनिश्वासम्। अहो विघ्नवत्यः प्रार्थितार्थसिद्धयः। मया हि

मुहुरङ्गुलिसंवृताधरोष्ठं
प्रतिषेधाक्षरविक्लवाभिरामम्।

(क) अस्ति मे विशेषः।

(ख) अनेन दर्भोदकेन निराबाधम् एव ते शरीरं भविष्यति। वत्से परिणतः दिवसः। एहि उटजम् एव गच्छामः।

(ग) हृदय प्रथमम् एव सुखोपनते मनोरथे कातरभावं न मुञ्चसि। सानुशयविघटितस्य कथं ते साम्प्रतं सन्तापः। लतावलय सन्तापहारक आमन्त्रये त्वां भूयः अपि परिभोगाय।

सुखोपनते मनोरथे— सुखेन अनायासेन उपनते उपस्थिते मनोरथे

---

(१) कहं दे समादं सन्दावो। १। २। कहं दे सन्दावो। ३। ४। ५। ६। ७। ८। ९।

मुखमंशविवर्त्ति पक्ष्मलाक्ष्याः
कथमप्युन्नमितं न चुम्बितं तत् (क)॥

क्व नु खलु संप्रति गच्छामि। अथवा इहैव प्रियापरिभुक्तमुक्ते लतावलये मुहूर्त्तं स्थास्यामि (ख)। सर्व्वतोऽवलोक्य।

तस्याः पुष्पमयी शरीरलुलिता शय्या शिलायामियं
क्लान्तो मन्मथलेख एष नलिनीपत्रे नखैरर्पितः।
हस्ताद्भ्रष्टमिदं बिसाभरणमित्यासज्यमानेक्षणो
निर्गन्तुं सहसा न वेतसगृहाच्छक्नोमि(१) शून्यादपि(ग)॥

मनोरथप्रार्थिते जने। सानुशयविघटितस्य— सानुशयं सानुतापं विघटितस्य प्रार्थितजनेन वियोजितस्य। लतावलय लतामण्डप।

(क) मुहुः वारं वारं अङ्गुलिभिः संवृतौ आच्छादितौ अधरोष्ठौ यस्मिन् तत् प्रतिषेधाक्षरेषु मा नहि अलम् इत्यादिषु निषेधवर्णेषु विक्लवम् आकुलम् प्रतिषेधाक्षराणि अस्फुटमुच्चारयदित्यर्थः तच्च तत् अभिरामं मनोहरञ्च तत् तथोक्तं प्रतिषेधाक्षरवैक्लव्यम् अभिरामत्वे हेतुः अंसे भुजशिरसि विवर्त्तते चुम्बनपरिहाराय परावर्त्तते तत् तथोक्तं पक्ष्मले सुपक्ष्मणी अक्षिणी यस्याः सा तादृश्याः प्रियायाः तत् मुखं कथमपि कष्टेण उन्नमितं न चुम्बितम्। औपच्छन्दसिकं वृत्तम्।

(ख) प्रियापरिभुक्तमुक्ते— प्रियया परिभुक्तं च तत् मुक्तञ्च तस्मिन्।

(ग) शरीरलुलिता— शरीरेण लुलिता परिमर्दिता। क्लान्तः म्लानः। नखैरर्पितः नखलिखितैरक्षरैर्विन्यस्तः। बिसाभरणं मृणालवलयम्। आसज्यमानेक्षणः— आसज्यमाने सम्बध्यमाने ईक्षणे चक्षुषी यस्य सः तथोक्तः आसज्यमान इति कर्म्मकर्त्तरि प्रयोगः। शार्दूलविक्रीड़ितं वृत्तम्।

---

(१) शक्नोमि।१।,३।४।५।६। शक्तोऽस्मि।२।

आकाशे

राजन्

सायन्तने सवनकर्म्मणि संप्रवृत्ते
वेदिं हुताशनवतीं (१) परितः प्रयस्ताः ।
छायाश्चरन्ति बहुधा भयमादधानाः
सन्ध्यापयोदकपिशाः पिशिताशनानाम् (क) ॥

राजा । अयमयमागच्छामि (२) ।

निष्क्रान्तः ।

तृतीयोऽङ्कः ।

(क) सायन्तने सायंकालीने सवनकर्म्मणि होमरूपे कार्य्ये संप्रवृत्ते यथाविधि-प्रारब्धे सति हुताशनवतीं प्रज्वलितहुताशनां वेदिं परितः प्रयस्ताः विक्षिप्ताः बहुधा बहुभिः प्रकारैः भयम् आदधानाः उत्पादयन्त्यः सन्ध्यापयोदवत् सन्ध्याकालीनजलधरपटलवत् कपिशाः पिङ्गलवर्णाः पिशितं मांसम् अशनम् आहारो येषां ते पिशिताशनाः राक्षसाः तेषां छायाः नभोवर्त्मना सञ्चरमाणानां तेषां प्रतिबिम्बानि चरन्ति उद्वेल्लन्ति । वसन्ततिलका वृत्तम् ।

---

(१) हुताशनवतीम् । १ । ३ । ४ । ५ ।
कुशासनवतीम् । २ ।

(२) अयमयमागच्छामि ।।।३।४।५।
अयमहमागच्छामि । २ ।

ततः प्रविशतः कुसुमावचयमभिनयन्त्यौ सख्यौ।

अनसूया। पिअंवदे (१) जइवि गन्धव्वेण विहिणा (२) णिव्वुत्तकल्लाणा सउन्तला अणुरूवभत्तुगामिणी संवुत्त त्ति णिव्वुअं मे हिअअं तहवि एत्तिअं चिन्तणीअं (क)।

प्रियंवदा। कहंविअ (ख)।

अनसूया। अज्ज सो राएसी इट्ठिं परिसमाविअ इसीहिं विसज्जिओ अत्तणो णअरं पविसिअ अन्तेउरसमागओ इदोगअं वुत्तन्तं सुमरइ वा ण व त्ति (ग)।

(क) प्रियंवदे यद्यपि गान्धर्व्वेण विधिना निर्वृत्तकल्याणा शकुन्तला अनुरूपभर्तृगामिनी संवृत्ता इति निर्वृतं मे हृदयं तथापि एतावत् चिन्तनीयम्।

निर्वृत्तकल्याणा— निर्वृत्तं सम्पन्नं कल्याणं विवाहमङ्गलं यस्याः सा तथोक्ता। अनुरूपभर्तृगामिनी— अनुरूपं स्वयोग्यं भर्त्तारं पतिं गच्छति प्राप्नोतीति सा तथोक्ता। निर्वृतं सुखितम्।

(ख) कथमिव।

(ग) अद्य स राजर्षिः इष्टिं परिसमाप्य ऋषिभिः विसृष्टः आत्मनः नगरं प्रविश्य अन्तःपुरसमागतः इतोगतं वृत्तान्तं स्मरति वा नवा इति।

इष्टिं यागम्। विसृष्टः राजधानीं प्रस्थापितः। अन्तःपुरसमागतः अवरोधवधूभिर्मिलितः। इतोगतं वृत्तान्तम्—" इतोगतम् अत्रत्यं वृत्तान्तं शकुन्तलापरिणयरूपं व्यापारम्।

---

(१) हला पिअंवदे।१।२।३।४ ५।६। २।४।५।७।८।६।
पिअंवदे।६।७।८। गन्धव्वेण विहिणा।३।६।
(२) गन्धव्वेण विवाहविहिणा।१।

प्रियंवदा । वीसद्धा होसु । ण तारिसा आकिदिविसेसा गुणविरोहिणो होन्ति । तादो दाणिं इदं वुत्तन्तं सुणिअ ण आणे किं पड़िवज्जिस्सदि त्ति (क) ।

अनसूया । जह अहं देक्खामि तह तस्स अणुमअं होउ (ख) ।

प्रियंवदा । कहंविअ (ग) ।

अनसूया । गुणवन्तस्स कणआ पड़िवादणीअ त्ति अअं दाव पढ़मो संकप्पो । तं जइ देव्वं एव्व संपादेइ णं अप्पआसेण कअत्थो गुरुअणो (घ) ।

(क) विस्रब्धा भव । न तादृशाः आकृतिविशेषाः गुणविरोधिनः भवन्ति । तातः इदानीम् इमं वृत्तान्तं श्रुत्वा न जाने किं प्रतिपत्स्यते इति ।

तादृशाः निरतिशयमधुराः आकृतिविशेषाः मूर्त्तिविशेषाः गुणविरोधिनः गुणविसम्वादिनः गुणविरहिता इति यावत् न भवन्ति यत्राकृतिस्तत्र गुणा वसन्तीति जनवादो नोन्मत्तप्रलाप इत्यर्थः । किं प्रतिपत्स्यते किं करिष्यति ।

(ख) यथा अहं पश्यामि तथा तस्य अनुमतं भवेत् ।

पश्यामि जानामि । अनुमतम् अभिमतम् ।

(ग) कथमिव ।

(घ) गुणवते कन्यका प्रतिपादनीया इति अयं तावत् प्रथमः सङ्कल्पः । तं यदि दैवम् एव सम्पादयति ननु अप्रयासेन कृतार्थः गुरुजनः ।

गुणवते कुलशीलादिसम्पन्नाय पात्राय । प्रतिपादनीया प्रदेया । प्रथमः सङ्कल्पः मुख्योऽभिलाषः तादृशी प्रतिज्ञा वा । अप्रयासेन— प्रयासस्य प्रयत्नस्य अभावः अप्रयासं तेन विना अप्रयासमित्यर्थः ।

प्रियंवदा। पुष्पभाजनं (क) विलोक्य। सहि अवचिआइं बलि-कम्मपज्जत्ताइं कुसुमाइं (ख)।

अनसूया। णं पिअसहीए सउन्तलाए सोहग्गदेवता अच्चणीआ (ग)।

प्रियंवदा। जुज्जइ (घ)।

तदेव कर्म्मारभेते (ङ)।

नेपथ्ये

अयमहं भोः।

अनसूया। कर्णं दत्त्वा। सहि अतिहीणं विअ णिवेदिअं (च)।

प्रियंवदा। णं उडअसण्णिहिआ सउन्तला। आत्मगतम्। अज्ज उण हिअएण असण्णिहिआ (छ)।

(क) पुष्पभाजनम्— पुष्पाणां भाजनं पात्रं पुष्पाण्यवचित्य यस्मिन् पात्रे स्थाप्यन्ते तत्।

(ख) सखि अवचितानि बलिकर्म्मपर्य्याप्तानि कुसुमानि।

बलिकर्म्मपर्य्याप्तानि पूजाकर्म्मनिर्व्वाहोपयोगीनि।

(ग) ननु प्रियसख्याः शकुन्तलायाः सौभाग्यदेवताः अर्च्चनीयाः।

सौभाग्यदेवताः— सौभाग्यस्य पतिप्रेमास्पदत्वरूपस्य भाग्यवत्त्वस्य देवताः या अर्च्चिताः स्त्रीणां पतिप्रेमास्पदत्वं निष्पादयन्ति ताहश्यो देवता इत्यर्थः।

(घ) युज्यते।

(ङ) तदेव कर्म्म शकुन्तलायाः सौभाग्यदेवतार्च्चनोपयोगिनां कुसुमानाम् अवचयलक्षणं व्यापारम्।

(च) सखि अतिथीनाम् इव निवेदितम्।

निवेदितं निवेदनं स्वोपस्थितिज्ञापनमितियावत्।

(छ) ननु उटजसन्निहिता शकुन्तला। अद्य पुनः हृदयेन असन्निहिता।

उटजसन्निहिता उटजवर्त्तिनी अतः सैव अतिथिसत्कारं सम्पादयिष्यतीत्यर्थः। अद्य पुनर्हृदयेनासन्निहिता— अद्य पुनः अद्य तु हृदयेन चित्तेन

अनसूया । होउ । अलं एत्तिएहिं कुसुमेहिं (क) ।

प्रस्थिते ।

नेपथ्ये

आः अतिथिपरिभाविनि (ख)

विचिन्तयन्ती यमनन्यमानसा
तपोधनं वेत्सि न मामुपस्थितम् ।
स्मरिष्यति त्वां न स बोधितोऽपि सन्
कथां प्रमत्तः प्रथमं कृतामिव (ग) ॥

प्रियंवदा । हद्धी हद्धी अप्पिअं एव्व संवुत्तं । कस्सिं वि पूआरिहे अवरद्धा सुण्णहिअआ सउन्तला । पुरोऽवलोक्य । ण क्खु जस्सिं कस्सिं वि । एसो दुव्वासो सुलहकोवो महेसी । तह सविअ वेअवलोप्फुल्लाए दुव्वाराए गईए पड़िणिउत्तो । को अस्सो हुअवहादो दहिदुं पभविस्सदि (घ) ।

असन्निहिता दूरवर्त्तिनी दुष्यन्तस्य राजधानीप्रस्थानात् शकुन्तला शरीरमात्रेण उटजे तिष्ठति तदीयं हृदयन्तु दुष्यन्तमनुजगाम अतः शून्यहृदया सा अतिथिसत्कारं सम्पादयितुं शक्नुयान्नेति संशयः ।

(क) भवतु । अलम् एतावद्भिः कुसुमैः ।

अलमेतावद्भिः कुसुमैः— अवचितान्येव कुसुमानि पर्याप्तानि भविष्यन्ति अधिकतरपुष्पावचयनेच्छया कालहरणेनालम् एहि सत्वरमुटजमेव गच्छाव इत्यर्थः ।

(ख) अतिथिपरिभाविनि— अतिथिं परिभवति अवमन्यते इति सा तथोक्ता तत्सम्बोधनम् ।

(ग) बोधितः पूर्ब्बवृत्तान्तं स्मारितः । प्रमत्तः प्रकर्षेण मत्तः सुरापानादिना नितरां विचेतन इति यावत् । वंशस्थविलं वृत्तम् ।

(घ) हाधिक् हाधिक् अप्रियम् एव संवृत्तम् । कस्मिन् अपि पूजार्हे अपराद्धा शून्यहृदया शकुन्तला । नहि यस्मिन् कस्मिन् अपि । एषः

अनसूया । गच्छ (१) पाएसु पणमिअ णिवत्तेसु णं जाव अहं अग्घोदअं उवकप्पेमि (क) ।

प्रियंवदा । तह (ख) ।

निष्क्रान्ता ।

अनसूया । पदान्तरे स्खलितं निरूप्य । अम्मो आवेअक्खलिआए गईए पब्भट्टं मे अग्गहत्यादो (२) पुप्फभाअणं (ग) ।

पुष्पोच्चयं रूपयति (घ) ।

दुर्व्वासाः सुलभकोपः महर्षिः । तथा यस्मा वेगबलोत्फुल्लया दुर्व्वारया गत्या प्रतिनिवृत्तः । कः अन्यः हुतवहात् दग्धुं प्रभविष्यति ।

शून्यहृदया— शून्यम् एकस्मिन् विषये अत्यन्तासक्ततया विषयान्तरेभ्यो व्यावृत्तं हृदयं यस्याः सा तथोक्ता । सुलभकोपः— सुलभः अनायासलभ्यः स्वल्पेनैव निमित्तेन उत्पादनीय इतियावत् कोपः क्रोधः यस्य स तथोक्तः । वेगबलोत्फुल्लया— वेगस्य रंहसः बलेन आतिशय्येन उत्फुल्लया उद्धतया । दुर्व्वारया निवारयितुमशक्यया ।

(क) गच्छ पादयोः प्रणम्य निवर्त्तय एनम् यावत् अहम् अर्घ्योदकम् उपकल्पयामि ।

(ख) तथा ।

(ग) अम्मो आवेगस्खलितया गत्या प्रभ्रष्टं मे अग्रहस्तात् पुष्पभाजनम् ।

(घ) पुष्पाणां गतिस्खलनेन भूमौ पतितानाम् उच्चयं भूतलादुद्धरणं रूपयति अभिनयति ।

---

(१) पिअंवदे गच्छ गच्छ । १ । गच्छ । २ । ३ । ५ । ६ । ७ । ८ । गच्छ गच्छ । ४ ।

(२) अग्गहत्थादो । १ । २ । ३ । ४ । ५ । ६ । ७ । ८ । हत्थादो । ९ ।

प्रविश्य

प्रियंवदा । सहि पइडूवको सो कस्स अणुणअं पडिगेण्हदि । किंवि उण साणुक्कोसो कओ (क) ।

अनसूया । सस्मितम् । तस्सिं बहु एदं वि । कहेसु (ख) ।

प्रियंवदा । जदा णिवत्तिदुं ण इच्छदि तदा विसविओ मए भअवं पढमं त्ति पेक्खिअ अविणादतवप्पहावस्स दुहिदुजणस्स भअवदा एक्को अवराहो मरिसिअव्वो त्ति (ग) ।

अनसूया । तदो तदो (घ) ।

प्रियंवदा । तदो मे वअणं अण्णहा भविदुं ण अरिहदि किन्तु अहिणाणाभरणदंसणेण सावो णिवत्तिस्सदि त्ति मन्तअन्तो सअं अन्तरिहिओ (ङ) ।

(क) सखि प्रकृतिवक्रः सः कस्य अनुनयं प्रतिगृह्णाति । किमपि पुनः सानुक्रोशः कृतः ।

प्रकृतिवक्रः— प्रकृत्या स्वभावेन वक्रः कुटिलः । किमपि किञ्चित् । सानुक्रोशः— अनुक्रोशः दया तेन सह सानुक्रोशः उदितदयः ।

(ख) तस्मिन् बहु एतत् अपि । कथय ।

तस्मिन् दुर्व्वासमि ।

(ग) यदा निवर्त्तितुं न इच्छति तदा विज्ञापितः मया भगवन् प्रथमम् इति प्रेक्ष्य अविज्ञाततपःप्रभावस्य दुहितृजनस्य भगवता एकः अपराधः मर्षयितव्यः इति ।

प्रथममिति प्रेक्ष्य प्रथममनया अपराद्धमिति आलोच्य । अविज्ञाततपःप्रभावस्य— अविज्ञातः अविदितः तपसः भवदीयस्य तपश्चरणस्य प्रभावः महिमा येन सः तस्य ।

(घ) ततः ततः ।

(ङ) ततः मम वचनम् अन्यथा भवितुं न अर्हति किन्तु अभिज्ञानाभरणदर्शनेन शापः निवर्त्तिष्यते इति मन्त्रयमाणः स्वयम् अन्तर्हितः ।

अनसूया । सक्कं दाणिं अस्ससिउं (१) । अत्थि तेण राएसिणा संपत्थिएण सणामहेअङ्किअं अङ्गुलीअअं सुमरणीअं त्ति सअं पिणद्धं तस्सिं साहीणोवाआ सउन्तला होहिदि (क) ।

प्रियंवदा । सहि एहि देअकज्जं दाव णिव्वत्तेम्ह (ख) ।

परिक्रामतः ।

प्रियंवदा । अवलोक्य । अणसूए पेक्ख दाव वामहत्थोवहिअवअणा आलिहिआ विअ पिअसही भत्तुगताए चिन्ताए अत्ताणं वि ण एसा विभावेदि किं उण आअन्तुअं (ग) ।

अभिज्ञानाभरणदर्शनेन— अभिज्ञायते स्मर्यते अनेनेति अभिज्ञानं कारणान्तरेण तिरोहितायाः स्मृतेः प्रत्युपस्थितिकारकं तच्च तत् आभरणञ्चेति अभिज्ञानाभरणम् तस्य दर्शनेन तस्मिन् दर्शिते इत्यर्थः ।

(क) शक्यम् इदानीम् आश्वसितुम् । अस्ति तेन राजर्षिणा सम्प्रस्थितेन स्वनामधेयाङ्कितम् अङ्गुरीयकं स्मरणीयम् इति स्वयं पिनद्धम् तस्मिन् स्वाधीनोपाया शकुन्तला भविष्यति ।

स्मरणीयमिति स्वयं पिनद्धम्— त्वया स्मरणीयम् अयं जनः स्मर्त्तव्य इति उक्त्वा स्वयं स्वहस्तेन पिनद्धं शकुन्तलाया अङ्गुल्यां परिधापितम् । स्वाधीनोपाया— स्वाधीनः स्ववशः स्वकरस्थित इतियावत् उपायः प्रतिविधानं यस्याः सा तथोक्ता ।

(ख) सखि एहि देवकार्य्यं तावत् निर्वर्त्तयावः ।

(ग) अनसूये प्रेक्षस्व तावत् वामहस्तोपहितवदना आलिखिता इव प्रियसखी भर्तृगतया चिन्तया आत्मानम् अपि न एषा विभावयति किं पुनः आगन्तुकम् ।

वामहस्तोपहितवदना— वामे हस्ते उपहितं विन्यस्तं वदनं मुखं यया सा तथोक्ता । आलिखिता चित्रार्पिता । आगन्तुकम् अतिथिम् ।

---

(१) समस्सिदुं ।१।२।४।५।७।८।९। अस्सासिदुं ।३।६।

अनसूया । पिअंवदे दुवेणं एव्व णो मुहे एसो वुत्तन्तो चिट्ठउ । रक्खिअव्वा क्खु पदूदूपेलवा पिअसही (क) ।

प्रियंवदा । को दाणिं उण्होदएण णोमालिअं सिञ्चइ (ख) ।

उभे । निष्क्रान्ते ।

विष्कम्भकः ।

(क) प्रियंवदे द्वयोः एव आवयोः मुखे एषः वृत्तान्तः तिष्ठतु । रक्षितव्या खलु प्रकृतिपेलवा प्रियसखी ।

प्रकृतिपेलवा— प्रकृत्या स्वभावेन पेलवा सुकुमारी ।

(ख) कः इदानीम् उष्णोदकेन नवमालिकां सिञ्चति ।

ततः प्रविशति सुप्तोत्थितः (क) शिष्यः ।

शिष्यः । वेलोपलक्षणार्थमादिष्टोऽस्मि तत्रभवता प्रवासादुपावृत्तेन (१) काश्यपेन । प्रकाशं निर्गतस्तावदवलोकयामि कियदवशिष्टं रजन्या इति (ख) । परिक्रम्यावलोक्य च । हन्त प्रभातम् । तथाहि

यात्येकतोऽस्तशिखरं पतिरोषधीना-
माविष्कृतोऽरुणपुरःसर (२) एकतोऽर्कः ।
तेजोद्वयस्य युगपद्व्यसनोदयाभ्यां
लोको नियम्यत इवात्मदशान्तरेषु (ग) ॥

(क) सुप्तोत्थितः— पूर्व्वं सुप्तः पश्चात् उत्थितः अचिरेण वीतनिद्र इत्यर्थः ।

(ख) वेलोपलक्षणार्थं समयपरिज्ञानाय । उपावृत्तेन प्रत्यागतेन । प्रकाशं निर्गतः अनावृतं प्रदेशं गतः ।

(ग) एकतः एकस्यां दिशि पश्चिमायामिति यावत् ओषधीनां फलपाकविनाशिनां व्रीहियवगोधूमकलायप्रभृतीनाम् उद्भिज्जानां पतिः पुष्टिकारकः चन्द्रः अस्तशिखरम् अस्ताचलचूड़ाम् याति अवलम्बते अस्तं गच्छतीत्यर्थः एकतः एकस्यां दिशि पूर्व्वस्यामिति यावत् अरुणः गरुड़ाग्रजः पुरःसरः पुरोगामी यस्य सः तथोक्तः अर्कः सूर्य्यः आविष्कृतः आविर्भूतः इत्थं तेजोद्वयस्य तेजोमयस्य पदार्थद्वयस्य युगपत् समकालं व्यसनोदयाभ्यां विपत्सम्पद्रूपाभ्यां तिरोभावाविर्भावाभ्यां कर्त्तृभ्यां लोकः जनः आत्मनः स्वस्य दशान्तरेषु अवस्थाभेदेषु नियम्यते विपत्सम्पदौ न चिरस्थायिन्याविति उपदिश्यत इव । वसन्ततिलका वृत्तम् ।

---

(१) उपावृत्तेन । १ । २ । ४ । ५ ।
उपनिवृत्तेन । ३ ।

(२) आविष्कृतारुणपुरःसरः ।१।२।५।
आविष्कृतोऽरुणपुरःसरः ।३।४।६।

अपिच

अन्तर्हिते शशिनि सैव कुमुद्वती मे
दृष्टिं न नन्दयति संस्मरणीयशोभा ।
इष्टप्रवासजनितान्यबलाजनस्य
दुःखानि नूनमतिमात्रसुदुःसहानि (क) ॥

प्रविश्यापटीक्षेपेण (१) (ख)

अनसूया। जइवि (२) णाम विसअपरम्मुहस्स जणस्स एदं ण विदिअं तहवि तेण रण्णा सउन्तलाए अणज्जं आचरिअं (ग)।

(क) सैव— या समुदिते शशिनि स्वकुसुमविकासेन नयनयोर्निरतिशयमानन्दयित्री बभूवेत्यर्थः। संस्मरणीयशोभा— संस्मरणीया अधुना म्लानतया संस्मरणमात्रेणानुभवनीया शोभा पूर्व्वतनी कान्तिर्यस्याः सा तथोक्ता। इष्टप्रवासजनितानि— इष्टस्य प्रियस्य प्रवासः कार्य्यवशात् देशान्तरस्थितिः तेन जनितानि उत्पादितानि। वसन्ततिलका वृत्तम्।

(ख) अपटीक्षेपेण— अपटी तिरस्करिणी तस्याः क्षेपः अपसारणं तेन नेपथ्यद्वारलम्बिनीं तिरस्करिणीमपसार्य्येत्यर्थः।

(ग) यद्यपि नाम विषयपराङ्मुखस्य जनस्य एतत् न विदितं तथापि तेन राज्ञा शकुन्तलायाम् अनार्य्यम् आचरितम्।

विषयपराङ्मुखस्य विषयेषु वीतरागस्य जनस्य लोकस्य वीतरागाणां वनवासिनामित्यर्थः एतत् न विदितं संसारिणां कीदृशम् आचरणम् आर्य्यं कीदृशं वा अनार्य्यमिति यद्यपि तैर्न ज्ञायते तथापि तेन राज्ञा शकुन्तलायाम् अनार्य्यमाचरितम् वनवासिनां तादृशार्य्यानार्य्याचरणविवेकविधुरत्वे सत्यपि शकुन्तलायां दुष्यन्तस्याचरणम् अनार्य्यमेवेति अनपलपनीयमित्यर्थः।

---

(१) पटाक्षेपेण। १। २। ३। अपटीक्षेपेण। ४। ६।

(२) जइवि। १। २। ४। ५। ६। एव्वंवि। ३। ७। ८। ९।

शिष्यः । यावदुपस्थितां होमवेलां गुरवे निवेदयामि ।
निष्क्रान्तः ।

अनसूया । पडिवुड्ढा वि किं करिस्सिं । ण मे उद्दूतेसु वि णिअकरणिज्जेसु (१) हत्थपाआ पसरन्ति । कामो दाणिं सकामो होउ जेण असच्चसन्धे जणे सुद्धहिअआ (२) सही पदं कारिआ । अहवा दुव्वाससो सावो एसो (३) विआरेदि । अण्णहा कहं सो राएसी तारिसाणि मन्तिअ एत्तिअस्स (४) कालस्स लेहमेत्तं वि ण विसज्जदि । ता इदो (५) अहिण्णाणं अङ्गुलीअअं से विसज्जामो । दुक्खसीले (६) तवस्सिजणे को अब्भत्थीअउ । णं सहीगामी दोसो त्ति ववसिआ वि ण पारेमि पवासपडिणिउत्तस्स तातकस्सवस्स दुस्सन्तपरिणीतं आवण्णसत्तं सउन्तलं णिवेदेउं । इत्थंगए अम्हेहिं किं करणीअं (क) ।

(क) प्रतिबुद्धा अपि किं करिष्यामि । न मे उचितेषु अपि निजकरणीयेषु हस्तपादं प्रसरति । कामः इदानीं सकामः भवतु येन असत्यसन्धे जने शुद्धहृदया सखी पदं कारिता । अथवा दुर्वाससः शापः एषः विकारयति । अन्यथा कथं सः राजर्षिः तादृशानि मन्त्रयित्वा एतावन्तं कालं लेखमात्रम् अपि न विसृजति । तत् इतः अभिज्ञानम् अङ्गुरीयकं तस्मै विसृजामः । दुःखशीले तपस्विजने कः अभ्यर्थ्यताम् । ननु सखीगामी दोषः इति

---

(१) णिअकरणिज्जेसु । १ । २ । ४ । । ५ । ६ । ७ । ८ । ९ ।
कज्जेसु । ३ ।

(२) सुसहिअआ ।१।३।४।५।६।७।८।९।
सुद्धहिअआ । २ ।

(३) दुव्वाससो कोवो एसो ।१।२।६।
दुव्वाससो एसो । ३ ।
दुव्वाससो सावो एसो । ४ । ५ । । ७ । ८ । ९ ।

(४) एत्तिअस्स वि । १ ।
एत्तिअस्स ।२।३।४।५।६।८।९।

(५) ता इदो ।१।२।३।४।५।६।
ता । ७ । ८ । ९ ।

(६) दुस्सीले । १ । ८ ।
दुक्खसीले ।२।३।४।५।६।७।९।

प्रविश्य

प्रियंवदा । सहर्षम् । सहि तुवरसु तुवरसु सउन्तलाए पत्थाणकोतुअं णिव्वत्तेउं (क) ।

अनसूया । सहि कहं एदं (ख) ।

व्यवसिता अपि न पारयामि प्रवासप्रतिनिवृत्ताय तातकाश्यपाय दुष्मन्तपरिणीताम् आपन्नसत्त्वां शकुन्तलां निवेदयितुम् । इत्यङ्गते अस्माभिः किं करणीयम् ।

प्रतिबुद्धा जागरिता । उचितेषु अभ्यस्तेषु अनुदिनमनुष्ठीयमानेषु इत्यर्थः । सकामः— कामेन अभिलाषेण सह सकामः पूर्णाभिलाषः कामो हि यूनो युवतीश्च वञ्चयित्वा चरितार्थम्मन्यो भवतीति भावः । असत्यसन्धे— असत्या वितथा सन्धा प्रतिज्ञा यस्य सः तस्मिन् प्रस्थानकाले न भवतीं विस्मरिष्यामि राजधानीं प्रतिनिवृत्त्यैव भवत्या नयनार्थं निदेशकारिणः प्रेषयिष्यामीति कृतां प्रतिज्ञाम् अप्रतिपालयतीत्यर्थः । शुद्धहृदया— शुद्धं, कपटकौटिल्यादिभिरस्पृष्टं हृदयं यस्याः सा तथोक्ता नितान्तं सरलहृदया इत्यर्थः । पदं कारिता—, पदम् अवलम्बं कारिता विश्वासमापादिता इत्यर्थः । विकारयति अन्यथाकारयति दुष्मन्तेन शकुन्तलाया विस्मरणं घटयतीत्यर्थः । दुःखशीले तपस्विजने कोऽभ्यर्थ्यताम्— दुःखशीले तपःक्लेशकारिणि अनन्यकार्य्यतया तपश्चरणनिरते इत्यर्थः तपस्विजने तपस्विषु कः अभ्यर्थ्यताम् अङ्गुरीयस्य दुष्मन्तसमीपनयनार्थं प्रार्थ्यतां तपश्चरणमुत्सृज्य न कोऽपि मत्कृतामिमां प्रार्थनां पूरयिष्यति अतस्तत्प्रयासो विफल एवेति भावः । सखीगामी शकुन्तलागतः । व्यवसिता उद्युक्ता । आपन्नसत्त्वाम्— आपन्नं प्राप्तं सत्त्वं प्राणी यया सा तथोक्ता सञ्जातगर्भा इत्यर्थः । इत्यङ्गते एवं स्थिते ।

(क) सखि त्वरस्व त्वरस्व शकुन्तलायाः प्रस्थानकौतुकं निर्वर्त्तयितुम् ।

प्रस्थानकौतुकं प्रस्थानकाले कर्त्तुमुचितं मङ्गलाचारम् । निर्वर्त्तयितुं सम्पादयितुम् ।

(ख) सखि कथम् एतत् ।

प्रियंवदा। सुणसु दाणिं सुहसइअपुच्छिआ सउन्तला-सआसं गअ म्हि (क)।

अनसूया। तदो तदो (ख)।

प्रियंवदा। दाव(१) एदं लज्जावणअमुहिं परिस्सजिअ सअं तातकस्सवेण एव्वं अहिणन्दिअं दिट्ठिआ धूमाउलिअदिट्ठिणो वि जजमाणस्स पावए एव्व आहुई पडिआ। वच्छे सुसिस्सपरिदिण्णा विअ विज्जा (२) असोअणिज्जा संवुत्ता। अज्ज एव्व इसिपडिरक्खिअं तुमं भत्तुणो सआसं विसज्जामि त्ति (ग)।

(क) शृणु इदानीम् सुखशयितप्रच्छिका शकुन्तलासकाशं गता अस्मि। सुखशयितप्रच्छिका— सुखशयितं सुखनिद्रा तत् पृच्छतीति तथोक्ता रात्रौ सुखेन निद्रां गतासि न वेत्यनुसन्धायिनी।

(ख) ततः ततः।

(ग) तावत् एनां लज्जावनतमुखीं परिष्वज्य स्वयं तातकाश्यपेन एवम् अभिनन्दितम् दिष्ट्या धूमाकुलितदृष्टेः अपि यजमानस्य पावके एव आहुतिः पतिता। वत्से सुशिष्यपरिदत्ता इव विद्या अशोचनीया संवृत्ता। अद्य एव ऋषिपरिरक्षितां त्वां भर्त्तुः सकाशे विसृजामि इति।

सुशिष्यपरिदत्ता इव विद्या— सुशिष्याय अध्यापनयोग्याय शिष्याय परिदत्ता प्रतिपादिता विद्या वेदज्ञानम् इव। अत्र मनुः

विद्ययैव समं कामं मर्त्तव्यं ब्रह्मवादिना।
आपद्यपि हि घोरायां नत्वेनामिरिणे वपेत्॥ २॥ ११३॥
विद्या ब्राह्मणमेत्याह सेवधिस्तेऽस्मि रक्ष माम्।
असूयकाय मां मादास्तथा स्यां वीर्य्यवत्तमा॥ २। ११४॥
यमेव तु शुचिं विद्या नियतब्रह्मचारिणम्।
तस्मै मां वद विप्राय निधिपायाप्रमादिने॥ २। ११५॥

(१) दाव। १। ४। ५। ७। ८। ९। जाव। २। ३। ६।

(२) विअ विज्जा। १। २। ४। ५। विज्जा विअ। ३। ६। ७। ९।

अनसूया। अह केण सूइदो तातकस्सवस्स वुत्तन्तो (क)।

प्रियंवदा। अग्गिसरणं पविट्ठस्स सरीरं विणा छन्दोमईए वाणिआए (१) (ख)।

अनसूया। सविस्मयम्। कहेसु (ग)।

प्रियंवदा। संस्कृतमाश्रित्य।

दुष्यन्तेनाहितं तेजो दधानां भूतये भुवः।
अवेहि तनयां ब्रह्मन्नग्निगर्भां शमीमिव॥

अनसूया। प्रियंवदामाश्लिष्य। सहि पिअं मे। किन्तु अज्ज एव्व सउन्तला णीअदि त्ति उक्कण्ठासाहारणं परितोसं अणुभवामि (घ)।

प्रियंवदा। सहि वअं दाव उक्कण्ठं विणोदेस्सामो सा तवस्सिणी णिव्वुआ होउ (ङ)।

(क) अथ केन सूचितः तातकाश्यपस्य वृत्तान्तः।

सूचितः कथितः।

(ख) अग्निशरणं प्रविष्टस्य शरीरं विना छन्दोमय्या वाण्या।

अग्निशरणम् अग्निहोत्रगृहम्। शरीरं विना अशरीरिण्या।

(ग) कथय।

(घ) सखि प्रियं मे। किन्तु अद्य एव शकुन्तला नीयते इति उत्कण्ठासाधारणं परितोषम् अनुभवामि।

उत्कण्ठासाधारणं परितोषमनुभवामि— उत्कण्ठया साधारणं तुल्यं यथा तथा परितोषम् अनुभवामि युगपदेव उत्कण्ठां परितोषञ्च अनुभवामीत्यर्थः।

(ङ) सखि आवां तावत् उत्कण्ठां विनोदयिष्यावः सा तपस्विनी निर्वृता भवतु।

तपस्विनी दीना। निर्वृता सुखिता।

---

(१) वाआए। १।२।४।५। वाणिआए। ३।६।७।८।

अनसूया । तेण हि एदस्सिं चूअसाहावलम्बिए णारिएर-समुग्गए एतण्णिमित्तं एव्व कालन्तरक्खमा णिक्खित्ता मए केसरमालिआ । ता इमं हत्थसण्णिहिदं करेहि । जाव अहं वि से मअलोअणं तित्थमित्तिअं दुव्वाकिसलआणि त्ति मङ्गल-समालम्भणाणि विरएमि (क) ।

प्रियंवदा । तह करीअदु (ख) ।

अनसूया । निष्क्रान्ता ।

प्रियंवदा । नाट्येन सुमनसो गृह्णाति ।

नेपथ्ये

गौतमि आदिश्यन्तां शार्ङ्गरवमिश्राः शकुन्तलानयनाय (ग) ।

(क) तेन हि एतस्मिन् चूतशाखावलम्बिते नारिकेरसमुद्गके एतन्निमित्तम् एव कालान्तरक्षमा निक्षिप्ता मया केशरमालिका । तत् इमां हस्तसन्निहितां कुरु । यावत् अहम् अपि तस्याः मृगरोचनां तीर्थमृत्तिकां दूर्व्वाकिसलयानि इति मङ्गलसमालम्भनानि विरचयामि ।

नारिकेरसमुद्गके— नारिकेरनिर्म्मितः समुद्गकः सम्पुटकः तस्मिन् । एतन्निमित्तम् शकुन्तलायाः पतिगृहप्रस्थानकाले मङ्गलानुष्ठानार्थम् । कालान्तरक्षमा कालान्तरसहा कालात्ययेऽपि म्लानिमनाप्नुवतीत्यर्थः । केशर-मालिका वकुलपुष्पमयी माला । हस्तसन्निहितां हस्तवर्त्तिनीम् । तस्यै तदर्थं शकुन्तलार्थमित्यर्थः । मृगरोचना गोरोचना । मङ्गलसमालम्भ-नानि मङ्गलार्थानि अनुलेपनानि ।

(ख) तथा क्रियताम् ।

(ग) शार्ङ्गरवमिश्राः— शार्ङ्गरवः मिश्रः प्रधानं येषां ते तथोक्ताः शार्ङ्गरव-प्रभृतयो मुनय इत्यर्थः । शकुन्तलानयनाय शकुन्तलां पतिगृहं नेतुम् ।

प्रियंवदा । कर्णं दत्त्वा । अणसूए तुवरसु तुवरसु एदे (१) हत्थिणाउरगामिणो इसीओ सद्दावीअन्ति (क) ।

प्रविश्य समालम्भनहस्ता

अनसूया । सहि एसु गच्छम्ह (ख) ।

परिक्रामतः ।

प्रियंवदा । विलोक्य । एसा सुज्जोदए एव्व सिहामज्जिआ पड़िच्छिअणीवारहत्थाहिं सोत्थिवाअणिआहिं तावसीहिं अहिणन्दीअमाणा सउन्तला चिट्ठइ । उवसप्पामो णं (ग) ।

उपसर्पतः ।

(क) अनसूये त्वरस्व त्वरस्व एते हस्तिनापुरगामिनः ऋषयः शब्दाय्यन्ते । शब्दाय्यन्ते आहूयन्ते ।

(ख) सखि एहि गच्छावः ।

(ग) एषा सूर्य्योदये एव शिखामज्जिता प्रतीष्टनीवारहस्ताभिः स्वस्तिवाचनिकाभिः तापसीभिः अभिनन्द्यमाना शकुन्तला तिष्ठति । उपसर्पावः एनाम् ।

शिखामज्जिता— शिखया सह मज्जिता सशिरोमज्जनं स्नानं कारितेत्यर्थः । प्रतीष्टनीवारहस्ताभिः— प्रतीष्टाः गृहीताः नीवाराः यैः तादृशाः हस्ताः यासां तथोक्ताभिः । स्वस्तिवाचनिकाभिः— आरभ्यमाणस्य कर्म्मणः निर्व्विघ्नपरिसमाप्त्यर्थं ब्राह्मणान् स्वस्ति वाचयति । स्वस्ति भवन्तो ब्रुवन्तु इत्येवमभ्यर्थितानां ब्राह्मणानां स्वस्त्यस्तु इत्येवंरूपं शुभप्रार्थनं स्वस्तिवाचनम् । स्वस्तिवाचने नियुक्ताः स्वस्तिवाचनिकाः ताभिः पतिगृहं गतायाः शकुन्तलायाः सर्व्वाङ्गीनं शुभं भवत्वित्याशिषं प्रयुञ्जानाभिरित्यर्थः । अभिनन्द्यमाना क्रियमाणशुभाशंसा ।

---

(१) एदे । १ । २ । ४ । ५ । ७ । ८ । एदे क्खु । ३ । ६ ।

ततः प्रविशति यथोद्दिष्टव्यापारा आसनस्था शकुन्तला ।
शकुन्तलां प्रति तापसीनाम्

अन्यतमा । जाते भत्तुणो बहुमाणसूअयं महादेईसद्दं लहसु (क) ।

द्वितीया । वच्छे वीरप्पसविणी होसु (ख) ।

तृतीया । वच्छे भत्तुणो बहुमता होसु (ग) ।

आशिषो दत्त्वा गौतमीवर्जं निष्क्रान्ताः ।

सख्यौ । उपसृत्य । सहि सुहमज्जणं दे होउ (घ) ।

शकुन्तला । साअतं मे सहीणं । इदो णिसीदह (ङ) ।

उभे । मङ्गलपात्राण्यादाय । उपविश्य । हला सज्जा होसु जाव मङ्गलसमालम्भणं विरचेम (च) ।

शकुन्तला । इदं वि बहु मन्तव्वं । दुल्लहं दाणिं मे सहीमण्डणं होहिइ (छ) ।

वाष्पं विहरति ।

(क) जाते भर्त्तुः बहुमानसूचकं महादेवीशब्दं लभस्व ।
महादेवीशब्दं महिषीसंज्ञाम् ।
(ख) वत्से वीरप्रसविनी भव ।
(ग) वत्से भर्त्तुः बहुमता भव ।
बहुमता बहुमानभाजनम् ।
(घ) सखि सुखमज्जनं ते भवतु ।
सुखमज्जनं ते भवतु— सुखमज्जनं सुखकरं स्नानं पतिगृहगमनार्थं प्रातरेव कृतस्नानासि तत् स्नानं तव सुखाय भवतु पतिगृहे सुखिनी भवेत्यर्थः ।
(ङ) स्वागतं मे सख्योः । इतः निषीदतम् ।
(च) सखि सज्जा भव यावत् मङ्गलसमालम्भनं विरचयावः ।
(छ) इदम् अपि बहु मन्तव्यम् । दुर्लभम् इदानीं मे सखीमण्डनं भविष्यति ।
सखीमण्डनं सखीभ्यामलङ्करणम् ।

उभे । सहि उइअं ण दे मङ्गलकाले रोदुउं (१) (क) ।

अश्रूणि प्रमृज्य नाट्येन प्रसाधयतः ।

प्रियंवदा । आहरणोइअं रूवं अस्समसुलहेहिं पसाहणेहिं विप्पआरीअइ (ख) ।

प्रविश्य उपायनहस्तौ (ग)

ऋषिकुमारकौ । इदमलङ्करणम् अलङ्क्रियतामत्रभवती (२) ।

सर्व्वाः । विलोक्य विस्मिताः ।

गौतमी । वच्छ णारअ (३) कुदो एदं (घ) ।

प्रथमः । तातकाश्यपप्रभावात् ।

गौतमी । किं माणसी सिद्धी (ङ) ।

द्वितीयः । न खलु (४) । श्रूयताम् । तत्रभवता वयमाज्ञप्ताः शकुन्तलाहेतोर्वनस्पतिभ्यः कुसुमान्याहरतेति ।

(क) सखि उचितं न ते मङ्गलकाले रोदितुम् ।

(ख) आभरणोचितं रूपम् आश्रमसुलभैः प्रसाधनैः विप्रकार्य्यते ।

आभरणोचितम् आभरणैरलङ्करणार्हम् । विप्रकार्य्यते विडम्ब्यते विकृतं क्रियते इत्यर्थः ।

(ग) उपायनहस्तौ— उपायनं वनस्पतिदत्तदुकूलाभरणादिरूपा उपदा हस्ते ययोः तौ तथोक्तौ ।

(घ) वत्स नारद कुतः एतत् ।

(ङ) किं मानसी सिद्धिः ।

किं तपःप्रभावात् इच्छामात्रसम्पादितमलङ्कारजातमेतदित्यर्थः ।

---

(१) अस्सूइ विसज्जिदुं । १ ।
रोदुदुं । २ । ३ । ४ । ५ । ६ । ७ । ८ ।

(२) अत्रभवती शकुन्तला । १ ।
अत्रभवती । २ । ३ । ४ । ५ ।

(३) णारअ । १ । २ । ५ । ६ ।
णाअर । ३ । ४ ।
हारीद । ७ । ८ ।

(४) न खलु । १ । २ । ४ १ ५ । ६ ।
न खलु न खलु । ३ ।

तत इदानीं

क्षौमं केनचिदिन्दुपाण्डु तरुणा माङ्गल्यमाविष्कृतं
निष्ठ्यूतश्चरणोपभोगसुलभो (१) लाक्षारसः केनचित् ।
अन्येभ्यो वनदेवताकरतलैरापर्वभागोत्थितै-
र्दत्तान्याभरणानि तत्किसलयोद्भेदप्रतिद्वन्द्विभिः (क) ॥

प्रियंवदा । शकुन्तलां विलोक्य । हला इमाए अब्भुववत्तीए सूइआ दे भत्तुणो गेहे अणुभविअव्वा राअलच्छि त्ति (ख) ।

शकुन्तला । व्रीडां रूपयति ।

प्रथमः । गौतम एह्येहि अभिषेकोत्तीर्णाय काश्यपाय वनस्पतिसेवां निवेदयावः (ग) ।

द्वितीयः । तथा ।

निष्क्रान्तौ ।

(क) केनचित् तरुणा माङ्गल्यं मङ्गलकर्म्मणि साधु इन्दुपाण्डु चन्द्रवत् शुभ्रवर्णं क्षौमं दुकूलम् आविष्कृतं प्रकाशितं केनचित् तरुणा चरणयोः उपभोगः उपरञ्जनं तत्र सुलभः योग्यः लाक्षारसः अलक्तः निष्ठ्यूतः उद्गीर्णः अन्येभ्यः तरुभ्यः तेषां किसलयोद्भेदाः उद्भिद्यमानानि किसलयानि तेषां प्रतिद्वन्द्विभिः प्रतिस्पर्द्धिभिः तद्रुपमैरित्यर्थः आपर्व्वभागं मणिबन्धं यावत् उत्थितैः आविर्भूतैः वनदेवतानां करतलैः कर्त्तृभिः आभरणानि दत्तानि । शार्दूलविक्रीडितं वृत्तम् ।

(ख) हला अनया अभ्युपपत्त्या सूचिता ते भर्त्तुः गेहे अनुभवितव्या राजलक्ष्मीः इति ।

अनया अभ्युपपत्त्या अनभ्यर्थितानामपि वनदेवतानां दुकूलादिदानानुग्रहेण ।

(ग) अभिषेकोत्तीर्णाय— अभिषेकात् स्नानात् उत्तीर्णाय प्रतिनिवृत्ताय । वनस्पतिसेवाम्—वनस्पतीनां वृक्षाणां सेवां दुकूलादिदानरूपां परिचर्य्याम् ।

(१) चरणोपभोगसुलभः । १ । ४ । ५ । ६ । चरणोपभोगसुभगः । २ ।

सख्यौ । अए अणुवजुत्त (१) भूसणो अअं जणो । चित्तकम्मपरिचएण अङ्गेसु दे आहरणविणिओअं करम (क) ।

शकुन्तला । जाणे वो णेउणं (ख) ।

उभे । नाट्येनालङ्कुरुतः ।

ततः प्रविशति स्नानोत्तीर्णः काश्यपः ।

काश्यपः ।

यास्यत्यद्य शकुन्तलेति हृदयं संस्पृष्टमुत्कण्ठया
कण्ठः स्तम्भितवाष्पवृत्तिकलुषश्चिन्ताजडं दर्शनम् ।
वैक्लव्यं मम तावदीदृशमहो (२) स्नेहादरण्यौकसः
पीड्यन्ते गृहिणः कथं नु (३) तनयाविश्लेषदुःखैर्नवैः (ग) ॥

परिक्रामति ।

(क) अये अनुपभुक्तभूषणः अयं जनः। चित्रकर्म्मपरिचयेन अङ्गेषु ते आभरणविनियोगं कुर्व्वः ।

अनुपभुक्तभूषणः— उपभुक्तानि परिहितानि भूषणानि येन सः न भवति अनुपभुक्तभूषणः। चित्रकर्म्मपरिचयेन— चित्रकर्म्मणां परिचयेन ज्ञानेन अस्माभिर्बहूनि आलेख्यान्यवलोकितानि तत्र स्त्रीणामङ्गेषु आभरणानि चित्रितानि दृष्टानि तदनुसारेणेत्यर्थः। आभरणविनियोगम् अलङ्कारविन्यासम् ।

(ख) जाने वां नैपुणम् ।

(ग) संस्पृष्टम् आक्रान्तम् । स्तम्भितवाष्पवृत्तिकलुषः— स्तम्भितया निरुद्धया वाष्पाणाम् अश्रूणां वृत्त्या प्रसरेण कलुषः रुद्धस्वरः । शार्दूलविक्रीडितं वृत्तम् ।

---

(१) अणुवजुत्त । १ । ४ । ५ । ७ ।
अणभिजुत्त । २ ।
अणुवजुत्त । ३ । ८ ।
(२) ईदृशमपि । १ । २ ।
ईदृशमहो । ३ ।
ईदृशमिदम् । ४ । ५ । ६ ।
(३) नु । १ । ६ ।
न । २ । ३ । ४ । ५ ।

सख्यौ । हला सउन्तले अवसिअमण्डणा सि । परिहेसु संपदं खोमजुअलं (क) ।

शकुन्तला । उत्थाय परिधत्ते ।

गौतमी । जाते एसो दे आणन्दपरिवाहिणा चक्खुणा परिस्सजन्तो विअ गुरु उवट्ठिओ । आचारं दाव पडिवज्जस्सु (ख) ।

शकुन्तला । सव्रीडम् । तात वन्दामि (ग) ।

काश्यपः । वत्से

> ययातेरिव शर्मिष्ठा भर्त्तुर्बहुमता भव ।
> सुतं त्वमपि सम्राजं सेव पूरुमवाप्नुहि (घ) ॥

गौतमी । भअवं वरो क्खु एसो ण आसिसा (ङ) ।

काश्यपः । वत्से इतः सद्योहुतानग्नीन् प्रदक्षिणीकुरुष्व ।

सर्व्वे । परिक्रामन्ति (च) ।

काश्यपः । ऋक्छन्दसा आशास्ते (छ) ।

(क) हला शकुन्तले अवसितमण्डना असि । परिधेहि साम्प्रतं क्षौमयुगलम् ।

अवसितमण्डना— अवसितं समाप्तं मण्डनम् अलङ्करणं यस्याः सा ।

(ख) जाते एषः ते आनन्दपरिवाहिणा चक्षुषा परिष्वजमानः इव गुरुः उपस्थितः । आचारं तावत् प्रतिपद्यस्व ।

आनन्दपरिवाहिणा— आनन्देन हर्षेण परिवहति अविश्रान्तमश्रूणि विसृजतीति तेन । आचारम् अभ्युत्थानाभिवादनादिकम् ।

(ग) तात वन्दे ।

(घ) पथ्यावक्त्रं वृत्तम् ।

(ङ) भगवन् वरः खलु एषः न आशीः ।

(च) परिक्रामन्ति प्रदक्षिणीकुर्व्वन्ति ।

(छ) ऋक्छन्दसा ऋग्वेदीयच्छन्दोनिबद्धेन वाक्येन आशास्ते आशिषं प्रयुङ्क्ते ।

अमी वेदिं परितः क्लृप्तधिष्ण्याः
समिद्वन्तः प्रान्तसंस्तीर्णदर्भाः ।
अपघ्नन्तो दुरितं हव्यगन्धै-
र्वैतानास्त्वां वह्नयः (१) पावयन्तु (क) ॥

प्रतिष्ठस्वेदानीम् । सदृष्टिक्षेपम् । क्व ते शार्ङ्गरवमिश्राः ।

प्रविश्य

शिष्यः । भगवन् इमे स्मः ।

काश्यपः । भगिन्यास्ते मार्गमादेशय

शार्ङ्गरवः । इत इतो भवती ।

सर्व्वे । परिक्रामन्ति ।

काश्यपः । भो भोः सन्निहितास्तपोवनतरवः

पातुं न प्रथमं व्यवस्यति जलं युष्मास्वपीतेषु या
नादत्ते प्रियमण्डनापि भवतां स्नेहेन या पल्लवम् ।
आद्ये वः कुसुमप्रसूतिसमये यस्या भवत्युत्सवः
सेयं याति शकुन्तला पतिगृहं सर्व्वैरनुज्ञायताम् (ख) ॥

(क) वेदिं परितः वेद्याः समन्ततः क्लृप्तं नियतं धिष्ण्यं स्थानं येषां ते तथोक्ताः समिद्वन्तः समिद्भिः पोषिताः प्रान्तेषु संस्तीर्णाः विकीर्णाः दर्भाः कुशाः येषां ते तथोक्ताः हव्यस्य आज्यस्य गन्धैः दुरितं पापम् अपघ्नन्तः ध्वंसयन्तः अमी वितानं यज्ञः तस्येमे वैतानाः वह्नयः अग्नयः त्वां पावयन्तु पुनन्तु ।

(ख) व्यवस्यति प्रवर्त्तते । अपीतेषु— पीतं पानम् एषामस्ति इति पीताः पीतोदकाः ते न भवन्तीति अपीताः तेषु अकृतजलसेकेषु इत्यर्थः । शार्दूलविक्रीडितं वृत्तम् ।

(१) वह्नयः । १ । २ । ३ । ४ । अग्नयः । ५ ।

कोकिलरवं सूचयित्वा (क)।

अनुमतगमना शकुन्तला
तरुभिरियं वनवासबन्धुभिः ।
परभृतविरुतं कलं यथा
प्रतिवचनीकृतमेभिरीदृशम् (ख) ॥

आकाशे

रम्यान्तरः कमलिनीहरितैः सरोभि-
श्छायाद्रुमैर्नियमितार्कमयूखतापः (१) ।
भूयात् कुशेशयरजोमृदुरेणुरस्याः
शान्तानुकूलपवनश्च शिवश्च पन्थाः (ग) ॥

सर्व्वे। सविस्मयमाकर्णयन्ति ।

(क) कोकिलरवश्रवणम् अभिनीय ।

(ख) यथा यतः। प्रतिवचनीकृतं मत्कृतायाः शकुन्तलापतिगृहगमनानुज्ञाप्रार्थनायाः उत्तरीकृतम् मया या प्रार्थना कृता तरवः कोकिलरवेण तदुत्तरं चक्रुरित्यर्थः। अपरवक्त्रं वृत्तम्।

(ग) अस्याः पन्थाः कमलिनीभिः नलिनीदलसमूहेन हरितैः पालाशवर्णैः सरोभिः दीर्घिकाभिः रम्यं मनोहरम् अन्तरं मध्यः यस्य सः तथोक्तः छायाप्रधाना द्रुमाः छायाद्रुमाः तैः नियमितः निवारितः अर्कमयूखानां सूर्य्यरश्मीनां तापः सन्तापः यस्मिन् सः तथोक्तः कुशेशयानां पद्मानां रजः पराग इव मृदुः कोमलः रेणुः धूलिः यस्मिन् सः तथोक्तः शान्तः अनुद्धतः मन्द इति यावत् अनुकूलः अनुकूलवाही च पवनः यस्मिन् सः तथोक्तः शिवः शुभः दस्युहिंस्रजन्तुप्रभृतिकृतोपद्रवरहित इति यावत् भूयात् भवतु। वसन्ततिलका वृत्तम्।

(१) तापः। १। २। पातः। ३।

गौतमी । जादे णादिअणसिणिद्धाहिं अणुण्णादगमणा सि तवोवणदेवताहिं । पणमसु भअवतीओ (क) ।

शकुन्तला । सप्रणामं परिक्रम्य । जनान्तिकम् । हला पिअंवदे णं अज्जउत्तदंसणुस्सुआए वि अस्समं परिच्चअन्तीए दुक्खेण (१) मे चलणा पुरतो पवट्टन्ति (ख) ।

प्रियंवदा । ण केअलं तवोवणविरहकाअरा सही एव्व । तुए उवट्ठिअविओअस्स तवोवणस्स वि दाव समवत्था दीसदु ।

उग्गलिअदब्भकअला मआ परिच्चत्तणच्चणा मोरा ।
ओसरिअपण्डुपत्ता मुअन्ति अस्सू विअ लताओ (ग) ॥

शकुन्तला । स्मृत्वा । तात लताभइणिअं वणजोसिणिं दाव आमन्तावेस्सं (घ) ।

(क) जाते ज्ञातिजनस्निग्धाभिः अनुज्ञातगमना असि तपोवनदेवताभिः । प्रणम भगवतीः ।

ज्ञातिजनस्निग्धाभिः ज्ञातिजनवत् स्वजनवत् स्निग्धाभिः स्नेहपूर्णाभिः ।

(ख) हला प्रियंवदे ननु आर्यपुत्रदर्शनोत्सुकायाः अपि आश्रमं परित्यजन्त्याः दुःखेन मे चरणौ पुरतः प्रवर्त्तेते ।

(ग) न केवलं तपोवनविरहकातरा सखी एव । त्वया उपस्थितवियोगस्य तपोवनस्य अपि तावत् समवस्था दृश्यते ।

उद्गलितदर्भकवलाः मृगाः परित्यक्तनर्त्तनाः मयूराः ।
अपसृतपाण्डुपत्राः मुञ्चन्ति अश्रूणि इव लताः ॥

उद्गलितदर्भकवलाः— उद्गलितः मुखान्निःसृतः दर्भकवलः कुशग्रासः येषां ते तथोक्ताः । अपसृतपाण्डुपत्राः स्खलितपाण्डुरपर्णाः । आर्य्या जातिः ।

(घ) तात लताभगिनीं वनज्योत्स्नां तावत् आमन्त्रयिष्ये ।

---

(१) दुक्खेण । १ । २ । ४ । ५ । ६ । ७ । दुक्खदुक्खेण । ३ । ८ ।

काश्यपः। अवैमि ते तस्यां सोदर्य्यास्नेहम्। इयं तावत् दक्षिणेन।

शकुन्तला। लतामुपेत्य। वणजोसिणि चूतसंगता वि मं पच्चालिङ्गसु इतोगतेहिं साहावाङ्गहिं (१)। अज्जप्पहुदि दूरपरिवट्टिणी दे (२) होहिमि (क)।

काश्यपः।

संकल्पितं प्रथममेव मया तवार्थे
भर्त्तारमात्मसदृशं सुकृतैर्गता त्वम्।
चूतेन संश्रितवती नवमालिकेय-
मस्यामहं त्वयि च सम्प्रति वीतचिन्तः (ख)॥

इतः पन्थानं प्रतिपद्यस्व।

शकुन्तला। सख्यौ प्रति। हला एसा दुवेणं वो हत्थे णिक्खेवो (ग)।

(क) वनज्योत्स्ने चूतसङ्गता अपि मां प्रत्यालिङ्ग इतोगतैः शाखा-बाहुभिः। अद्यप्रभृति दूरपरिवर्त्तिनी ते भविष्यामि।

(ख) सङ्कल्पितं मनसा अभीप्सितम्। आत्मसदृशं कुलशीलवयोरूपा-दिभिः स्वयोग्यम्। सुकृतैः स्वीयैर्गुणैः। संश्रितवती मिलिता। वसन्ततिलका वृत्तम्।

(ग) हला एषा द्वयोः वां हस्ते निक्षेपः।

---

(१) इदोगताहिं साहावाहाहिं।१।३। इदोगतेहिं साहावाङ्गहिं।२। ।७।८।९। इदोगताहिं साहावाङ्गएहिं।२। इदोगताहिं साहावाहुहिं।४।५।

(२) दूरपरिवट्टिणी दे क्खु।१।२।५। दूरपरिवट्टिणी क्खु।३। दूरवट्टिणी दे क्खु।४। दूरपरिवट्टिणी दे।६।७। दूरपरिवट्टिणी।८।९।

उभे । अअं जणो कस्स हत्थे समप्पिदो (क) ।

बाष्पं विहरतः ।

काश्यपः । अनसूये अलं रुदित्वा । ननु भवतीभ्यामेव स्थिरीकर्त्तव्या शकुन्तला ।

सर्व्वे । परिक्रामन्ति ।

शकुन्तला । तात एसा उड़अपज्जन्तचारिणी गब्भमन्थरा मअवहू जदा अणघप्पसवा होदू तदा मे कं वि पिअणिवेदइ-त्तअं विसज्जिहिस्ससि (ख) ।

काश्यपः । नेदं विस्मरिष्यामः (१) ।

शकुन्तला । गतिभङ्गं रूपयित्वा । को णु क्खु एसो णिवसणे मे सज्जइ (२) (ग) ।

परावर्त्तते (घ) ।

(क) अयं जनः कस्य हस्ते समर्पितः ।

(ख) तात एषा उटजपर्य्यन्तचारिणी गर्भमन्थरा मृगवधूः यदा अनघ-प्रसवा भवति तदा मह्यं कम् अपि प्रियनिवेदयितारं विसृक्ष्यसि ।

गर्भमन्थरा— गर्भेण गर्भभारेण मन्थरा मन्दगामिनी स्वच्छन्दं चरितु-मसमर्था इत्यर्थः । अनघप्रसवा— अनघः निर्विघ्नः प्रसवः गर्भमोचनं यस्याः सा तथोक्ता । विसृक्ष्यसि प्रेषयिष्यसि ।

(ग) कः नु खलु एषः निवसने मे सजति ।

निवसने वस्त्रे । सजति लगति ।

(घ) परावर्त्तते दर्शनार्थं मुखं विवर्त्तयति ।

---

(१) वत्से नेदं विस्मरिष्यामः ।१।४।५। नेदं विस्मरिष्यामः ।२।३। (२) णिवसणे मे सज्जइ ।१।२।४।५।६।७।८।९।१०। णिवसणं मे कड्ढिज्जइ ।३।

काश्यपः । वत्से

यस्य त्वया व्रणविरोपणमिङ्गुदीनां (१)
तैलं न्यषिच्यत मुखे कुशसूचिविद्धे ।
श्यामाकमुष्टिपरिवर्द्धितको जहाति
सोऽयं न पुत्त्रकृतकः पदवीं मृगस्ते (क) ॥

शकुन्तला । वच्छ किं सहवासपरिच्चाइणिं मं अणुसरसि । अचिरप्पसूदाए जणणीए विणा विवड्ढिओ एव्व । दाणिं वि मए विरहिअं तुमं तादो चिन्तावेस्सदि । णिवत्तस्सु दाव (ख) ।

रुदती प्रस्थिता ।

काश्यपः ।

उत्पक्ष्मणोर्नयनयोरुपरुद्धवृत्तिं
वाष्पं कुरु स्थिरतया विरतानुबन्धम् (२) ।

(क) व्रणविरोपणं क्षतशोषणम् । श्यामाकमुष्टिपरिवर्द्धितकः—श्यामाकानां धान्यविशेषाणां मुष्टिभिः परिवर्द्धितकः यत्नेन पोषितः । पुत्त्रकृतकः कृतपुत्त्रः पुत्त्रतया परिगृहीत इत्यर्थः । पदवीं पन्थानम् । वसन्ततिलका वृत्तम् ।

(ख) वत्स किं सहवासपरित्यागिनीं माम् अनुसरसि । अचिरप्रसूतया जनन्या विना विवर्द्धितः एव । इदानीम् अपि मया विरहितं त्वां तातः चिन्तयिष्यति । निवर्त्तस्व तावत् ।

विवर्द्धितः पोषितः मया इति शेषः ।

---

(१) व्रणविरोपणम् । १ । २ । ३ । ६ । (२) विरतानुबन्धम् । १ । २ । ४ । ५ ।
व्रणविरोहणम् । ४ । ५ । विहतानुबन्धम् । ३ । ६ ।

अस्मिन्नलक्षितनतोन्नतभूविभागे (१)
मार्गे पदानि खलु ते विषमीभवन्ति (क)॥

शार्ङ्गरवः। भगवन् उदकान्तं (२) स्निग्धो जनोऽनुगन्तव्य इति श्रूयते तदिदं सरस्तीरम् अत्र सन्दिश्य प्रतिगन्तुमर्हसि (ख)।

काश्यपः। तेन हि इमां क्षीरवृक्षच्छायामाश्रयामः।

सर्व्वे। परिक्रम्य स्थिताः।

काश्यपः। आत्मगतम्। किं नु खलु तत्रभवतो दुष्यन्तस्य युक्तरूपमस्माभिः सन्देष्टव्यम्।

चिन्तयति (३)।

(क) उत् उन्नतानि पक्ष्माणि रोमाणि ययोः तथाविधयोः नयनयोः उपरुद्धा प्रतिबद्धा वृत्तिः व्यापारः येन तं तथोक्तं विषयग्रहरूपं नयनव्यापारं प्रतिबध्नन्तमित्यर्थः बाष्पं अस्रु स्थिरतया स्थैर्य्येण धैर्य्यमवलम्बेत्यर्थः विरतः निवृत्तः अनुबन्धः अविश्रान्तवहनं यस्य तथोक्तं कुरु बाष्पविमोचनात् विरम इत्यर्थः खलु यतः अलक्षितः नयनयोर्बाष्पकलुषतया अपरिदृष्टः नतोन्नतः बन्धुरः भूविभागः भूमिसन्निवेशः यस्य तथोक्ते अस्मिन् मार्गे पथि ते तव पदानि पादन्यासाः विषमीभवन्ति मुहुः स्खलन्ति। वसन्ततिलका वृत्तम्।

(ख) उदकान्तम्— उदकं जलम् अन्तः अवधिर्यस्मिन् कर्म्मणि तत् यथा तथा उदकं यावदित्यर्थः।

---

(१) भूमिभागे। १। २। ४। ५। ६।
भूविभागे। ३।

(२) ओदकान्तम्। १। ४। ५।
उदकान्तम्। २।
उदकान्तात्। ३।

(३) एतदनन्तरं। २। पुस्तके प्रियंवदा। ण सो णत्थि कोवि जो तुए विरहिज्जन्तो ण ताम्मइ। पेक्ख सुदाव पुड़इणीपत्तन्तरिओ वाहरिओ वि ण वाहरइ पिअं। मुह उव्वूढ़मुणालो तइ दिट्ठिं देइ चक्कवाओ॥ अयमंशो दृश्यते।

शकुन्तला । जनान्तिकम् । हला पेक्खस्स णलिणीपत्तन्तरिअं वि सहअरं अदेक्खन्ती आतुरा चक्कवाई आरडइ । दुक्करं अहं करामि (१) (क) ।

अनसूया । सहि मा एव्वं मन्तिअ ।

एसा वि पिएण विणा गमेइ रअणिं विसाअदीहअरं ।
गरुअं वि विरहदुक्खं आसाबन्धो सहावेइ (ख) ॥

काश्यपः । शार्ङ्गरव इति त्वया मद्वचनात् स राजा शकुन्तलां पुरस्कृत्य वक्तव्यः (ग) ।

शार्ङ्गरवः । आज्ञापयतु भगवान् ।

काश्यपः ।

अस्मान् साधु विचिन्त्य संयमधनानुच्चैः कुलं चात्मन-
स्त्वय्यस्याः कथमप्यबान्धवकृतां स्नेहप्रवृत्तिं च ताम् ।

(क) हला प्रेक्षस्व नलिनीपत्रान्तरितम् अपि सहचरम् अपश्यन्ती आतुरा चक्रवाकी आरटति । दुष्करम् अहं करोमि ।

आतुरा सहचरविरहकातरा । आरटति करुणं रौति । दुष्करमहं करोमि— चक्रवाकी सहचरं क्षणमप्यपश्यन्ती कातरा भवति अहन्तु प्रियविरहिता एतावन्तं कालं स्थितास्मीति दुष्करकरणम् ।

(ख) सखि अलम् एवं मन्त्रयित्वा ।

एषा अपि प्रियेण विना गमयति रजनीं विषाददीर्घतराम् ।
गुरु अपि विरहदुःखम् आशाबन्धः साहयति ॥

गमयति अतिवाहयति । आशाबन्धः पुनर्मिलनप्रत्याशा । साहयतीति णिजन्तस्य सहधातोः प्रयोगः । आर्या जातिः ।

(ग) पुरस्कृत्य पुरतः स्थापयित्वा ।

---

(१) करेमि त्ति । १ । २ । ४ । ५ । ६ । ७ । करेमि । ३ । ६ ।

सामान्यप्रतिपत्तिपूर्व्वकमियं दारेषु दृश्या त्वया
भाग्यायत्तमतःपरं (१) न खलु तद्वाच्यं वधूबन्धुभिः (क) ॥

शार्ङ्गरवः । सुगृहीतः (२) सन्देशः ।

काश्यपः । वत्से त्वमिदानीमनुशासनीयासि । वनौकसोऽपि सन्तो लौकिकज्ञा वयम् (ख) ।

शार्ङ्गरवः । न खलु धीमतां कश्चिदविषयो नाम (ग) ।

(क) अस्मान् संयमः तपश्चर्य्या धनं येषां तथोक्तान् साधु सम्यक् विचिन्त्य पर्य्यालोच्य शकुन्तलायां विमानितायां वयमपि आत्मनो विमानितान् मंस्यामहे तथात्वे च तव कुशलं न भविष्यतीत्यभिप्रायः आत्मनः स्वस्य उच्चैः उन्नतं कुलं वंशं च विचिन्त्य शकुन्तलाया विमाननारूपेण असदृशानुष्ठानेन तवोन्नते वंशे कलङ्कस्पर्शो भविष्यतीत्यभिप्रायः कथमपि केनापि प्रकारेण अबान्धवकृतां न पितृभ्रातृप्रभृतिभिर्बन्धुजनैः घटिताम् अस्याः शकुन्तलायाः त्वयि विषये तां तादृशीं स्नेहप्रवृत्तिं अनुरागोदयं च विचिन्त्य एवमनुरक्तेयं न कथञ्चित् विमाननामर्हतीत्यभिप्रायः त्वया इयं दारेषु राजपरिग्रहेषु मध्ये सामान्यप्रतिपत्तिपूर्व्वकम् साधारणगौरवपुरःसरं दृश्या दर्शनीया पूर्व्वपरिणीतैर्दारान्तरैः सह समानगौरवभाजनं करणीयेत्यर्थः अतः अस्मात् परम् अधिकं सौभाग्यसम्भोगादिकं भाग्यायत्तं दैवाधीनं तत् वधूबन्धुभिः स्त्रिया बान्धवैः न वाच्यं वक्तुमुचितं खलु यदि दैवमनुकूलं स्यात् तदा अस्माभिरनुक्तेऽपि अस्याः सौभाग्यसम्भोगो घटिष्यते यदि तु प्रतिकूलं तदा अस्माभिरुक्तेऽपि स न घटिष्यते अतोऽस्माकं तद्वचनं सर्व्वथा निष्फलमेवेति भावः । शार्दूलविक्रीडितं वृत्तम् ।

(ख) लौकिकज्ञाः लोकवृत्तान्ताभिज्ञाः ।

(ग) धीमतां बुद्धिमतां जनानां कश्चित् कोऽपि नाम पदार्थः अविषयः अपरिज्ञातः न खलु नैवास्ति ।

---

(१) भाग्याधीनम् । १ ।
भाग्यायत्तम् । २ । ३ । ४ । ५ । ६ ।

(२) सुगृहीतः । १ । ४ ।
गृहीतः । २ । ३ । ५ ।

काश्यपः । सा त्वमितः पतिकुलं प्राप्य

शुश्रूषस्व गुरून् कुरु प्रियसखीवृत्तिं सपत्नीजने
भर्त्तुर्विप्रकृतापि रोषणतया मास्म प्रतीपं गमः ।
भूयिष्ठं भव दक्षिणा परिजने भाग्येष्वनुत्सेकिनी
यान्त्येवं गृहिणीपदं युवतयो वामाः कुलस्याधयः (क) ॥

कथं वा गौतमी मन्यते ।

गौतमी । एत्तिओ वहूजणस्स उवदेसो । जादे एदं क्खु सव्वं (१) ओधारेसु (ख) ।

काश्यपः । वत्से परिष्वजस्व मां सखीजनञ्च ।

शकुन्तला । तात इदो एव्व किं पिअंवदामिस्सा सहीओ णिवत्तिस्सन्ति (ग) ।

(क) गुरून् श्वशुरश्वश्रू‌श्वशुरादीन् शुश्रूषस्व सेवस्व तेषामुचितां परिचर्य्यां कुरुष्व सपत्नीजने एकपत्नीषु प्रियसख्याः वृत्तिं व्यवहारं कुरु विप्रकृता विमानिता अपि रोषणतया क्रोधवशेन भर्त्तुः पत्युः प्रतीपं प्रातिकूल्यं मास्म गमः प्रतिकूलचारिणी मा भूः भाग्येषु सौभाग्येषु उपनतेषु अनुत्सेकिनी अगर्व्विता सती परिजने परिचारकवर्गे भूयिष्ठं प्रकामं दक्षिणा अनुकूला भव एवम् इत्थं युवतयः गृहिणीपदं पुरन्ध्रीपदं यान्ति प्राप्नुवन्ति वामाः विपरीतचारिण्यः कुलस्य पतिकुलस्य आधयः यातनास्वरूपाः । शार्दूलविक्रीडितं वृत्तम् ।

(ख) एतावान् वधूजनस्य उपदेशः । जाते एतत् खलु सर्व्वम् अवधारय ।

(ग) तात इतः एव किं प्रियंवदामिश्राः सख्यः निवर्त्तिष्यन्ते ।

प्रियंवदामिश्राः— प्रियंवदा मिश्रा प्रधानं यासां ताः तथोक्ताः प्रियंवदाप्रभृतय इत्यर्थः ।

(१) एदं क्खु सव्वं ।१।२।५।६।७।८।९। एदं सव्वं । ३ । एदं हि सव्वं । ४ ।

काश्यपः । वत्से इमे अपि प्रदेये (क) । न युक्तमनयोस्तत्र गन्तुम् । त्वया सह गौतमी यास्यति ।

शकुन्तला । पितरमाश्लिष्य । कहं दाणिं तादस्स अङ्कादो परिब्भट्ठा मलअतरुम्मूलिआ चन्दणलता विअ देसन्तरे जीविअं धारेस्सं (ख) ।

काश्यपः । वत्से किमेवं कातरासि ।

अभिजनवतो भर्तुः श्लाघ्ये स्थिता गृहिणीपदे
विभवगुरुभिः कृत्यैस्तस्य प्रतिक्षणमाकुला ।
तनयमचिरात् प्राचीवार्कं प्रसूय च पावनं
मम विरहजां न त्वं वत्से शुचं गणयिष्यसि (ग) ॥

शकुन्तला । पितुः पादयोः पतति ।

काश्यपः । यदिच्छामि ते तदस्तु ।

(क) प्रदेये पात्रसात्करणीये ।

(ख) कथम् इदानीं तातस्य अङ्कात् परिभ्रष्टा मलयतरून्मूलिता चन्दनलता इव देशान्तरे जीवितं धारयिष्यामि ।

मलयतरून्मूलिता चन्दनलतेव— मलयतरोः चन्दनात् उन्मूलिता उत्पाटिता चन्दनलता चन्दनतरुशाखा इव ।

(ग) वत्से त्वम् अभिजनवतः महाकुलप्रसूतस्य भर्त्तुः पत्युः श्लाघ्ये स्पृहणीये गृहिणीपदे गृहिण्यधिकारे स्थिता प्रतिष्ठिता सती प्रतिक्षणं सर्व्वदा तस्य भर्त्तुः विभवेन ऐश्वर्य्येण गुरुभिः दुर्व्वहैः कृत्यैः गृहकार्य्यैः आकुला व्यासक्तचित्ता भूत्वा अचिरात् अनतिविलम्बेन प्राची पूर्व्वा दिक् अर्कं सूर्य्यम् इव पावनं पवित्रं तनयं प्रसूय च मम विरहजां मम अदर्शनजनितां शुचं शोकं न गणयिष्यसि अनुभविष्यसि अवसराभावादिति भावः । हरिणी वृत्तम् ।

शकुन्तला । सख्यावुपेत्य । हला दुवे वि (१) मं समं एव्व परिस्सजह (क) ।

सख्यौ । तथा कृत्वा । सहि जइ णाम सो राआ पच्चहिसाणमन्थरो होउ तदो से इमं अत्तणामहेअङ्किअं अङ्गुलीअअं दंसेसु (ख) ।

शकुन्तला । इमिणा संदेसेण वो आकम्पिअ म्हि (२) (ग) ।

सख्यौ । मा भासु । सिणेहो पावसङ्की (घ) ।

शार्ङ्गरवः । युगान्तरमारूढ़ः (३) सविता (ङ) । त्वरतां भवती ।

(क) हला द्वे अपि मां समम् एव परिष्वजेथाम् ।

द्वे अपि उभे अपि युवाम् । समम् युगपत् ।

(ख) सखि यदि नाम सः राजा प्रत्यभिज्ञानमन्थरः भवेत् तदा तस्मै इदम् आत्मनामधेयाङ्कितम् अङ्गुरीयकं दर्शय ।

प्रत्यभिज्ञानमन्थरः— प्रत्यभिज्ञाने सेयं मया परिणीतपूर्व्वा कण्वतनया शकुन्तलेति परिज्ञाने मन्थरः विलम्बमानः दर्शनमात्रेण त्वां प्रत्यभिज्ञातुमसमर्थश्चेदित्यर्थः ।

(ग) अनेन सन्देशेन वाम् आकम्पिता अस्मि ।

(घ) मा बिभीहि । स्नेहः पापशङ्की ।

स्नेहः पापशङ्की— स्नेहः पापम् अनिष्टं शङ्कते उत्प्रेक्षते इति तथोक्तः परमप्रेमास्पदस्य पुत्त्रदुहित्रादेः अपदेऽपि अनिष्टोत्प्रेक्षणं स्नेहस्य कार्य्यमित्यर्थः ।

(ङ) सविता सूर्य्यः युगान्तरं प्रहरान्तरं द्वितीयं प्रहरमित्यर्थः आरूढ़ः प्राप्तः ।

---

(१) दुवे वि ।१।२।३।५।७।८।९। दुवे एव्व ।४।

(२) आकम्पिअ म्हि ।१।२।३।५।६।७।८।९। आकम्पिअं हिअअं ।४।

(३) आरूढ़ः ।१।२।४।५। अधिरूढ़ः ।३।

शकुन्तला । आश्रमाभिमुखी स्थित्वा । तात कदा णु भूओ तवोवणं पेक्खिस्सं (क) ।

काश्यपः । श्रूयताम्

भूत्वा चिराय चतुरन्तमहीसपत्नी
दौष्यन्तिमप्रतिरथं तनयं निवेश्य ।
भर्त्रा तदर्पितकुटुम्बभरेण सार्द्धं
शान्ते करिष्यसि पदं पुनराश्रमेऽस्मिन् (ख) ॥

गौतमी । जादे परिहीअदि गमणवेला । णिवत्तेहि पिदरं । अहवा चिरेण वि पुणो पुणो (१) एसा एव्वं मन्तेहिदि णिवत्तेउ भवं (ग) ।

काश्यपः । वत्से उपरुध्यते तपोऽनुष्ठानम् (घ) ।

(क) तात कदा नु भूयः तपोवनं प्रेक्षिष्ये ।

(ख) चिराय दीर्घकालं चत्वारः चतसृषु दिक्षु अवस्थिताः सागराः अन्तः अवधिर्यस्याः सा तस्याः सागरपरिच्छिन्नायाः मह्याः पृथिव्याः सपत्नी प्रतिद्वन्द्विनी भूत्वा सागरान्तायाः पृथिव्याः पत्युर्महिषी भूत्वेत्यर्थः दुष्यन्तस्यापत्यं पुमान् दौष्यन्तिः तम् अविद्यमानः प्रतिरथः प्रतिपक्षो यस्य तम् अप्रतिरथं तनयं निवेश्य सिंहासने स्थापयित्वा तस्मिन् तनये अर्पितः न्यस्तः कुटुम्बस्य पोष्यवर्गस्य भरः भारः येन तादृशेन भर्त्रा पत्या सार्द्धं सह अस्मिन् शान्ते शमप्रधाने आश्रमे तपोवने पुनः पदं स्थानं वसतिमिति यावत् करिष्यसि । वसन्ततिलका वृत्तम् ।

(ग) जाते परिहीयते गमनवेला । निवर्त्तय पितरम् । अथवा चिरेण अपि पुनः पुनः एषा एवं मन्त्रयिष्यते । निवर्त्ततां भवान् ।

परिहीयते गमनवेला— गमनवेला प्रस्थानकालः परिहीयते परिक्षीयते अतिवाहिता भवतीत्यर्थः ।

(घ) उपरुध्यते व्याहन्यते ।

(१) पुणो पुणो । १ । २ । ३ । ६ । पुणो । ४ । ५ । ७ । ८ । ९ ।

शकुन्तला । भूयः पितरमाश्लिष्य । तवच्चरणपीड़िअं ताद-सरीरं । ता मा अतिमेत्तं मम किए उक्कण्ठिउ (क) ।

काश्यपः । सनिश्वासम् ।

शममेष्यति मम शोकः कथं नु वत्से त्वया रचितपूर्व्वम् ।
उटजद्वारि विरूढ़ं (१) नीवारबलिं विलोकयतः (ख) ॥

गच्छ शिवास्ते पन्थानः सन्तु ।

निष्क्रान्ता शकुन्तला सहयायिनश्च ।

सख्यौ । शकुन्तलां विलोक्य । हद्धी हद्धी अन्तरिहिआ सउन्तला वणराईए (ग) ।

काश्यपः । सनिश्वासम् । अनसूये गतवती वां सहधर्म्म-चारिणी (घ) । निगृह्य शोकमनुगच्छ माम् ।

प्रस्थितः (२) ।

१. (क) तपश्चरणपीड़ितं तातशरीरम् । तत् मा अतिमात्रं मम कृते उत्कण्ठितम् ।

मा मदर्थम् अतिमात्रमुत्कण्ठस्व इत्यर्थः ।

(ख) वत्से त्वया उटजद्वारि पर्णशालाद्वारदेशे रचितपूर्व्वं पूर्व्वं रचितम् अनुष्ठितं ततः विरूढम् अङ्कुरितं नीवारबलिं तृणधान्यपूजोपहारं विलोकयतः पश्यतः मम शोकः त्वद्वियोगदुःखं कथं केन उपायेन शमं शान्तिम् एष्यति गमिष्यति यावत् नीवारबलिं विलोकयिष्यामि तावत् मम शोको न विरमिष्यति इत्यर्थः । आर्य्या जातिः ।

(ग) हाधिक् हाधिक् अन्तर्हिता शकुन्तला वनराज्या ।

(घ) सहधर्म्मचारिणी— सह एकत्र धर्म्मं चरितवतीति सहधर्म्मचारिणी यया सह युवां धर्म्मचरणेन एतावन्तं कालम् अतिवाहितवत्यौ इत्यर्थः ।

---

(१) उटजद्वारि विरूढ़म् । १ । २ ।
उटजद्वारविरूढ़म् । ३ । ५ ।
उटजद्वारनिरूढ़म् । ४ ।

(२) अनुगच्छ मां प्रस्थितम् ।१।२।४।
अनुगच्छ माम् । प्रस्थितः ।३।५।

उभे । तात सउन्तलाविरहिअं सुखं विअ तवोवणं पविसामो (१) (क) ।

काश्यपः । स्नेहप्रवृत्तिरेवंदर्शिनी । सविमर्षं (ख) परिक्रम्य । हन्त भोः शकुन्तलां विसृज्य (२) लब्धमिदानीं स्वास्थ्यम् (ग) । कुतः

अर्थो हि कन्या परकीय एव
तामद्य संप्रेष्य परिग्रहीतुः ।
जातो ममायं विशदः प्रकामं
प्रत्यर्पितन्यास इवान्तरात्मा (घ) ॥

निष्क्रान्ताः सर्व्वे ।

चतुर्थोऽङ्कः ।

(क) तात शकुन्तलाविरहितं शून्यम् इव तपोवनं प्रविशामः ।

(ख) सविमर्षं सवितर्कम् ।

(ग) विसृज्य पतिकुलं प्रस्थाप्य । स्वास्थ्यं स्वाच्छन्द्यम् ।

(घ) कन्या परिणीता दुहिता । परिग्रहीतुः परिणेतुः । प्रत्यर्पितन्यासः— प्रत्यर्पितः स्थापकाय प्रतिदत्तः न्यासः रक्षणार्थं विस्रम्भात् स्थापितं धनं येन स तथोक्तः । इन्द्रवज्रा वृत्तम् ।

---

(१) कहं पविसामो ।१।२।३।४।५।६।८। पविसामो । ७ । ६ ।

(२) शकुन्तलां पतिकुलं विसृज्य । १ । । २ । ४ । ५ । शकुन्तलां विसृज्य । ३ ।

ततः प्रविशत्यासनस्थो राजा विदूषकश्च।

विदूषकः। कर्णं दत्त्वा। भो वअस्स (१) संगीतसालन्तरे अवहाणं देसु। कलविसुद्धाए गीतीए सरसंजोओ सुणीअदि। जाणामि तत्तहोदी हंसवदिआ वणपरिचअं (२) करेदि त्ति (क)।

राजा। तूष्णीं भव यावदाकर्णयामि।

आकाशे गीयते

अहिणअमहुलोलुवो तुमं (३)
तह परिचुम्बिअ चूअमञ्जरिं।
कमलवसदिमेत्तणिव्वुदो
महुअर विसुमरिओ सि णं कहं (ख)॥

(क) भो वयस्य सङ्गीतशालान्तरे अवधानं देहि कलविशुद्धायाः गीतेः स्वरसंयोगः श्रूयते। जाने तत्रभवती हंसपदिका वर्णपरिचयं करोति इति।

कलविशुद्धाया गीतेः स्वरसंयोगः— कला मधुरा च सा विशुद्धा निरवद्या च तथाविधायाः गीतेः स्वरसंयोगः तादृशसङ्गीतसम्बन्धी स्वरालापः। हंसपदिका हि राजपत्नीनामन्यतमा। वर्णपरिचयं रागाभ्यासम्।

(ख) अभिनवमधुलोलुपः त्वं तथा परिचुम्ब्य चूतमञ्जरीम्।
कमलवसतिमात्रनिर्वृतः मधुकर विस्मृतः असि एनां कथम्॥

कमलवसतिमात्रनिर्वृतः— कमलवसतिमात्रेण केवलेन कमलवासेन निर्वृतः लब्धसुखः कमलमधुपानेन नितरां परितृप्त इत्यर्थः। अपरवक्त्रं वृत्तम्।

---

(१) भो वअस्स। १। ६। ७। भो भो वअस्स।२।३।४।५।

(२) वणपरिचअं।१।२।३।५।६। वीणापरिचअं। ४। ७।

(३) तुमं। १। २। ४। ५। भवं। ३। ६। ७।

राजा । अहो रागपरिवाहिणी गीतिः (क) ।

विदूषकः । किं दाव गीतीए अवगओ अक्खरत्थो (ख) ।

राजा । स्मितं कृत्वा । सकृत्कृतप्रणयोऽयं जनः । तदस्या देवीं वसुमतीमन्तरेण महदुपालम्भनं गतोऽस्मि । सखे माठव्य मद्वचनादुच्यतां हंसपदिका निपुणमुपालब्धोऽस्मीति (ग) ।

विदूषकः । जं भवं आणवेदु । उत्थाय । भो वअस्स गहीअस्स ताए परकीएहिं हत्थेहिं सिहण्डए ताडीअमाणस्स अच्छलाए वीतराअस्स विअ णत्थि दाणिं मे मोक्खो (घ) ।

(क) रागपरिवाहिणी— रागम् अनुरागं परिवहति प्रवाहेण स्रवति इति तथोक्ता ।

(ख) किं तावत् गीतेः अवगतः अक्षरार्थः ।

अक्षरार्थः वाक्यार्थः ।

(ग) सकृत्कृतप्रणयोऽयं जनः— अयं मल्लक्षणो जनः सकृत् एकवारमेव कृतः प्रणयः प्रेमाविष्कारः येन सः तथोक्तः । तदस्या इत्यादि— तत् तस्मात् सकृत्कृतप्रणयत्वादिति यावत् देवीं वसुमतीम् अन्तरेण देव्याः वसुमत्याः कृते देव्या वसुमत्या सहैव समयातिवाहनादित्यर्थः अस्याः हंसपदिकायाः महत् विपुलम् उपालम्भनं भर्त्सनं गतः प्राप्तः अस्मि ।

हंसपदिकायाः सौन्दर्यातिशयेन विमोहितो राजा तां परिणीय तदासक्तचित्ततया तया सह कियन्तं कालमतिवाहयाम्बभूव । अनन्तरं महिष्या वसुमत्याः प्रणयपरतन्त्रस्सन्नुवन्न एव प्रभूतं समयमतिवाहयन् हंसपदिकायाः पराङ्मुखः सञ्जातः । इमामवस्थामभिसन्धाय राजानमेव उपालब्धुं गीतेः प्रक्रम इति मन्यमानेन तेन सकृत्कृतप्रणयोऽयं जनः इत्याद्युक्तम् ।

(घ) यत् भवान् आज्ञापयति । भो वयस्य गृहीतस्य तया परकीयैः हस्तैः शिखण्डके ताड्यमानस्य अप्सरसा वीतरागस्य इव नास्ति इदानीं मे मोक्षः ।

गृहीतस्य तया इत्यादि— तया हंसपदिकया परकीयैः अन्यदीयैः हस्तैः शिखण्डके शिखायां गृहीतस्य तदनुमत्या तन्निर्देशवर्त्तिनीभिः परि-

राजा । गच्छ नागरिकवृत्त्या संज्ञापयैनाम् (क) ।

विदूषकः । का गई (ख) ।

निष्क्रान्तः ।

राजा । आत्मगतम् । किं नु खलु गीतमाकर्ण्य (१) इष्टजनविरहादृतेऽपि (२) बलवदुत्कण्ठितोऽस्मि । अथवा

रम्याणि वीक्ष्य मधुरांश्च निशम्य शब्दान्
पर्युत्सुकीभवति यत् सुखितोऽपि जन्तुः ।
तच्चेतसा स्मरति नूनमबोधपूर्व्वं
भावस्थिराणि जननान्तरसौहृदानि (ग) ॥

पर्य्याकुलस्तिष्ठति ।

चारिणीभिर्धृतशिखस्य इत्यर्थः ताड्यमानस्य ताभिरेव प्रह्रियमाणस्य मे मम इदानीं मोक्षो नास्ति यद्यहं तव सन्देशहरो हंसपदिकासकाशं गच्छेयं तत्र परिचारिकाः शिखायां गृहीत्वा मां प्रहरिष्यन्ति नच शीघ्रं ताभ्यो मम मोक्षो भविष्यति अतस्तत्र गन्तुं नाहमुत्सहे इति भावः । अत्रोपमा अप्सरसा वीतरागस्येव इव यथा अप्सरसा गृहीतस्य विमोहितस्य वीतरागस्य विषयोपभोगे विगतस्पृहस्य जनस्य मोक्षः अपवर्गः नास्ति विषयवासनां विसृज्य संसारनिवृत्तये विजनं वनमाश्रित्य तपस्यतो जनस्य अप्सरःप्रलोभनेन तपोभ्रंशात् यथा मोक्षो न भवति तद्वदित्यर्थः ।

(क) नागरिकवृत्त्या संज्ञापयैनाम्— नागरिकस्य रसिकस्य वृत्त्या व्यवहारेण एनां हंसपदिकां संज्ञापय मत्सन्देशं ब्रूहि ।

(ख) का गतिः ।

का गतिः कः उपायः राजनिदेशस्य अनतिक्रमणीयत्वात् अवश्यमेव मया तत्र गन्तव्यमित्यर्थः ।

(ग) रम्याणि मनोहराणि वस्तूनि । पर्य्युत्सुकीभवति उत्कलिकाकुल-

(१) गीतार्थमाकर्ण्य ।१।२।३।४।५। गीतमाकर्ण्य ।६।

(२) इष्टजनवियोगात् ।१। इष्टजनविरहात् ।२।३।४।५।६।

ततः प्रविशति कञ्चुकी।

कञ्चुकी। अहो नु खलु ईदृशीमवस्थां प्रतिपन्नोऽस्मि।

आचार इत्यवहितेन मया गृहीता
या वेत्रयष्टिरवरोधगृहेषु राज्ञः।
काले गते बहुतिथे मम सैव जाता
प्रस्थानविक्लवगतेरवलम्बनार्था (१) (क)॥

भोः कामं धर्म्मकार्य्यमनतिपात्यं देवस्य। तथापि इदानीमेव धर्म्मासनादुत्थिताय पुनरुपरोधकारि कण्वशिष्यागमनमस्मै नोत्सहे निवेदयितुम् (२)। अथवा अविश्रमो लोकतन्त्राधिकारः (३) (ख)।

स्थितः सम्पद्यते। अबोधपूर्व्वम्— बोधः पूर्व्वो यस्मिन् तत् बोधपूर्व्वं ज्ञानपूर्व्वकं तत् न भवति इति अबोधपूर्व्वं कथं पर्य्युत्सुको भवतीति ज्ञानं विना इत्यर्थः। भावस्थिराणि भावे हृदये स्थिराणि बद्धमूलानि। वसन्ततिलका वृत्तम्।

(क) आचारः अवरोधरक्षाधिकृतेन वेत्रयष्टेरवश्यंग्रहणरूपः। अवहितेन वेत्रयष्टिग्रहणे अप्रमत्तेन। वसन्ततिलका वृत्तम्।

(ख) कामम् असंशयम्। अनतिपात्यम् अनतिक्रमणीयम्। पुनरुपरोधकारि पुनःक्लेशजनकम्। अविश्रमो लोकतन्त्राधिकारः— लोकस्य भुवनस्य तन्त्रं परिरक्षणं तद्रूपः अधिकारः नियोगः व्यापारो वा न विद्यते विश्रमः विश्रान्तिः यस्मिन् सः तथोक्तः भुवनपरिरक्षणे अधिकृतैः विश्रामस्य अवसरो नैव लभ्यते इत्यर्थः।

---

(१) अवलम्बनार्था।१।२।४।६। अवलम्बनार्थम्।२।५।

(२) निवेदयितुं नोत्सहे।१। नोत्सहे निवेदयितुम्।२।३।४।५।

(३) अविश्रमोऽयं लोकतन्त्राधिकारः। कुतः।१।२।४।५। अविश्रमो लोकतन्त्राधिकारैः।३।

भानुः सकृद्युक्ततुरङ्ग एव
रात्रिन्दिवं गन्धवहः प्रयाति।
शेषः सदैवाहितभूमिभारः
षष्ठांशवृत्तेरपि धर्म्म एषः (क)॥

यावत् नियोगमनुतिष्ठामि (ख)। परिक्रम्यावलोक्य च। एष देवः

प्रजाः प्रजाः स्वा इव तन्त्रयित्वा (१)
निषेवते शान्तमना (२) विविक्तम्।
यूथानि सञ्चार्य्य रविप्रतप्तः
शीतं दिवा स्थानमिव द्विपेन्द्रः (ग)॥

उपगम्य। जयतु देवः (३)। एते खलु हिमवतो गिरेरुपत्यका-

(क) सकृद्युक्ततुरङ्ग एव — एकवारमेव रथे तुरङ्गान् योजयित्वा चिर-मनवरीक्षे परिभ्रमति। षष्ठांशवृत्तेः प्रजापालनेऽधिकृतस्य पुरुषस्य राजा हि प्रजाः पालयन् तद्धनस्य षष्ठांशरूपं करमादत्ते तेनैव च स्वस्य वृत्तिं कल्पयति। इन्द्रवज्रा वृत्तम्।

(ख) नियोगं कण्वशिष्यागमननिवेदनरूपम् अधिकारम्।

(ग) प्रजाः प्रजाः स्वा इव तन्त्रयित्वा — स्वाः स्वकीयाः प्रजाः अपत्यानि इव अपत्यनिर्व्विशेषमित्यर्थः प्रजाः लोकान् तन्त्रयित्वा कार्य्यवेक्षणेन अभि-रक्ष्य। इन्द्रवज्रोपेन्द्रवज्रयोः सङ्कररूपा उपजातिर्वृत्तम्।

अशान्तमनाः उद्विग्नमनाः सन् शान्तमनाः इति तु छेदे रविप्रतप्तः इत्युपमानेन विरोधः स्यात् एते क्लान्तमनसः इति वक्ष्यमाणेन राजवचनेन विरोधापत्तिश्च। राघवभट्टः।

विरोधपरिहारार्थं शान्तमनाः इत्यत्र अशान्तमनाः इति पाठकल्पना-पेक्षया शान्तमनाः इति पाठकल्पनं साधुतरं प्रतिभाति।

---

(१) सान्त्वयित्वा। १। २। ४। ५। अशान्तमनाः। ६।
तन्त्रयित्वा। ३। ६।
(२) शान्तमनाः। १।२।३।४।५।
(३) जयतु जयतु देवः। १। २।
जयतु देवः। ३। ४। ५।

रण्यवासिनः काश्यपसन्देशमादाय सस्त्रीकास्तपस्विनः संप्राप्ताः। श्रुत्वा देवः प्रमाणम् (क)।

राजा। सादरम्। किं काश्यपसन्देशहारिणः।

कञ्चुकी। अथकिम्।

राजा। तेन हि मद्वचनात् विज्ञाप्यतामुपाध्यायः सोमरातः (१) अमूनाश्रमवासिनः श्रौतेन विधिना सत्कृत्य स्वयमेव प्रवेशयितुमर्हतीति। अहमपि अत्र तपस्विदर्शनोचिते प्रदेशे स्थितः प्रतिपालयामि (ख)।

कञ्चुकी। यथाज्ञापयति देवः।

निष्क्रान्तः।

राजा। उत्थाय। वेत्रवति अग्निशरणमार्गमादेशय (ग)।

प्रतीहारी। इदो इदो देओ (घ)।

राजा। परिक्रामति। अधिकारखेदं निरूप्य। सर्व्वः प्रार्थितमर्थमधिगम्य सुखी सम्पद्यते जन्तुः राज्ञां तु चरितार्थता दुःखोत्तरैव (२) (ङ)।

(क) देवः प्रमाणम्— महाराज एव अनन्तरकरणीयमवधारयतु इत्यर्थः।

(ख) श्रौतेन विधिना वेदोक्तेन विधानेन।

(ग) अग्निशरणमार्गम् अग्निहोत्रगृहगमनपथम्।

(घ) इतः इतः देवः।

(ङ) अधिकारखेदं निरूप्य प्रजापालनव्यापारजनितं श्रमातिशयम् अभिनीय। दुःखोत्तरा क्लेशभूयिष्ठा।

---

(१) सोमराजः। १। ३।
सोमरातः। २। ४। ५।

(२) दुःखोत्तरा। १। २। ३। ४। ५।
दुःखान्तरा। ६।

औत्सुक्यमात्रमवसाययति (१) प्रतिष्ठा
क्लिश्नाति लब्धपरिपालनवृत्तिरेव (२) ।
नातिश्रमापनयनाय यथा श्रमाय (३)
राज्यं स्वहस्तधृतदण्डमिवातपत्रम् (क) ॥

नेपथ्ये

वैतालिकौ । विजयतां (४) देवः ।

प्रथमः ।

स्वसुखनिरभिलाषः खिद्यसे लोकहेतोः
प्रतिदिनमथवा ते वृत्तिरेवंविधैव ।
अनुभवति हि मूर्ध्ना पादपस्तीव्रमुष्णं
शमयति परितापं छायया संश्रितानाम् (ख) ॥

(क) प्रतिष्ठा अभिलषितसिद्धिः औत्सुक्यम् अभिलषितप्राप्तिनिमित्ता उत्कण्ठा तन्मात्रम् अवसाययति अवसानं नयति अभिलषितसिद्धेरौत्सुक्य-निरसनमात्रे पर्य्याप्तिरित्यर्थः लब्धस्य अधिगतस्य अभिलषितार्थस्य परिपालन-वृत्तिः अभिरक्षणव्यापार" क्लिश्नाति एव क्लेशकरी भवत्येव अभिलषिते लब्धे औत्सुक्यमात्रं निवर्त्तते किन्तु लब्धस्य तस्याभिरक्षणं निरतिशयं क्लेश-मावहति अतः स्वहस्तेन धृतः दण्डः यस्य तादृशम् आतपत्रं छत्रम् इव राज्यम् अति अत्यर्थं श्रमस्य क्लेशस्य अपनयनाय निरसनाय न भवति यथा श्रमाय क्लेशाय भवति राज्यं स्वहस्तधृतदण्डमातपत्रञ्च यावतिथं क्लेशं जनयति न तावतिथं क्लेशमपनयति राज्यात् सुखलेशोऽपि नास्ति केवलं दुःख-परम्परैव तदधिगमफलमिति भावः । वसन्ततिलका वृत्तम् ।

(ख) स्वसुखनिरभिलाषः — स्वस्य आत्मनः सुखे निरभिलाषः वीतस्पृहः । खिद्यसे क्लिश्यसि । वृत्तिः नियोगः । उष्णम् उत्तापम् । मालिनी वृत्तम् ।

---

(१)- अवसादयति । १ ।
अवसाययति ।२।३।४।५।६।
(२) एनम् ।१।२।३।४।५।६।
(३) नच श्रमाय ।१।२।३।४।५।६।
(४) विजयतां विजयताम् । १ ।
विजयताम् । २ । ३ । ४ । ५ ।

द्वितीयः।

नियमयसि विमार्गप्रस्थितानात्तदण्डः
प्रशमयसि विवादं कल्पसे रक्षणाय।
अतनुषु विभवेषु ज्ञातयः सन्तु नाम
त्वयि तु परिसमाप्तं बन्धुकृत्यं प्रजानाम् (क)॥

राजा। एते क्लान्तमनसः पुनर्नवीकृताः स्मः।

परिक्रामति।

प्रतीहारी। अहिणवसम्मज्जणसस्सिरीओ सण्णिहिदहोमधेणू अग्गिसरणालिन्दो। आरोहदु देवो (ख)।

राजा। आरुह्य परिजनांसावलम्बी तिष्ठन्। वेत्रवति किमुद्दिश्य भगवता काश्यपेन मत्सकाशमृषयः प्रेषिताः स्युः।

किं तावद्व्रतिनामुपोढतपसां विघ्नैस्तपो दूषितं
धर्मारण्यचरेषु केनचिदुत प्राणिष्वसच्चेष्टितम्।

(क) कल्पसे प्रभवसि। अतनुषु इत्यादि— प्रजानाम् अतनुषु प्रभूतेषु विभवेषु वित्तेषु सत्सु ज्ञातयः स्वजनाः सन्तु विद्यन्तां नाम सति विभवे तदुपभोगार्थं प्रजानां ज्ञातयः ताः उपतिष्ठन्तामित्यर्थः तासां बन्धुकृत्यं सम्पदि च विपदि च तुल्यतया हितचिन्तनरूपं वास्तवं बन्धुकार्य्यन्तु त्वयि परिसमाप्तं प्रतिष्ठितम्। मालिनी वृत्तम्।

(ख) अभिनवसम्मार्ज्जनसश्रीकः सन्निहितहोमधेनुः अग्निशरणालिन्दः। आरोहतु देवः।

अभिनवसम्मार्ज्जनसश्रीकः— अभिनवेन अचिरसम्पादितेन सम्मार्ज्जनेन संस्करणेन सश्रीकः सञ्जातशोभः। अग्निशरणालिन्दः अग्निहोत्रगृहस्य बहिर्द्वारपुरोवर्त्ती भूभागः।

आहोस्वित् प्रसवो ममापचरितैर्विष्टम्भितो वीरुधा-
मित्यारूढ़बहुप्रतर्कमपरिच्छेदाकुलं मे मनः (क) ॥

॥ प्रतीहारी । सुचरिअणन्दिणो इसीओ देवं सभाजइदुं आअद त्ति तक्केमि (ख) ।

ततः प्रविशन्ति गौतमीसहिताः शकुन्तलां पुरस्कृत्य मुनयः
पुरश्चैषां कञ्चुकी पुरोहितश्च ।

कञ्चुकी । इत इतो भवन्तः ।

शार्ङ्गरवः । शारद्वत

महाभागः कामं नरपतिरभिन्नस्थितिरसौ
न कश्चिद्वर्णानामपथमपकृष्टोऽपि भजते ।
तथापीदं शश्वत्परिचितविविक्तेन मनसा
जनाकीर्णं मन्ये हुतवहपरीतं गृहमिव (ग) ॥

शारद्वतः । जाने भवान् पुरप्रवेशादित्थम्भूतः संवृत्तः ।

(क) उपोढं धृतं तपः यैः तादृशानां व्रतिनां व्रतशीलानां तपस्विनां तपः किं विघ्नैः निशाचरादिकृतैः प्रत्यूहैः दूषितं दोषाघ्रातं कृतम् उत अथवा धर्मारण्यचरेषु प्राणिषु मृगादिजन्तुषु विषये केनचित् असत् असाधु चेष्टितम् अनुष्ठितम् आहोस्वित् अथवा मम अपचरितैः असदाचरणैः वीरुधां लतानां प्रसवः पत्रपुष्पफलरूपः विष्टम्भितः प्रतिबद्धः राजापचारमन्तरेण एतस्या-सम्भवात् इति इत्थम् आरूढ़ाः आविर्भूताः बहवः प्रतर्काः वितर्काः यस्मिन् तादृशं मे मनः अपरिच्छेदेन अनिर्णयेन आकुलं विक्लवम् भवतीति शेषः । शार्दूलविक्रीड़ितं वृत्तम् ।

(ख) सुचरितनन्दिनः ऋषयः देवं सभाजयितुम् आगताः इति तर्कयामि ।

(ग) अभिन्नस्थितिः अनुत्क्रान्तधर्म्ममर्य्यादः । तथापीदमित्यादि-तथापि शश्वत् सर्व्वकालं परिचितं विविक्तं विजनस्थानं यस्य तथाविधेन मनसा जनाकीर्णं लोकपूर्णम् इदं राजभवनं हुतवहेन वह्निना परीतम् अभि-व्याप्तं गृहम् इव मन्ये अनुभवामि । शिखरिणी वृत्तम् ।

अहमपि।

अभ्यक्तमिव स्नातः शुचिरशुचिमिव प्रबुद्ध इव सुप्तम्।
बद्धमिव स्वैरगतिर्जनमिह सुखसङ्गिनमवैमि (क)॥

शकुन्तला। निमित्तं(१) सूचयित्वा। अम्महे किं मे वामेअरं णअणं विप्फुरइ (ख)।

गौतमी। जाते पतिहदं अमङ्गलं। सुहाइ दे भत्तकुलदेवताओ वितरन्तु (ग)।

परिक्रामति।

पुरोहितः। राजानं निर्द्दिश्य। भोस्तपस्विनः असावत्रभवान् वर्णाश्रमाणां रक्षिता प्रागेव मुक्तासनो वः प्रतिपालयति (घ)। पश्यतैनम्।

शार्ङ्गरवः। भो महाब्राह्मण (२) काममेतदभिनन्दनीयं तथापि वयमत्र मध्यस्थाः (ङ)। कुतः

(क) अभ्यक्तं कृताभ्यङ्गं तैलाक्तसर्व्वाङ्गमित्यर्थः। स्वैरगतिः स्वच्छन्दचारी। सुखसङ्गिनं विषयसुखासक्तम्। आर्य्या जातिः।

(ख) अम्महे किं मे वामेतरत् नयनं विस्फुरति।
वामेतरत् दक्षिणम्। विस्फुरति स्पन्दते।

(ग) जाते प्रतिहतम् अमङ्गलम्। सुखानि ते भर्त्तृकुलदेवताः वितरन्तु।

(घ) वर्णाश्रमाणाम्— ब्राह्मणः क्षत्रियः वैश्यः शूद्रः इति चतुर्णां वर्णानां ब्रह्मचारी गृहस्थः वानप्रस्थः यतिः इति चतुर्णाम् आश्रमाणाञ्च।

(ङ) कामम् असंशयम् एतत् राज्ञामीदृशं विनीतत्वम् अभिनन्दनीयम् प्रशंसनार्हम् अन्येषामिति शेषः तथापि अत्र अस्मिन् विषये वयं मध्यस्थाः उदासीनाः दुष्यन्तसदृशानां सत्पुरुषाणामीदृशस्य विनीतत्वस्य स्वभावसिद्धतया न वयं तत् प्रशंसास्थानं मन्यामहे इत्यर्थः।

---

(१) निमित्तम्। १।२।४।५।
दुर्निमित्तम्। ३।

(२) महाब्राह्मण। १।४।५।
ब्राह्मण। २।३।

भवन्ति नम्रास्तरवः फलागमै-
र्नवाम्बुभिर्दूरविलम्बिनो घनाः ।
अनुद्धताः सत्पुरुषाः समृद्धिभिः
स्वभाव एवैष परोपकारिणाम् (क) ॥

प्रतीहारी । देव पसण्णमुहवण्णा दीसन्ति । जाणामि वीसद्धकज्जाओ इसीओ (ख) ।

राजा । (शकुन्तलां दृष्ट्वा ।) अथात्रभवती

का स्विदवगुण्ठनवती नातिपरिस्फुटशरीरलावण्या ।
मध्ये तपोधनानां किसलयमिव पाण्डुपत्राणाम् (ग) ॥

प्रतीहारी । देव कुदूहलगब्भो पहिदो ण मे तक्को पसरइ । दंसणीआ (१) उण से आकिदी लक्खीअदि (घ) ।

राजा । भवतु । अनिर्वर्णनीयं (२) परकलत्रम् (ङ) ।

(क) वंशस्थविलं वृत्तम् ।

(ख) देव प्रसन्नमुखवर्णाः दृश्यन्ते । जानामि विस्रब्धकार्य्याः ऋषयः ।

विस्रब्धकार्य्याः— विस्रब्धम् अनुद्वेगकरं कार्य्यं प्रयोजनं येषां ते तथोक्ताः ।

(ग) आर्य्या जातिः ।

(घ) देव कुतूहलगर्भः प्रहितः न मे तर्कः प्रसरति । दर्शनीया पुनः अस्याः आकृतिः लक्ष्यते ।

कुतूहलगर्भः— कुतूहलं गर्भः कारणं यस्य स तथोक्तः कुतूहलप्रवर्त्तित इत्यर्थः । प्रहितः कोयमिति निर्णयार्थं प्रयोजितः ।

(ङ) अनिर्वर्णनीयं अवलोकयितुमनर्हम् ।

---

(१) णं दंसणीआ । १ । २ । ४ । ५ । दंसणीआ । ३ ।
(२) अनिर्वर्णनीयम् ।१।२।४।५। अनिर्वचनीयम् । ३ ।

शकुन्तला । हस्तमुरसि कृत्वा । आत्मगतम् । हिअअ किं एव्वं वेवसि । अज्जउत्तस्स भावं ओहारिअ धीरं दाव होसु (क) ।

पुरोहितः । पुरो गत्वा (१) । एते विधिवदर्च्चितास्तपस्विनः(२) । कश्चिदेषामुपाध्यायसन्देशः । तं देवः श्रोतुमर्हति ।

राजा । अवहितोऽस्मि ।

ऋषयः । हस्तमुद्यम्य । विजयस्व राजन् ।

राजा । सर्व्वानभिवादये (३) ।

ऋषयः । इष्टेन युज्यस्व ।

राजा । अपि निर्व्विघ्नतपसो मुनयः ।

ऋषयः ।

कुतो धर्म्मक्रियाविघ्नः सतां रक्षितरि त्वयि ।
तमस्तपति घर्म्मांशौ कथमाविर्भविष्यति (ख) ॥

राजा । अर्थवान् खलु मे राजशब्दः । अथ भगवान् लोकानुग्रहाय कुशली काश्यपः (ग) ।

ऋषयः । स्वाधीनकुशलाः सिद्धिमन्तः । स भवन्तम् अनामयप्रश्नपूर्व्वकमिदमाह ।

(क) हृदय किम् एवं वेपसे । आर्य्यपुत्त्रस्य भावम् अवधार्य्य धीरं तावत् भव ।

(ख) पथ्यावक्त्रं वृत्तम् ।

(ग) अर्थवान् सार्थकः । लोकानुग्रहाय लोकहिताय तस्मिन् कुशलिनि स्थिते सर्व्वभूतहितं भवेदित्यर्थः ।

---

(१) पुरोहितः । पुरो गत्वा ।१।२।३।
पुरोहितः । ४ । ५ ।
(२) तपोधनाः । १ ।
तपस्विनः । २ । ३ । ४ ।
(३) अभिवादये । २ । ४ । ५ ।
अभिवादये वः । ३ ।

राजा । किमाज्ञापयति भगवान् ।

शार्ङ्गरवः । यन्मिथःसमयादिमां मदीयां दुहितरं भवानुपायंस्त तन्मया प्रीतिमता युवयोरनुज्ञातम् (क) । कुतः

त्वमर्हतां प्राग्रहरः (१) स्मृतोऽसि यत्
शकुन्तला मूर्त्तिमती च सत्क्रिया ।
समानयंस्तुल्यगुणं वधूवरं
चिरस्य वाच्यं न गतः प्रजापतिः (ख) ॥

तदिदानीमापन्नसत्त्वा प्रतिगृह्यतां सहधर्म्मचरणायेति ।

गौतमी । अज्ज किं वि वत्तुकाम म्हि ण मे वअणावसरो अत्थि । कहं त्ति

णावेक्खिओ गुरुअणो इमाए ण तुए पुच्छिओ बन्धू (२) ।
एक्कक्कमेव्वं चरिए भणामि किं एक्कमेक्कस्स (ग) ॥

(क) मिथःसमयात् परस्परानुरागात् गान्धर्व्वेण विधानेनेत्यर्थः । अतएव याज्ञवल्क्यः

गान्धर्व्वः समयान्मिथः । १ । ६१ ।

(ख) अर्हतां पूजार्हाणाम् । प्राग्रहरः श्रेष्ठः । समानयन् संयोजयन् । वाच्यं निन्दाम् । चिरस्य चिरं वृत्तम् ।

(ग) आर्य्ये किमपि वक्तुकामा अस्मि न मे वचनावसरः अस्ति । कथम् इति

न अपेक्षितः गुरुजनः अनया न त्वया पृष्टः बन्धुः ।
एकैकम् एवं चरिते भणामि किम् एकम् एकस्मै ॥

अनया शकुन्तलया गुरुजनः न अपेक्षितः परिगणितः त्वया बन्धुः शकुन्तलायाः स्वजनवर्गः न पृष्टः एकैकम् परस्परम् अन्योन्येच्छया इत्यर्थः

---

(१) प्राग्रसरः ।१।२।३।४।५।६।

(२) इमाए णाइ पुच्छिओ बन्धुअणो ।१।२।५।

इमाए ण तुए पुच्छिओ बन्धू ।३।

इमाए तुए वि णाइ पुच्छिओ बन्धुअणो ।४।

इमाए णाइ पुच्छिओ अ बन्धुअणो ।६।७।

शकुन्तला । आत्मगतम् । किं णु क्खु अज्जउत्तो भणादि (क) ।

राजा । किमिदमुपन्यस्तम् (१) (ख) ।

शकुन्तला । आत्मगतम् । पावओ क्खु वअणोवणासो (ग) ।

शार्ङ्गरवः । कथमिदं नाम । भवन्त एव सुतरां लोकवृत्तान्तनिष्णाताः (घ) ।

सतीमपि ज्ञातिकुलैकसंश्रयां
जनोऽन्यथा भर्त्तृमतीं विशङ्कते ।
अतः समीपे परिणेतुरिष्यते
तदप्रियापि (२) प्रमदा स्वबन्धुभिः (ङ) ॥

युवाभ्याम् एवं चरिते अनुष्ठिते सति एकस्मै युवयोरेकस्यार्थे एकं युवयोरन्यं किं भणामि कथयामि ईदृशे विषये नान्यः किमपि कर्त्तुमर्हतीत्यर्थः । आर्य्या जातिः ।

(क) किं नु खलु आर्य्यपुत्त्रः भणति ।

(ख) उपन्यस्तम् उपस्थापितम् ।

(ग) पावकः खलु वचनोपन्यासः ।

(घ) सुतराम् अतिशयेन लोकवृत्तान्तनिष्णाताः लोकव्यवहाराभिज्ञाः ।

(ङ) भर्त्तृमतीं विद्यमानपतिकां ज्ञातिकुलं पितृगृहम् एकः केवलः संश्रयः निवासः यस्याः तां तथोक्तां नियतपितृगृहवासिनीमित्यर्थः सतीं साध्वीम् अपि प्रमदां जनः लोकः अन्यथा प्रकारान्तरेण विशङ्कते असाध्वीयमित्येवं सम्भावयति अतः अस्मात् हेतोः तादृशजनवादपरिहारार्थमित्यर्थः तस्य परिणेतुः अप्रिया अपि प्रमदा स्वबन्धुभिः प्रमदाया बन्धुजनेन परिणेतुः भर्त्तुः समीपे इष्यते अभिलष्यते प्रमदाया भर्त्तृसहवास एव समीचीनः कल्पः इति मन्यते इत्यर्थः । वंशस्थविलं वृत्तम् ।

---

(१) आः किमिदमुपन्यस्तम् । १ । किमिदमुपन्यस्तम् । २ । ३ । ४ । ५ ।

(२) प्रियाप्रियापि । १ । तदप्रियापि । २ । ३ । ४ । ५ । प्रियाप्रिया वा । ६ ।

राजा । किं चात्रभवती मया परिणीतपूर्व्वा (क) ।

शकुन्तला । सविषादम् । आत्मगतम् । हिअअ संपतं दे आसङ्का (१) (ख) ।

शार्ङ्गरवः ।

किं कृतकार्य्यद्वेषाद्
धर्म्मं प्रति विमुखतोचिता राज्ञः(२) (ग) ।

राजा । कुतोऽयमसत्कल्पनाप्रश्नः (घ) ।

शार्ङ्गरवः ।

मूर्च्छन्त्यमी विकाराः प्रायेणैश्वर्य्यमत्तेषु (ङ) ।

राजा । विशेषेणाधिक्षिप्तोऽस्मि ।

गौतमी । जाते मुहुत्तअं मा लज्जसु । अवणइस्सं दाव दे ओउण्ठणं तदो तुमं भत्तारो अहिजाणिस्सदि (च) ।

यथोक्तं करोति ।

(क) किं च किं नु ।

(ख) हृदय साम्प्रतं ते आशङ्का ।

साम्प्रतम् अधुना ते तव आशङ्का आर्य्यपुत्रः परिगृह्णीयाद्वा न वा इत्येवंरूपा आपतिता इति वाक्यशेषः ।

(ग) कृतकार्य्यद्वेषात्— कृते स्वेच्छया अनुष्ठिते कार्य्ये गान्धर्व्वेण विधानेन शकुन्तलापरिणयरूपे द्वेषात् अनादरात् तदपलापादिति यावत् ।

(घ) कुतः कस्मात् कं हेतुमवलम्ब्येत्यर्थः अयम् असत्याः अधर्म्मायाः कल्पनायाः कृतकार्य्यद्वेषनिबन्धनधर्म्मातिक्रमरूपायाः क्रियायाः प्रश्नः अनुयोगः ।

(ङ) ऐश्वर्य्यमत्तेषु ऐश्वर्य्यमदान्धेषु जनेषु अमी विकाराः चित्तविकृतयः प्रायेण बाहुल्येन मूर्च्छन्ति प्रादुर्भवन्ति । आर्य्या जातिः ।

(च) जाते मुहूर्त्तं मा लज्जस्व । अपनेष्यामि तावत् ते अवगुण्ठनं ततः त्वां भर्त्ता अभिज्ञास्यति ।

---

(१) संपतं दे आसङ्का । १ । २ । ४ । ५ । ६ । ७ ।
संपडिआ दाणीं दे आसङ्का । ३ ।

(२) किं कृतकार्य्यद्वेषो धर्म्मं प्रति विमुखता कृतावज्ञा । १ । २ । ३ । ४ । ५ । ६ ।

राजा । शकुन्तलां निर्व्वर्ण्य । आत्मगतम् ।

दूदमुपनतमेवं रूपमक्लिष्टकान्ति
प्रथमपरिगृहीतं स्यान्नवेति व्यवस्यन् (१) ।
भ्रमर इव विभाते कुन्दमन्तस्तुषारं
नच खलु परिभोक्तुं नैव शक्नोमि हातुम् (क) ॥

विचारयन् स्थितः ।

प्रतीहारी (२) । अहो धम्मावेक्खिआ भत्तुणो । एरिसं णाम सुहोवणअं रूवं देक्खिअ को अणो विचारेदि (ख) ।

शार्ङ्गरवः । भो राजन् किमिति (३) जोषमास्यते (ग) ।

राजा । भोस्तपोधनाः (४) चिन्तयन्नपि न खलु स्वीकरणम्

(क) एवम् अनेन प्रकारेण उपनतम् उपस्थितम् अक्लिष्टकान्ति अम्लानशोभम् इदं रूपम् इयमाकृतिः प्रथमं पूर्व्वं परिगृहीतं पत्नीत्वेन स्वीकृतं स्यात् न वेति व्यवस्यन् पर्य्यालोचयन् अहमितिशेषः भ्रमरः विभाते प्रभाते अन्तः अभ्यन्तरे तुषारः हिमं यस्य तत् तथोक्तं हिमाच्छन्नमित्यर्थः कुन्दं तदाख्यं पुष्पम् इव नच नापि परिभोक्तुं नैव नापि हातुं परित्यक्तुं शक्नोमि खलु । मालिनी वृत्तम् ।

(ख) अहो धर्म्मावेक्षिता भर्त्तुः । ईदृशं नाम सुखोपनतं रूपं दृष्ट्वा कः अन्यः विचारयति ।

धर्म्मावेक्षिता— धर्म्मम् अवेक्षते अनुसरतीति धर्म्मावेक्षी तस्य भावः धर्म्मावेक्षिता । सुखोपनतम् अनायासोपस्थितम् ।

(ग) किमिति जोषमास्यते— किमिति किमर्थं जोषं तूष्णीम् आस्यते मौनमवलम्ब्य स्थीयते ।

---

(१) व्यवस्यन् । १ । ४ । ५ । ६ ।
अध्यवस्यन् । २ । ३ ।
(२) प्रतीहारी । १ । २ । ४ । ५ ।
प्रतीहारी । जनान्तिकम् । ३ ।
(३) किमिति । १ । २ । ४ ।
किमिदम् । ६ ।
(४) तपोधनाः । १ । २ । ३ । ५ । ६
तपस्विनः । ४ ।

अत्रभवत्याः स्मरामि। तत् कथमिमाम् अभिव्यक्तसत्त्वलक्षणां प्रति आत्मानं क्षेत्रिणमाशङ्कमानः प्रतिपत्स्ये (क)।

शकुन्तला। अपवार्य्य। अज्जउत्तस्स (१) परिणए एव्व संदेहो। कुदो दाणिं मे दूराहिरोहिणी (२) आसा (ख)।

शार्ङ्गरवः। मा तावत्

कृताभिमर्षामनुमन्यमानः
सुतां त्वया नाम मुनिर्विमान्यः।
मुष्टं प्रतिग्राहयता स्वमर्थं
पात्रीकृतो दस्युरिवासि येन (ग)॥

(क) स्वीकरणं पत्नीत्वेन परिग्रहम्। अभिव्यक्तसत्त्वलक्षणाम्—अभिव्यक्तानि विस्पष्टमाविर्भूतानि सत्त्वलक्षणानि गर्भचिह्नानि यस्याः तां तथोक्ताम्। आत्मानं क्षेत्रिणमाशङ्कमानः प्रतिपत्स्ये— आत्मानं क्षेत्रं पत्नी तदस्यास्तीति तं तादृशम् आशङ्कमानः अभिमन्यमानः प्रतिपत्स्ये एनामङ्गीकरिष्यामि। अन्यसहयोगेन यस्य पत्न्या गर्भो भवति स क्षेत्रीति कथ्यते यस्य च सहयोगेन गर्भो भवति स वीजीति कथ्यते। यद्यहमेनाम् आविर्भूतगर्भलक्षणां गृह्णीयां तदा लोको मां क्षेत्रिणं मंस्यते तच्च मह्यं न रोचते अतो नाहमेनां ग्रहीष्यामीत्यर्थः।

(ख) आर्य्यपुत्रस्य परिणये एव सन्देहः। कुतः इदानीं मे दूराधिरोहिणी आशा।

दूराधिरोहिणी आशा महिषी भूत्वा ऐश्वर्य्यसुखसम्भोगेन कालमतिवाहयिष्यामीत्यादिरूपा।

(ग) कृतः अभिमर्षः धर्षणं यस्याः सा तां प्रलोभनादिना स्ववशमानीय कृतसम्भोगामित्यर्थः सुतां तनयाम् अनुमन्यमानः अनुमोदमानः निरतिशयानुग्रहबुद्ध्या युवयोः परिणयमङ्गीकुर्व्वाण इत्यर्थः मुनिः काश्यपः त्वया मा तावत्

---

(१) अज्जस्स। १। २। ६।
अज्ज। ३।
अज्जउत्तस्स। ४। ५। ७।

(२) दूराहिरोहिणी। १। २। ३। ६। ७।
दूरारोहिणी। ५।

शारद्वतः। शार्ङ्गरव विरम त्वमिदानीम्। शकुन्तले वक्तव्यमुक्तमस्माभिः। सोऽयमत्रभवानेवमाह। दीयतामस्मै प्रत्ययप्रतिवचनम् (क)।

शकुन्तला। अपवार्य्य। इमं अवत्थन्तरं गदे तारिसे अणुराए किं वा सुमराविदेण। अत्ता दाणिं मे सोअणीओ त्ति (१) ववसिदं एदं (२)। प्रकाशम्। अज्जउत्त। अर्द्धोक्ते। संसइदे परिणए (३) ण एसो समुदाआरो। पोरव जुत्तं णाम दे (४) तह पुरा अस्समपदे सहावुत्ताणहिअअं इमं जणं समअपुव्वं पआरिअ एरिसेहिं अक्खरेहिं पच्चाक्खादुं (ख)।

विमान्यो नाम न कथञ्चित् त्वत्तो विमाननामर्हतीत्यर्थः। मुष्टं चोरितं स्वं निजम् अर्थं कन्यारूपं धनं प्रतिग्राहयता प्रतिगृह्यतामयमित्युपच्छन्दयता येन मुनिना त्वं दस्युः चौरः इव पात्रीकृतः सम्प्रदानत्वेन कल्पितः। इन्द्रवज्रोपेन्द्रवज्रयोः सङ्कररूपा उपजातिः वृत्तम्।

(क) प्रत्ययप्रतिवचनं विश्वासकरमुत्तरम्।

(ख) इदम् अवस्थान्तरं गते तादृशे अनुरागे किं वा स्मारितेन। आत्मा इदानीं मे शोचनीय इति व्यवसितम् एतत्। आर्य्यपुत्र। संशयिते परिणये न एषः समुदाचारः। पौरव युक्तं नाम ते तथा पुरा आश्रमपदे स्वभावोत्तानहृदयम् इमं जनं समयपूर्व्वं प्रतार्य्य ईदृशैः अक्षरैः प्रत्याख्यातुम्।

स्मारितेन स्मारणेन। शोचनीयः जनापवादात् शुद्धिं नेयः विशोधनीय इत्यर्थः। समुदाचारः सम्भाषणप्रकारः। स्वभावोत्तानहृदयम्— स्वभावेन प्रकृत्या उत्तानं सरलं हृदयं यस्य तम्। समयपूर्व्वं प्रतिज्ञापूर्व्वकम्।

---

(१) सोअणीओ।१।२।३।४।५।७।

(२) ववसिदं एदं।१।२।३।६।७। ववसिदं।४।५।

(३) संसइदे दाणिं।१।२।३।६।७। संसइदे परिणए।४। संसइदे।५।

(४) ण जुत्तं णाम दे।१।२।५।६। जुत्तं णाम दे।३।४। ण जुत्तं दे।७।

राजा। शान्तं पापम् (१)।

व्यपदेशमाविलयितुं (२) किमीहसे जनमिमं च पातयितुम्।

॥ कूलङ्कषेव सिन्धुः प्रसन्नमम्भस्तटतरुञ्च (क)॥

शकुन्तला। होउ। जइ परमत्थतो परपरिग्गहसङ्किणा तुए एव्वं पउत्तं (३) ता अहिण्णाणेण (४) तुह आसङ्कं अवणइस्सं (ख)।

राजा। उदारः कल्पः।

शकुन्तला। मुद्रास्थानं परामृश्य। हद्धी हद्धी अङ्गुलीअअसुण्णा मे अङ्गुली (ग)।

सविषादं गौतमीमवेक्षते।

गौतमी। णूणं दे सक्कावआरब्भन्तरे सचीतित्थसलिलं वन्दमाणाए पब्भट्ठं अङ्गुलीअअं (घ)।

(क) व्यपदेशम् आत्मीयं कुलम्। कूलङ्कषा— कूलं तटं कषति भिनत्तीति तथोक्ता।

(ख) भवतु। यदि परमार्थतः परपरिग्रहशङ्किना त्वया एवं प्रवृत्तं तत् अभिज्ञानेन तव आशङ्काम् अपनेष्यामि।

परपरिग्रहशङ्किना मां परकीयां महिलां मन्यमानेन।

(ग) हाधिक् हाधिक् अङ्गुरीयकशून्या मे अङ्गुली।

(घ) नूनं ते शक्रावताराभ्यन्तरे शचीतीर्थसलिलं वन्दमानायाः प्रभ्रष्टम् अङ्गुरीयकम्।

शक्रावताराभ्यन्तरे— शक्रावतारस्य तदाख्यस्य ग्रामस्य अभ्यन्तरे।

---

(१) शान्तं पापम्। १। २। ४। ५। कर्णौ पिधाय। शान्तं शान्तम्। ३।

(२) आविलयितुम्। १। २। ४। ५। आलपन्ती। ३।

(३) एव्वं पउत्तं। १। २। ४। ५। ७। एव्वं वत्तुं पउत्तं। ३। ६।

(४) ता अहिण्णाणेण इमिणा। १। २। ४। अहिण्णाणेण इमिणा। ३। ५। ७। ता अहिण्णाणेण। ६।

राजा । सस्मितम् । इदं तत् (१) प्रत्युत्पन्नमति स्त्रैणमिति यदुच्यते (क) ।

शकुन्तला । एत्थ दाव विहिणा दंसिअं पहुत्तणं । अवरं दे कहिस्सं (ख) ।

राजा । श्रोतव्यमिदानीं संवृत्तम् ।

शकुन्तला । णं एकस्सिं दिअहे (२) णोमालिआमण्डवे णलिणीपत्तभाअणगअं उदअं तुह हत्थे सण्णिहिअं आसि (ग) ।

राजा । शृणुमस्तावत् ।

शकुन्तला । तक्खणं सो मे पुत्तकिअओ दीहापङ्गो णाम मअपोतओ उवट्ठिओ । तुए अअं दाव पढमं पिअउ त्ति अणुअम्पिणा उवच्छन्दिओ उअएण । ण उण दे अपरिचआदो हत्थब्भासं उवगओ । पच्छा तस्सिं एव्व मए गहीदे सलिले णेण किओ पणओ । तदा तुमं इत्थं पहसिओ सि सव्वो सगन्धेसु विस्ससइ दुवे वि एत्थ आरण्णओ त्ति (घ) ।

शचीतीर्थसलिलम्— शचीतीर्थं नाम शक्रावताराभ्यन्तरवर्त्ती तीर्थविशेषभूतो जलाशयः तस्य सलिलम् ।

(क) प्रत्युत्पन्नमति स्त्रैणम्— स्त्रीणां समूहः स्त्रैणं स्त्रीजातिरित्यर्थः प्रत्युत्पन्ना तत्कालोदिता मतिः प्रतिभा यस्य तत् तथोक्तम् ।

(ख) अत्र तावत् विधिना दर्शितं प्रभुत्वम् । अपरं ते कथयिष्यामि ।

(ग) ननु एकस्मिन् दिवसे नवमालिकामण्डपे नलिनीपत्रभाजनगतम् उदकं तव हस्ते सन्निहितम् आसीत् ।

(घ) तत्क्षणं सः मे पुत्रकृतकः दीर्घापाङ्गः नाम मृगपोतः उपस्थितः । त्वया अयं तावत् प्रथमं पिबतु इति अनुकम्पिना उपच्छन्दितः उदकेन । न

(१) इदं तत् । १ । २ । ४ । ५ । ६ । इदम् । ३ ।

(२) एक्कदिअहे । १ । २ । ३ । एक्कस्सिं दिअहे । ४ । ५ । ६ । ७ ।

राजा । एवमादिभिरात्मकार्य्यनिर्वर्त्तिनीनामनृतमयवाङ्मधुभिराकृष्यन्ते विषयिणः (क) ।

गौतमी । महाभाअ ण अरिहसि एव्वं मन्तिउं । तवोवणसंवड्ढिओ अणभिणो अअं जणो कइतवस्स (ख) ।

राजा । तापसवृद्धे

स्त्रीणामशिक्षितपटुत्वममानुषीषु (१)
संदृश्यते किमुत याः प्रतिबोधवत्यः ।
प्रागन्तरिक्षगमनात् स्वमपत्यजातम्
अन्यैर्द्विजैः परभृताः खलु पोषयन्ति (ग) ॥

शकुन्तला । सरोषम् । अणज्ज अत्तणो हिअआणुमाणेण

पुनः ते अपरिचयात् हस्ताभ्यासम् उपगतः । पश्चात् तस्मिन् एव मया गृहीते सलिले अनेन कृतः प्रणयः । तदा त्वम् इत्थं प्रहसितः असि सर्व्वः सगन्धेषु विश्वसिति द्वौ अपि अत्र आरण्यकौ इति ।

उपच्छन्दितः अभ्यर्थितः । सगन्धेषु स्वजनेषु ।

(क) आत्मकार्य्यनिर्वर्त्तिनीनाम्— आत्मनां कार्य्यस्य प्रयोजनस्य निर्वर्त्तिनीनां सम्पादयित्रीणां स्वकार्य्यसाधनोद्यतानामित्यर्थः ।

(ख) महाभाग न अर्हसि एवं मन्त्रयितुम् । तपोवनसंवर्द्धितः अनभिज्ञः अयं जनः कैतवस्य ।

(ग) स्त्रीणां स्त्रीजातेः अशिक्षिताः अनुपदिष्टाश्च ताः पटवः चतुराश्च तासां भावः अशिक्षितपटुत्वं स्वभावसिद्धं चतुरत्वमित्यर्थः अमानुषीषु मानुषव्यतिरिक्तासु तिर्य्यग्जातीयासु स्त्रीषु संदृश्यते लक्ष्यते किमुत याः प्रतिबोधवत्यः बुद्धिशक्तिशालिन्यः मानुष्य इत्यर्थः मानुषीणामशिक्षितपटुत्वे किमु वक्तव्यमिति भावः । वसन्ततिलका वृत्तम् ।

---

(१) ऽमानुषीषु । १ । २ । ४ । ५ । ६ । ऽमानुषीणाम् । ३ ।

पेक्खसि । को दाणिं अस्सो धम्मकञ्चुअप्पवेसिणो तिणच्छस्सकूवोवमस्स तव अणुकिदिं पडिवज्जिस्सदि (१) (क) ।

राजा । आत्मगतम् । सन्दिग्धबुद्धिं मां कुर्वन् अकैतव इवास्याः कोपो लक्ष्यते (ख) । तथाह्यनया (२)

मय्येव विस्मरणदारुणचित्तवृत्तौ
वृत्तं रहः प्रणयमप्रतिपद्यमाने ।
भेदाद् भ्रुवोः कुटिलयोरतिलोहिताक्ष्या
भग्नं शरासनमिवातिरुषा स्मरस्य (ग) ॥

(क) अनार्य्ये आत्मनः हृदयानुमानेन प्रेक्षसे । कः इदानीम् अन्यः धर्म्मकञ्चुकप्रवेशिनः तृणच्छन्नकूपोपमस्य तव अनुकृतिं प्रतिपत्स्यते ।

धर्म्मकञ्चुकप्रवेशिनः— धर्म्मरूपे कञ्चुके वारबाणे प्रवेशिनः प्रविष्टस्य धार्म्मिकवत् प्रतीयमानस्येत्यर्थः । अनुकृतिम् अनुकरणम् आचरितानुसरणमिति यावत् ।

(ख) मां सन्दिग्धबुद्धिं कुर्व्वन् मम मनसि सन्देहमुत्पादयन् अस्याः कोपः अविद्यमानं कैतवं कपटं यस्मिन् सः तथोक्तः अकृत्रिमः इत्यर्थः सः इव लक्ष्यते प्रतीयते मदीयं मनः नेयं परिणीतपूर्व्वेति स्थिरनिश्चयमासीत् अधुना तु अस्याः कोपप्रकारदर्शनेन मम मनसि परिणये संशयो जायते इत्यर्थः ।

(ग) विस्मरणेन स्मरणतिरोधानेन दारुणा अतिकठिना चित्तवृत्तिः यस्य तस्मिन् अतएव रहः विजनप्रदेशे वृत्तं सम्पन्नं प्रणयम् अप्रतिपद्यमाने अस्वीकुर्व्वति मयि विषये एव अतिरुषा उत्कटेन रोषेण अतिलोहिते अधिकरक्ते अक्षिणी नयने यस्याः तथोक्तया अनया कुटिलयोः वक्रयोः भ्रुवोः भेदात् भङ्गात् स्मरस्य मन्मथस्य शरासनं धनुः भग्नमिव । वसन्ततिलका वृत्तम् ।

---

(१) पडिवदिस्सदि । १ । २ । ४ । ५ । हिमार्त्त इव वेपते मधुर एष बिम्बाधरः
पडिवज्जिस्सदि । ३ । ६ । ७ । स्वभावविनते भ्रुवौ युगपदव भेदं गते ॥

(२) तथाह्यनयेत्येतदनन्तरं ।३। पुस्तके किञ्च ।
न तिर्य्यगवलोकितं स्फुरति लोचनं केवलं अयमंशो दृश्यते ।
वचो न परुषाक्षरं न च पदेषु संसज्यते ।

पुरोहितः (१)। भद्रे प्रथितं दुष्यन्तस्य चरितं तथापीदं न लक्षये (क)।

शकुन्तला। सुट्ठु दाव अत्त सच्छन्दचारिणी किअ म्हि जा अहं इमस्स पुरुवंसप्पच्चएण मुहमहुणो हिअअट्ठिअविसस्स हत्थब्भासं उवगआ (ख)।

पटान्तेन मुखमाहृत्य रोदिति।

शार्ङ्गरवः। इत्थमात्मकृतं परिहतं (२) चापलं दहति (ग)।

अतः परीक्ष्य कर्त्तव्यं विशेषात् सङ्गतं रहः।
अज्ञातहृदयेष्वेवं वैरीभवति सौहृदम् (घ)॥

(क) भद्रे साधुशीले दुष्यन्तस्य चरितं क्रियाजातं दुष्यन्तेन यदा यत् कृतमित्यर्थः प्रथितं सर्व्वजनविदितं तथापि इदं भवत्याः परिणयरूपं कार्य्यं न लक्षये न पश्यामि यदि भवती दुष्यन्तेन परिणीता भवेत् तदा एतदस्माकं विदितं स्यादित्यर्थः।

(ख) सुष्ठु तावत् अत्र स्वच्छन्दचारिणी कृता अस्मि या अहम् अस्य पुरुवंशप्रत्ययेन मुखमधोः हृदयस्थितविषस्य हस्ताभ्यासम् उपगता।

पुरुवंशप्रत्ययेन महात्मनः पुरोर्निष्कलङ्के वंशे सम्भूतोऽयं न अस्मिन् अधर्म्माचरणं सम्भाव्यत इति विश्वासेन।

(ग) इत्थम् अनेन प्रकारेण आत्मना कृतं चपलस्य कर्म्म चापलम् अविमृश्यकारिता परिहतं व्याहतं सत् दहति अत्यर्थं सन्तापयति अविमृश्यकारिता हि व्याहता सती निरतिशयसन्तापकारणतया परिणमतीत्यर्थः अतएव

सहसा विदधीत न क्रियामविवेकः परमापदां पदम्।

इति व्याहरन्ति नीतिविदः।

(घ) अतः एतस्मात् कारणात् रहः विजने सङ्गतं प्रणयः विशेषात् परीक्ष्य सविशेषं पर्य्यालोच्य कर्त्तव्यम् अज्ञातहृदयेषु अपरिज्ञातचित्तवृत्तिषु जनेषु

---

(१) प्रकाशम्।१।२।३।४।५। (२) परिहृतम्।१।२।४।५।६। प्रतिहतम्।३।

राजा । अयि भोः किमत्रभवतीप्रत्ययादेव अस्मान् संयुतदोषाक्षरैः (१) क्षिणुथ (क) ।

शार्ङ्गरवः (२) । सासूयम् । श्रुतं भवद्भिरधरोत्तरम् (ख) ।

आ जन्मनः शाठ्यमशिक्षितो य-
स्तस्याप्रमाणं वचनं जनस्य ।
परातिसन्धानमधीयते यै-
र्विद्येति ते सन्तु किलाप्तवाचः (ग) ॥

राजा । भोः सत्यवादिन् (३) अभ्युपगतं तावदस्माभिरेवम् । किं पुनरिमामतिसन्धाय लभ्यते (घ) ।

विषये सौहृदं मैत्री एवम् इत्थं यथाधुना वयमवलोकयाम इत्यर्थः वैरीभवति विद्वेषे पर्य्यवस्यति । पथ्यावक्त्रं वृत्तम् ।

(क) किं कथम् अत्रभवतीप्रत्ययादेव अत्रभवत्यां विश्वासादेव एवकारेण प्रमाणान्तरनिरासः अस्मान् संयुतः संहृष्टः दोषः येषु तादृशैः अक्षरैः तादृशाक्षरघटितवचनोपन्यासेन क्षिणुथ हिंस्थ प्रमाणान्तरैरपरिपुष्टात् अत्रभवतीविश्वासात् उत्कटदोषारोपणेन अस्मत्चरितदूषणं एकान्तमनुचितमित्यर्थः ।

(ख) सासूयम्— असूया असहनं तया सह यथा तथा राजकृतं दोषारोपम् असहमान इत्यर्थः । अधरोत्तरम् अधरं जघन्यम् उत्तरं प्रत्यभियोगः अतः परीक्ष्य कर्त्तव्यमित्यादिना शार्ङ्गरवकृतस्याभियोगस्य राज्ञा किमत्रभवतीप्रत्ययादेवेत्यादिना उत्तररूपः प्रत्यभियोगः कृतः तञ्च प्रत्यभियोगं सोढुमनीशेन शार्ङ्गरवेण श्रुतं भवद्भिरधरोत्तरमिति सकोपमुक्तम् ।

(ग) परातिसन्धानं परवञ्चनम् । आप्तवाचः विश्वस्तवचसः येषां वचसि विश्वासः कर्त्तुं शक्यमित्यर्थः । इन्द्रवज्रोपेन्द्रवज्रयोः सङ्कररूपा उपजातिः वृत्तम् ।

(घ) सत्यवादिन्— सोत्प्रासोक्तिरियम् । अभ्युपगतं तावदस्माभिरेवम्

---

(१) संयुतदोषाक्षरेण । १ । २ । ३ । ५ ।
संयुतदोषाक्षरैः । ४ । ६ ।
(२) शारद्वतः । १ । २ ।
शार्ङ्गरवः । ३ । ४ । ५ ।
(३) सत्यवादिनः । १ । ४ । ५ ।
सत्यवादिन् । २ । ३ । ६ ।

शार्ङ्गरवः । विनिपातः (क) ।

राजा । विनिपातः पौरवैः प्रार्थ्यत इति न श्रद्धेयमेतत् (ख) ।

शारद्वतः । शार्ङ्गरव किमुत्तरेण (१) । अनुष्ठितो गुरोः सन्देशः (२) । प्रतिनिवर्त्तामहे वयम् । राजानं प्रति ।

तदेषा भवतः कान्ता त्यज वैनां गृहाण वा ।
उपपन्ना हि दारेषु प्रभुता सर्वतोमुखी (ग) ॥

गौतमि गच्छाग्रतः ।

प्रस्थिताः ।

शकुन्तला । कहं इमिणा किदवेण विप्पलद्ध म्हि तुम्हे वि मं परिच्चअह (३) (घ) ।

अनुप्रतिष्ठते ।

एवं परवञ्चनम् अस्माभिर्विद्येति अधीयते इत्येतत् अस्माभिस्तावत् अभ्युपगतम् स्वीकृतम् । अतिसन्धाय वञ्चयित्वा ।

(क) विनिपातः विनाशः ।

(ख) प्रार्थ्यते असदाचरितेन स्वगतं कर्त्तुमिष्यते ।

(ग) उपपन्ना अविरुद्धा । सर्व्वतोमुखी— सर्व्वतः सर्व्वासु दिक्षु मुखं यस्याः सा सर्व्वतोमुखी सर्व्वतः प्रसारिणी परिच्छेदातीतेत्यर्थः । पथ्यावक्त्रं वृत्तम् ।

(घ) कथम् अनेन कितवेन विप्रलब्धा अस्मि यूयम् अपि मां परित्यजथ । कथमित्यस्य परित्यजथ इत्यनेन अन्वयः ।

---

(१) उत्तरेण । १ । २ । ४ । ५ ।
उत्तरोत्तरेण । ३ ।

(२) गुरोः सन्देशः । १ । २ । ४ । ५ ।
गुरुसन्देशः । ३ ।

(३) मं परिदेइदिणं परिच्चअह । १ ।
। २ । ४ । ५ । ७ ।
मं परिच्चअह । ३ । ६ ।

गौतमी । स्थिता । वच्छ सङ्गरव अणुगच्छदि दूअं क्खु णो कलुणपरिदेइणी सउन्तला । पच्चादेसपरुसे भत्तुणि किं वा मे पुत्तिआ करउ (१) (क) ।

शार्ङ्गरवः । सरोषं वचित्वा । किं पुरोभागे (ख) स्वातन्त्र्यमवलम्बसे (२) ।

शकुन्तला । भीता वेपते ।

शार्ङ्गरवः । शकुन्तले

यदि यथा वदति क्षितिपस्तथा
त्वमसि किं पितुरुत्कुलया त्वया ।
अथ तु वेत्सि शुचि व्रतमात्मनः
पतिकुले तव दास्यमपि क्षमम् (ग) ॥

तिष्ठ साधयामो वयम् ।

राजा । भोस्तपस्विन् किमत्रभवतीं विप्रलभसे ।

(क) वत्स शार्ङ्गरव अनुगच्छति इयं खलु अस्मान् करुणपरिदेविनी शकुन्तला । प्रत्यादेशपरुषे भर्त्तरि किं वा मे पुत्रिका करोतु ।

प्रत्यादेशपरुषे— प्रत्यादेशेन प्रत्याख्यानेन परुषे निष्ठुरे ।

(ख) पुरोभागे अनुचितप्रवर्त्तिनि दुश्चारित्रे वा ।

(ग) किं पितुरुत्कुलया त्वया— उत्कुलया उत्क्रान्तकुलमर्यादया स्वच्छन्दचारिण्या इत्यर्थः त्वया पितुः काश्यपस्य किं कः सम्बन्धः नासौ त्वामीदृशीं पुनर्ग्रहीष्यतीत्यर्थः । शुचि निष्कलङ्कम् । व्रतं चरित्रम् । क्षमम् उचितम् । द्रुतविलम्बितं वृत्तम् ।

---

(१) करिस्सइ । १ । २ । ४ । ५ ।
करइ । १ ।
करउ । ६ । ७ ।
। १ । २ । ४ । ५ ।
कुं पुरोभागे स्वातन्त्र्यमवलम्ब्यते । ३ ।

(२) किं पुरोभागे स्वातन्त्र्यमवलम्बसे

कुमुदान्येव शशाङ्कः सविता बोधयति पङ्कजान्येव।
वशिनां हि परपरिग्रहसंश्लेषपराङ्मुखी वृत्तिः (क)॥

शार्ङ्गरवः। यदा तु पूर्ब्बवृत्तमन्यसङ्गाद्विस्मृतो भवान् तदा कथमधर्म्मभीरुः (ख)।

राजा। भवन्तमेवात्र गुरुलाघवं पृच्छामि (ग)।

मूढः स्यामहमेषा वा वदेन्मिथ्येति संशये।
दारत्यागी भवाम्याहो परस्त्रीस्पर्शपांशुलः (घ)॥

पुरोहितः। विचार्य्य। यदि तावदेवं क्रियताम्।

राजा। अनुशास्तु मां भगवान्।

पुरोहितः। अत्रभवती तावत् आ प्रसवादस्मद्गृहे तिष्ठतु। कुत इदमुच्यत इति चेत् त्वं साधुभिरुद्दिष्टः (१) प्रथममेव चक्र-

(क) आर्य्या जातिः।

(ख) यदा तु यदि पुनः अन्यसङ्गात् विषयान्तरव्यासङ्गात् भवान् पूर्ब्बवृत्तं काश्यपतनयापरिणयरूपं पूर्ब्बकृतं कर्म्म विस्मृतः विस्मृतवान् भवेत् तदा तर्हि कथं किमर्थम् अधर्म्मभीरुः अधर्म्मभयाशङ्की स्यात् एतस्यां परित्यक्तोढायामधर्म्मो भविष्यतीति भयेन एतत्परिग्रहे पराङ्मुखो भवितुं नार्हति भवानिति भावः।

(ग) अत्र अस्मिन् उपस्थिते विषये भवन्तमेव गुरुश्च लघुश्च गुरुलघू तयोर्भावः गुरुलाघवं गौरवं लाघवञ्च पृच्छामि उभावेव पक्षौ दोषाश्रितौ तत्र कस्मिन् पक्षे दोषस्य गौरवं कस्मिन् वा लाघवम् इति निश्चेतुमसमर्थोऽस्मि भवान् मम संशयमपनुदतु इत्यर्थः। सन्निहितं कुलपुरोहितं प्रत्युक्तिरियम्।

(घ) मूढः विस्मरणेन हृतधीः। परस्त्रीस्पर्शपांशुलः— परस्त्रियाः स्पर्शेन अभिमर्षेण पांशुलः पातकी। पथ्यावक्त्रं वृत्तम्।

---

(१) कुत इदमुच्यत इति चेत् त्वं साधुभिरुद्दिष्टः। १। २। ४। ५। राजा। कुत इदमुच्यते। पुरोहितः। त्वं साधुभिरुद्दिष्टः। ३।

वर्त्तिनं पुत्रं जनयिष्यसीति । स चेत् मुनिदौहित्रस्तल्लक्षणोपपन्नो भविष्यति अभिनन्द्य शुद्धान्तमेनां प्रवेशयिष्यसि । विपर्य्यये तु पितुरस्याः समीपनयनमवस्थितमेव (क) ।

राजा । यथा गुरुभ्यो रोचते ।

पुरोहितः । वत्से अनुगच्छ माम् ।

शकुन्तला । भअवदि वसुहे देहि मे विअरं (ख) ।

रुदती प्रस्थिता । निष्क्रान्ता सह पुरोधसा तपस्विभिश्च (१) ।

राजा । शापव्यवहितस्मृतिः शकुन्तलागतमेव चिन्तयति (ग) ।

नेपथ्ये

आश्चर्य्यम् (२) ।

राजा । आकर्ण्य । किं नु खलु स्यात् ।

प्रविश्य

पुरोहितः । सविस्मयम् । देव अद्भुतं खलु संवृत्तम् ।

राजा । किमिव (३) ।

पुरोहितः । देव परावृत्तेषु (घ) कण्वशिष्येषु

(क) उद्दिष्टः उपदिष्टः विज्ञापित इति यावत् ।

(ख) भगवति वसुधे देहि मे विवरम् ।

विवरं स्थानं पृथिवि विदीर्णा भव तेन मार्गेण अहं रसातलं प्रविशामि नाहमतःपरमिह लोके जीवितं धारयितुमुत्सहे इत्यर्थः ।

(ग) शकुन्तलागतं शकुन्तलासम्बद्धं विषयम् ।

(घ) परावृत्तेषु प्रतिनिवृत्तेषु ।

---

(१) सह तपस्विभिश्च । १ । २ । ४ ।
तपस्विभिश्च । ३ । ५ ।

(२) आश्चर्य्यम् । १ । ४ । ५ ।
आश्चर्य्यमाश्चर्य्यम् । ३ ।

(३) किमेवम् । १ । २ । ४ । ५ ।
किमिव । ३ ।

सा निन्दन्ती स्वानि भाग्यानि बाला
बाहूत्क्षेपं क्रन्दितुं च प्रवृत्ता (क) ।

राजा । किञ्च (ख) ।

पुरोहितः ।

स्त्रीसंस्थानं चाप्सरस्तीर्थमारात्
उत्क्षिप्यैनां ज्योतिरेकं जगाम (ग) ॥

सर्वे । विस्मयं रूपयन्ति ।

राजा । भगवन् प्रागपि सोऽस्माभिरर्थः प्रत्यादिष्ट एव किं वृथा तर्केणान्विष्यते । विश्राम्यतु भवान् (१) ।

पुरोहितः । विलोक्य । विजयस्व ।

निष्क्रान्तः ।

राजा । वेत्रवति पर्य्याकुलोऽस्मि शयनभूमिमार्गमादेशय ।

(क) बाहूत्क्षेपम्— बाहू उत्क्षिप्य चालयित्वा ।

(ख) किञ्च अन्यत् किं ततः किम् ।

(ग) स्त्रिया इव संस्थानम् आकृतिर्यस्य तादृशम् एकं ज्योतिः तेजोमयः पदार्थः आरात् दूरात् एनाम् उत्क्षिप्य भूतलात् गृहीत्वा अप्सरस्तीर्थम् अप्सरोभिः प्रत्यवेक्षितं गङ्गाया जलावतारविशेषं जगाम तदभिमुखं प्रतस्थे । यावत् साधुजनस्य अभिषेकसमयस्तिष्ठति तावत् अभिषेकक्रियाया निष्प्रत्यूह-निर्वाहप्रत्यवेक्षणार्थं पर्य्यायेण प्रतिदिनमेकैकया अप्सरसा तत्र सन्निहितया भवत इति पुराकालीनानां प्रतीतिरासीत् सैव च हस्तिनापुरादनतिदूर-वर्त्तिनो जलावतारस्यास्य अप्सरस्तीर्थसंज्ञानिदानम् । शालिनी वृत्तम् ।

(१) भवान् । १ । २ । ४ । ५ । भगवान् । ३ ।

प्रतीहारी । इदो इदो देओ (क) ।

प्रस्थिता ।

राजा ।

कामं प्रत्यादिष्टां स्मरामि न परिग्रहं मुनेस्तनयाम् ।
बलवत्तु दूयमानं प्रत्याययतीव मे हृदयम् (१) (ख) ॥

निष्क्रान्ताः सर्व्वे ।

पञ्चमोऽङ्कः ।

(क) इतः इतः देवः ।

(ख) कामं सत्यं प्रत्यादिष्टां प्रत्याख्यातां मुनेः काश्यपस्य तनयां परिग्रहं पत्नीं न स्मरामि इयं परिणीतपूर्व्वेति न कथमपि स्मृतिपथमारोहतीत्यर्थः तु किन्तु बलवत् अत्यर्थम् दूयमानम् उपतप्यमानं मे हृदयं कर्तृ प्रत्याययतीव अनिच्छतोऽपि मम परिणीतेयमिति विश्वासमुत्पादयतीवेत्यर्थः । आर्य्या जातिः ।

---

(१) मे चेतः । १ । मे हृदयम् । २ । ३ । ४ । ५ । ६ ।

ततः प्रविशति नागरिकः श्यालः पश्चात् बद्धपुरुषमादाय
रक्षिणौ च (क)।

रक्षिणौ। ताड़यित्वा। अले कुम्भिलआ. कहेसु कहिं तुए एशे मणिवन्धणुक्किणणामहेए (१) लाअकीए अङ्गुलीअए शमाशादिए (ख)।

पुरुषः। भीतिनाटितकेन (ग)। पशीदन्ते भावमिश्शे। अहके ण एलिशकम्मकाली (घ)।

प्रथमः। किं क्खु शोहणे वम्हणे त्ति कलिअ रणा पड़िग्गहे दिण्णे (ङ)

(क) नागरिकः श्यालः नगररक्षाधिकृतो राजश्यालकः। पश्चात् श्यालस्य पृष्ठतः। बद्धपुरुषम् बद्धबाहुं कञ्चित् नरम्।

(ख) अरे कुम्भिलक कथय कुतः त्वया एतत् मणिबन्धनोत्कीर्णनामधेयं राजकीयम् अङ्गुरीयकं समासादितम्।

कुम्भिलक चौर। मणिबन्धनोत्कीर्णनामधेयम्— मणेः मूल्यवतः प्रस्तरस्य बन्धनं निवेशनं निवेशितो मणिरित्यर्थः तस्मिन् उत्कीर्णं नामधेयं नाम यस्मिन् तत् तथोक्तम्।

(ग) भीतिनाटितकेन— भीतिः भयम् तस्या नाटितकम् अभिनयः तेन भयमभिनीयेत्यर्थः।

(घ) प्रसीदन्तु भावमिश्राः अहं न ईदृशकर्म्मकारी।

भावमिश्राः— भावाः विद्वांसश्च मिश्राः पूज्याश्च ते। ईदृशकर्म्मकारी परद्रव्यापहारी।

(ङ) किं खलु शोभनः ब्राह्मणः इति कृत्वा राज्ञा प्रतिग्रहः दत्तः।

शोभनः सदाचारपूतः दानार्ह इति यावत्।

---

(१) णामहेए। १। २। ३। ५। ६। ७। णामहेअङ्किए। ४।

पुरुषः। सुणाह दाणिं। अहके शक्कावदालब्भन्तलवाशी धीवले (क)।

द्वितीयः। पाडच्चला किं अम्हेहिं जादी पुच्छिदे (ख)।

श्यालः। सूअअ कहेउ सव्वं अणुक्कमेण। मा णं अन्तरा पड़िबन्धह (ग)।

उभौ। जं आवुत्ते आणवेदू। कहेसु (घ)।

पुरुषः। अहके जालुग्गलादीहिं मच्छबन्धणोवाएहिं कुडुम्बभलणं कलेमि (ङ)।

श्यालः। विहस्य। विसुद्धो दाणिं (१) आजीवो (च)।

पुरुषः। भट्टा

शहजे किल जे विणिन्दिए णहु दे कम्म विवज्जणीअए।

(क) शृणुत इदानीम्। अहं शक्रावताराभ्यन्तरवासी धीवरः।

(ख) पाटच्चर किम् अस्माभिः जातिः पृष्टा।

पाटच्चर चौर।

(ग) सूचक कथयतु सर्व्वम् अनुक्रमेण। मा एनम् अन्तरा प्रतिबधान।

सूचक—इदं रक्षिणोरेकतरस्य नाम।

(घ) यत् आवुत्तः आज्ञापयति। कथय।

आवुतः माननीयो जनः।

(ङ) अहं जालोद्गालादिभिः मत्स्यबन्धनोपायैः कुटुम्बभरणं करोमि।

जालोद्गालादिभिः जालबड़िशप्रभृतिभिः। कुटुम्बभरणं पोष्यवर्ग-परिपालनम्।

(च) विशुद्धः इदानीम् आजीवः।

सोल्लासोक्तिरियम्।

---

(१) दाणिं। १।२।३।४।६।७। दाव। ५।

पशुमालणकम्मदालुणे अणुकम्पामिदुए वि सोत्तिए (क) ॥

श्यालः । तदो तदो (ख) ।

॥ पुरुषः । एकस्सिं दिअसे (१) खण्डसो लोहिअमच्छे मए कप्पिदे जाव (२) तस्स उदलअन्तले एदं लदणभासुलं अङ्गुलीअअं देक्खिअं । पच्छा अहके से विक्कआअ दंसअन्ते गहिदे भावमिस्सेहिं । मालेह वा मुञ्चेह वा अअं से आअमवुत्तन्ते(ग)।

(क) भर्त्तः

सहजं किल यत् विनिन्दितं नहि तत् कर्म्म विवर्ज्जनीयम् ।
पशुमारणकर्म्मदारुणः अनुकम्पामृदुः अपि श्रोत्रियः ॥

यत् कर्म्म यस्य सहजं जन्मना सिद्धं तत् विनिन्दितं विगर्हितम् अपि तस्य नहि विवर्ज्जनीयं परित्याज्यं अहं हि धीवरकुले समुत्पन्नः धीवरजातिश्च मत्स्यवधजीविनी अतो मत्स्यवधकर्म्म मम जन्मसिद्धं तच्च विनिन्दितमपि न मया परित्यक्तुमुचितमित्यर्थः पश्य श्रोत्रियः वेदपारगो ब्राह्मणः अनुकम्पामृदुः दयार्द्रचित्तः अपि पशुमारणकर्म्मणा पशुहिंसाव्यापारेण दारुणः अतिनिष्ठुरो भवति मा हिंस्यात् सर्व्वा भूतानीति निषेधवाक्यानुसारेण जीवहिंसा हि गर्हितं कर्म्म किन्तु पशुमारणस्य यागाङ्गतया यागानाञ्च श्रोत्रियस्य सहजकर्म्मत्वेन असौ दयार्द्रचित्तोऽपि सन् न पशुमारणकर्म्मणो निवर्त्तते। वैतालीयं वृत्तम् ।

(ख) ततः ततः ।

(ग) एकस्मिन् दिवसे खण्डशः रोहितमत्स्यः मया कल्पितः यावत् तस्य उदराभ्यन्तरे एतत् रत्नभासुरं अङ्गुरीयकं दृष्टम् । पश्चात् अहम् अस्य विक्रयाय दर्शयन् गृहीतः भावमिश्रैः । मारयत वा मुञ्चत वा अयम् अस्य आगमवृत्तान्तः ।

---

(१) एक्कदिअसे । १ । २ । ३ । (२) जाव । १ । २ । ३ । ६ । ६ ।
एकस्सिं दिअसे । ४ । ५ । ६ । ७ । दाव । ५ । ७ ।

श्यालः । जाणुत्र विस्सगन्धी गोहादी मच्छबन्धो एव्व णिस्संसत्रं । अङ्गुलीअग्रदंसणं से विमरिसिदव्वं । राअउलं एव्व गच्छामो (क) ।

रक्षिणौ । तह (ख) ।

श्यालः । गच्छसु अरे (१) गण्डभेदग्र (ग) ।

सर्व्वे । परिक्रामन्ति ।

श्यालः । सूअग्र इमं गोपुरदुआरे अप्पमत्ता पड़िवालेह जाव इमं अङ्गुलीअग्रं जहागमणं भट्टिणो णिवेदित्र तदो सासणं पड़िच्छिग्र णिक्कमामि (घ) ।

(क) जानुक विस्रगन्धी गोधादी मत्स्यबन्धः एव निःसंशयम् । अङ्गुरीयक-दर्शनम् अस्य विमृष्टव्यम् । राजकुलम् एव गच्छामः ।

जानुक— इदं रक्षिणोरन्यतरस्य नाम । विस्रगन्धी गोधादी मत्स्यबन्ध एव— विस्रम् आममांसं तद्गन्धवान् अस्य गात्रेषु आममांसगन्धो लभ्यते इत्यर्थः गोधा पञ्चनखजन्तुविशेषः तद्भक्षकः गोधादी अयं विस्रगन्धी गोधादी मत्स्यबन्धः धीवर एव । विमृष्टव्यं विचारणीयम् ।

(ख) तथा ।

(ग) गच्छ अरे गण्डभेदक ।

गण्डभेदक ग्रन्थिच्छेदक ।

(घ) सूचक इमं गोपुरद्वारे अप्रमत्तौ प्रतिपालयतं यावत् इदम् अङ्गुरीयकं यथागमनं भर्त्रे निवेद्य तस्मात् शासनं प्रतीक्ष्य निष्क्रामामि ।

अप्रमत्तौ सावधानौ । प्रतिपालयतं रक्षतम् । यथागमनम्—यथा याद्रशम् आगमनं प्राप्तिर्यस्य तत् तथोक्तम् । तस्मात् शासनं प्रतीक्ष्य— तस्मात् भर्त्तुः शासनं आज्ञाम् अस्मिन् विषये कर्त्तव्योपदेशरूपां प्रतीक्ष्य गृहीत्वा ।

---

(१) अले गच्छ । १ । गच्छ अले । २ । ३ । ४ । ५ । ६ । ७ ।

उभौ । पविशदु आवुत्ते शामिपशादश्श (क) ।

निष्क्रान्तः श्यालः ।

प्रथमः । जाणुअ चिलाअदि क्खु आवुत्ते (ख) ।

द्वितीयः । णं अवशलोवशप्पणीआ लाआणो (ग) ।

प्रथमः । जाणुअ फुलन्ति मे हत्था इमश्श वहश्श (१) शुमणो पिणड्डुं (घ) ।

पुरुषं निर्दिशति ।

पुरुषः । ण अलुहदि भावे अकालणे मालणे(२) भविदुं(ङ) ।

द्वितीयः । विलोक्य । एशे अम्हाणं शामी पत्तहत्थे लाअशाशणं पडिच्छिअ इदोमुहे देक्खीअदि । गिद्धवली हविश्शशि शुणो मुहं वा देक्खिश्शशि (च) ।

(क) प्रविशतु आवुत्तः स्वामिप्रसादाय ।

(ख) जानुक चिरायते खलु आवुत्तः ।

चिरायते विलम्बते ।

(ग) ननु अवसरोपसर्पणीयाः राजानः ।

(घ) जानुक स्फुरतः मे हस्तौ अस्य वधस्य सुमनसः पिनद्धुम् ।

स्फुरतः स्पन्देते । वधस्य सुमनसः पिनद्धुं बध्यमालां बद्धुं प्राणान् हन्तुमित्यर्थः ।

(ङ) न अर्हति भावः अकारणे मारणः भवितुम् ।

अकारणे मारणः— अकारणे कारणम् अपराधं विना मारयति हन्तीति मारणः निरपराधेन प्राणहन्ता ।

(च) एषः अस्माकं स्वामी पत्रहस्तः राजशासनं प्रतीक्ष्य इतोमुखो दृश्यते । गृध्रबलिः भविष्यसि शुनः मुखं वा द्रक्ष्यसि ।

इतोमुखः— इतः अस्यां दिशि मुखं यस्य सः तथोक्तः प्रतिनिवर्त्तमान

---

(१) वहश्श । १ । ४ । ६ ।
वज्झश्श । ३ । ५ ।

(२) अआलणमालणे । १ । ६ ।
अआलणे मालणे । ३ । ४ । ५ । ७ ।

प्रविश्य

श्यालः (१) । सूअअ मुञ्चीअउ एसो जालोवजीवी । उववसो किल से (२) अङ्गुलीअअस्स आअमो (क) ।

सूचकः । जह आवुत्ते भणादु (ख) ।

द्वितीयः । एसे जमशदणं पविशिअ पड़िणिउत्ते (ग) ।

• पुरुषं परिमुक्तबन्धनं (३) करोति ।

पुरुषः । श्यालं प्रणम्य । भट्टा अह केलिशे मे आजीवे (घ) ।

श्यालः । एसो भट्टिणा अङ्गुलीअअमुल्लसम्मिदो पसादो वि दाविदो (ङ) ।

पुरुषायार्थं प्रयच्छति ।

इत्यर्थः । गृध्रबलिरित्यादि— असंशयं राज्ञा तव बध आदिष्टः अतस्त्वं गृध्राणां बलिः आहारः भविष्यसि कुक्कुरस्य वा मुखं द्रक्ष्यसि गृध्राः कुक्कुराश्च त्वां भक्षयिष्यन्तीत्यर्थः । धीवरं प्रत्युक्तिरियम् ।

(क) सूचक मुच्यताम् एषः जालोपजीवी । उपपन्नः किल अस्य अङ्गुरीयकस्य आगमः ।

उपपन्नः सङ्गतः सम्भावितः ।

(ख) यथा आवुत्तः भणति ।

(ग) एषः यमसदनं प्रविश्य प्रतिनिवृत्तः ।

(घ) भर्त्तः अथ कीदृशः मम आजीवः ।

अद्य तावन्मया धृतो रोहितमत्स्यो गतः तदुदरलब्धमङ्गुरीयमपि गतम् अथ कथं जीविकां सम्पादयिष्यामीत्यर्थः ।

(ङ) एषः भर्त्रा अङ्गुरीयकमूल्यसम्मितः प्रसादः अपि दापितः ।

भर्त्ता राज्ञा । प्रसादः पारितोषिकम् ।

---

(१) प्रविश्य । श्यालः । शीघ्रं शीघ्रं । पुरुषः । भयं नाटयति । श्यालः । १ । प्रविश्य श्यालः ।२।३।४।५।६।७।

(२) उववसो किल अअं ।१।२।३।४। उववसो किल से । ५ । ७ ।

(३) परिमुक्तबन्धनम् । १ । २ ।८४ । ५ । प्रतिमुक्तबन्धनम् । ६ ।

पुरुषः । समभाणं परिग्गह्य (१) । भट्टकेण अणुग्गहिद म्हि (क) ।

सूचकः । एशे णाम अणुग्गहे जे मूलादो अवदालिअ हत्थिक्कन्धे पडिट्ठविदे (ख) ।

जानुकः । आवुत्त पलिदोशं कहेदु (२) तेण अङ्गुलीअएण भट्टिणो शम्मदेण होदव्वं (ग) ।

श्यालः । ण तस्सिं महारुहं रदणं भट्टिणो बहुमदं त्ति तक्केमि । तस्स दंसणेण भट्टिणो अभिमदो जणो सुमराविदो(३) । मुहुत्तअं पकिदिगम्भीरो वि पज्जुअणअणो (४) आसि (घ) ।

(क) भर्त्रा अनुगृहीतः अस्मि ।

(ख) एषः नाम अनुग्रहः यत् मूलात् अवतार्य्य हस्तिस्कन्धे प्रतिष्ठापितः । प्रतिष्ठापितः आरोहितः ।

(ग) आवुत्त परितोषः कथयति तेन अङ्गुरीयकेण भर्त्तुः सम्मतेन भवितव्यम् । परितोषः प्रसादः । कथयति सूचयति । सम्मतेन बहुमतेन ।

(घ) न तस्मिन् महार्हं रत्नं भर्त्तुः बहुमतम् इति तर्कयामि । तस्य दर्शनेन भर्त्तुः अभिमतः जनः स्मारितः । मुहूर्त्तं प्रकृतिगम्भीरः अपि प्रस्रुतनयनः आसीत् ।

स्मारितः स्मृतिपथमारोहितः दर्शनेनेति कर्त्तृपदम् । प्रस्रुतनयनः— प्रस्रुते अश्रुस्राविणी नयने यस्य सः तथोक्तः ।

---

(१) परिग्गह्य । १ । २ । ३ । ४ ।
प्रतिग्गह्य । ५ ।

(२) पलिदोशं कहेहि ।१।२।३।४।५।६।
गलिदोशं करेहि । ७ ।

(३) भट्टिणो अभिमदो जणो सुमराविदो । १ । २ । ४ । ५ । ६ । ७ ।
भट्टिणा अभिमदो जणो सुमरिदो । ३ ।

(४) पज्जुस्सुअणअणो ।१।२।३।४। । ५ । ६ । ७ ।

सूचकः। शेविदं णाम आवुत्तेण (क)।

जानुकः। णं भणासु इमस्स कए मच्छिआभत्तुणो (१) त्ति (ख)।

पुरुषमसूयया पश्यति।

पुरुषः। भट्टालके इदो अद्धं तुम्हाणं सुमणोमुल्लं होउ (ग)।

जानुकः। एत्तके जुज्जइ (घ)।

श्यालः। धीवर महत्तरो तुमं पिअवअस्सओ दाणिं मे

(क) सेवितं नाम आवुत्तेन।

सेवितं सेवा कृता भर्त्रा नितरां सन्तोषित इत्यर्थः।

(ख) ननु भण अस्य कृते मात्स्यिकभर्त्तुः इति।

ननु अस्य मत्स्यैर्जीवन्तीति मात्स्यिकाः धीवराः तेषां भर्त्तुः अधिपतेः धीवरराजस्य कृते सेवितमावुत्तेनेति भण कथय सेवाफलस्य पारितोषिकस्य अनेनैव लब्धत्वात्।

(ग) भट्टारकाः इतः अर्द्धं युष्माकं सुमनोमूल्यं भवतु।

भट्टारकाः भोः पूज्याः इतः राजप्रसादलब्धधनात् अर्द्धं युष्माकं सुमनोमूल्यं पुष्पमूल्यं भवतु। मया युष्माकं पूजनसुचितं पुष्पाणि च पूजनस्य मुख्योपकरणानि तेषाञ्च इह समवायो न विद्यते अतः राजप्रसादलब्धधनस्य अर्द्धं युष्मत्पूजनार्थानां पुष्पाणां मूल्यं भवतु। पूजनादिकाले हि पूजोपकरणेषु यस्य कस्यचित् असद्भावो भवति रजतकाञ्चनादिकं तन्मूल्यतया परिकल्प्य दीयते। यथा गोमूल्यं रजतं भूमिमूल्यं काञ्चनमित्यादि।

(घ) एतावत् युज्यते।

एतदुचितमित्यर्थः।

---

(१) मच्छिआभत्तुणो।१।२।३।४।६।७। मच्छिआणं भत्तुणो।५।

संवुत्तो । कादम्बरीसक्खिअं अम्हाणं पढमसोहिदं इच्छीअदु ता सोण्डिआपणं एव्व गच्छामो (क) ।

निष्क्रान्ताः सर्व्वे ।

प्रवेशकः (१) ।

(क) धीवर महत्तरः त्वं प्रियवयस्यः इदानीं मे संवृत्तः । कादम्बरीसाक्षिकम् अस्माकं प्रथमसौहृदम् इष्यते तत् शौण्डिकापणम् एव गच्छामः ।

कादम्बरीसाक्षिकम्— कादम्बरी मदिरा साक्षिणी यस्मिन् तत् तथोक्तं मदिरापानपूर्व्वकमित्यर्थः । शौण्डिकापणम्— शौण्डिकस्य मदिराविक्रयिणः आपणं विपणिं पण्यविक्रयशालामित्यर्थः ।

---

(१) तृतीयः प्रवेशकः । १ । २ । ४ । प्रवेशकः । २ । ५ । ६ ।

ततः प्रविशत्याकाशयानेन सानुमती नामाप्सराः (क)।

सानुमती। णिव्वत्तिअं मए पज्जाअणिव्वत्तणिज्जं अच्छरातित्थसण्णिज्झं जाव साहुजणस्स अभिसेअकालो त्ति। संपदं इमस्स राएसिणो उदन्तं पच्चक्खीकरिस्सं। मेणआसम्बन्धेण (१) सरीरभूआ दाणिं मे सउन्तला। ताए अ दुहिदणिमित्तं आदिट्ठपुव्वम्हि। समन्तादवलोक्य। किं णु क्खु उदुस्सवे वि णिरुस्सवारम्भं विअ एदं राअउलं दीसइ। अत्थि मे विहवो पणिहाणेण सव्वं परिण्णादुं। किन्तु सहीए आअरो मए माणइदव्वो। होदु इमाणं एव्व उज्जाणपालिआणं तिरक्खरणीपडिच्छण्णा पस्सपरिवत्तिणी भविअ उवलहिस्सं (ख)।

नाट्येनावतीर्य स्थिता।

(क) आकाशयानेन आकाशवर्त्मना।

(ख) निर्वर्त्तितं मया पर्य्यायनिर्वर्त्तनीयम् अप्सरस्तीर्थसान्निध्यं यावत् साधुजनस्य अभिषेककालः इति। साम्प्रतम् अस्य राजर्षेः उदन्तं प्रत्यक्षीकरिष्यामि। मेनकासम्बन्धेन शरीरभूता इदानीं मे शकुन्तला। तया च दुहितृनिमित्तम् आदिष्टपूर्व्वा अस्मि। किं नु खलु ऋतूत्सवे अपि निरुत्सवारम्भम् इव एतत् राजकुलं दृश्यते। अस्ति मे विभवः प्रणिधानेन सर्व्वं परिज्ञातुम्। किन्तु सख्याः आदरः मया मानयितव्यः। भवतु अनयोः एव उद्यानपालिकयोः तिरस्करणीप्रतिच्छन्ना पार्श्वपरिवर्त्तिनी भूत्वा उपलप्स्ये।

निर्वर्त्तितं मयेत्यादि — यावत् साधुजनस्य अभिषेककालः स्नानसमयः स्थितः तावत् मया पर्य्यायेण वारक्रमेण निर्वर्त्तनीयं सम्पादनीयम् अप्सरस्तीर्थं सान्निध्यं निर्वर्त्तितं निर्व्वाहितम् इति नातःपरमिह मत्सन्निधिरावश्यक

(१) मेणआसम्बन्धेण। १। २। ३। ४। ६। णं मेणआसम्बन्धेण। ५। ७।

ततः प्रविशति चूताङ्कुरमवलोकयन्ती चेटी अपरा च दृष्टतस्थाः ।

प्रथमा ।

आतम्बहरिअपण्डुर वसन्तमासस्स जीअसव्वस्स (१) ।
दिट्ठो सि चूअकोरअ उदुमङ्गल तुमं पसाएमि (क) ॥

द्वितीया । परहुदुए किं एआइणी मन्तेसि (ख) ।

प्रथमा । महुअरिए चूअकालिअं देक्खिअ उम्मत्तिआ परहुदुआ होइ (ग) ।

द्वितीया । सहर्षं त्वरयोपगम्य । कहं उवट्ठिओ महुमासो(घ) ।

इति कृत्वा साम्प्रतम् अधुना अस्य राजर्षेः उदन्तं वृत्तान्तं प्रत्यक्षीकरिष्यामि । राजकुलं राजभवनम् । विभवः सामर्थ्यम् । प्रणिधानेन दैवशक्तिबलेन । अनयोरेवेत्यादि— तिरस्करण्या अदृश्यत्वसम्पादनविद्यया प्रतिच्छन्ना तिरोहिता सती अनयोरेव उद्यानपालिकयोः उद्यानप्रत्यवेक्षानियुक्तयोः स्त्रियोः पार्श्वपरिवर्त्तिनी पार्श्वसञ्चारिणी भूत्वा उपलप्स्ये उत्सवाभावकारणमवगमिष्यामि ।

(क) आताम्रहरितपाण्डुर वसन्तमासस्य जीवसर्वस्व ।
दृष्टः असि चूतकोरक ऋतुमङ्गल त्वां प्रसादयामि ॥

ऋतुमङ्गल ऋतोर्वसन्तस्य प्रथमप्रवेशसूचकमङ्गलाचरणभूत । आर्या जातिः ।

(ख) परभृतिके किम् एकाकिनी मन्त्रयसे ।

(ग) मधुकरिके चूतकलिकां दृष्ट्वा उन्मत्ता परभृतिका भवति ।
परभृतिकाशब्दः श्लिष्टः चेटीं कोकिलाञ्च बोधयति ।

(घ) कथम् उपस्थितः मधुमासः ।

---

(१) वसन्तमासस्स जीअसव्वस्स ।१।२।७। वसन्तमासेक्कजीअसव्वस्स । ४ ।
जीविदसव्वं वसन्तमासस्स ।३।६। जीविदसव्वस्स वसन्तमासस्स ।५।

प्रथमा। मञ्जरिए तव दाणिं कालो एसो मदविब्भम-गीआणं (क)।

द्वितीया। सहि अवलम्बसु मं जाव अग्गपाअट्ठिआ ड्डविअ चूअकलिअं गेण्हिअ कामदेअच्चणं करामि (ख)।

प्रथमा। जइ मम वि क्खु अद्धं अच्चणफलस्स (१) (ग)।

द्वितीया। अकहिदे वि (२) एदं संवज्जइ जदो एक्कं एव्व णो जीविअं दुहाट्ठिअं सरीरं। सखीमवलम्ब्य स्थिता चूताङ्कुरं गृह्णती। अए अप्पडिबुद्धो वि चूअप्पसवो एत्थ बन्धणभङ्गसुरही होइ (घ)।

कपोतहस्तकं कृत्वा (ङ)।

(क) मधुकरिके तव इदानीं कालः एषः मदविभ्रमगीतानाम्।

मधुकरिकाशब्दः श्लिष्टः चेटीं भ्रमरीञ्च बोधयति। मदविभ्रमगीता-नाम्— मदो हर्षस्य विभ्रमः परिभ्रमणञ्च गीतं गानञ्च तानि तेषाम्।

(ख) सखि अवलम्बस्व मां यावत् अग्रपादस्थिता भूत्वा चूतकलिकां गृहीत्वा कामदेवार्च्चनं करोमि।

(ग) यदि मम अपि खलु अर्द्धम् अर्च्चनफलस्य।

(घ) अकथिते अपि एतत् सम्पद्यते यतः एकम् एव आवयोः जीवितं द्विधास्थितं शरीरम्। अये अप्रतिबुद्धः अपि चूतप्रसवः अत्र बन्धनभङ्ग-सुरभिः भवति।

अप्रतिबुद्धः अस्फुटितः। बन्धनभङ्गसुरभिः— बन्धनस्य वृन्तस्य भङ्गेन सुरभिः प्राप्ततर्पणः।

(ङ) कपोतहस्तकम्— प्रणामगुरुसम्भाषणादिकाले हस्तौ तथा संयोज्येते यथा तौ कपोताकारं प्रतिपद्येते कपोताकारापन्नौ हस्तौ यस्मिन् तत्

---

(१) अद्धं अच्चणफलं। १। ४।
अद्धं अच्चणफलस्स। २। ३। ५। ६। ७।

(२) अकहिदे वि। १। २। ३। ४। ६। ७।
अकहिदं वि। ५।

तुमं सि मए चूअङ्कुर दिणो कामस्स गहीअधणुअस्स ।
पहिअजणजुवइलक्खो पञ्चअहिओ सरो होसु (क) ॥

चूताङ्कुरं क्षिपति (१)।

प्रविश्यापटीक्षेपेण कुपितः (२)

कञ्चुकी । मा तावदनात्मज्ञे । देवेन प्रतिषिद्धे वसन्तोत्सवे त्वमाम्रकलिकाभङ्गं किमारभसे (ख) ।

कपोतहस्तकं हस्तयोः कपोताकारत्वापादकः संयोजनविशेष इत्यर्थः। राघवभट्टधृतसङ्गीतरत्नाकरे कपोतहस्तकलक्षणमुक्तं यथा

कपोतोऽसौ करौ यत्र श्लिष्टमूलाग्रपार्श्वकौ ।

(क) त्वम् असि मया चूताङ्कुर दत्तः कामस्य गृहीतधनुषः ।
पथिकजनयुवतिलक्ष्यः पञ्चाभ्यधिकः शरः भव ॥

पथिकजनयुवतिलक्ष्यः— पथिकजनयुवतयः प्रोषितभर्तृकाः कामिन्यः लक्ष्यं यस्य सः तथोक्तः। पञ्चाभ्यधिकः शरः— पञ्चसु कामशरेषु अभ्यधिकः गरिष्ठः कामदेवस्य सर्व्वशरश्रेष्ठ इत्यर्थः पञ्चभ्योऽधिकः षष्ठः इति व्याख्यानन्तु न समीचीनम्

अरविन्दमशोकञ्च चूतञ्च नवमल्लिका ।
नीलोत्पलञ्च पञ्चैते पञ्चबाणस्य सायकाः ॥

इत्यत्र चूताङ्कुरस्य पञ्चानां कामदेवशराणामन्यतमतया परिगणितत्वेन पञ्चाधिकतायां असङ्गतत्वात्। आर्य्या जातिः।

(ख) मा तावदनात्मज्ञे— हे अनात्मज्ञे स्वस्वरूपानभिज्ञे मा तावत् चूतकलिकाभङ्गं कुरु इति वाक्यशेषः। चेटी भूत्वा राजाज्ञाप्रतिरोधेन चूतकलिकाभङ्गे प्रवृत्ता नितान्तं साहसकारिणी संवृत्तासीति भावः।

---

(१) चूताङ्कुरं क्षिपति ।१।२।३।४। चूताङ्कुरं हस्तात् क्षिपति ।५।

(२) अपटीक्षेपेण कुपितः । १ । ६ । पटाक्षेपेण कुपितः । २ । ४ । ५ । पटाक्षेपेण ।३ ।

उभे। भीते। पसीदउ अज्जो। अगहीअत्था वम्हं (क)।

कञ्चुकी। न किल श्रुतं (१) युवाभ्यां यत् वासन्तिकैस्तरुभिः अपि (२) देवस्य शासनं प्रमाणीकृतं तदाश्रयिभिः पत्रिभिश्च (३) (ख)। तथाहि

चूतानां चिरनिर्गतापि कलिका बध्नाति न स्वं रजः
सन्नद्धं यदपि स्थितं(४) कुरुवकं तत् कोरकावस्थया।
कण्ठेषु स्खलितं(५) गतेऽपि शिशिरे पुंस्कोकिलानां रुतं
शङ्के संहरति स्मरोऽपि चकितस्तूणार्द्धकृष्टं शरम् (ग)॥

उभे। णत्थि संदेहो। महाप्पहाओ राएसी (घ)।

प्रथमा। अज्ज कति दिअहाइं अम्हाणं मित्तावसुणा रट्ठिएण भट्टिणीपाअमूलं पेसिआणं। एत्थ अ (६) णो पमदवणस्स पालण-

(क) प्रसीदतु आर्य्यः। अगृहीतार्थे आवाम्।

अगृहीतार्थे— अगृहीतः अविदितः अर्थः राजाज्ञया वसन्तोत्सवप्रतिषेधरूपो विषयो याभ्यां ते तथोक्ते।

(ख) वासन्तिकैः— वसन्ते उज्जीवन्तीति वासन्तिकाः तैः। शासनम् आज्ञा। प्रमाणीकृतं प्रतिपालितम्। पत्रिभिः पक्षिभिः।

(ग) बध्नाति धत्ते। सन्नद्धं बहिर्निर्गतम्। शार्दूलविक्रीडितं वृत्तम्।

(घ) नास्ति सन्देहः। महाप्रभावः राजर्षिः।

---

(१) न किल श्रुतम्।१।२।४।५।
आः न किल श्रुतम्।३।

(२) यद्वासन्तिकैः।१।२।३।४।
वासन्तिकैः।५।

(३) तदाश्रयिभिः पत्रिभिश्च।१।२।४।५।
तदाश्रयिभिरलिभिः पत्रिभिश्च।३।

(४) यदपि स्थितम्।१।२।३।
यदवस्थितम्।४।

(५) कण्ठेषु स्खलितम्।१।२।३।५।
कण्ठे प्रस्खलितम्।४।

(६) इत्थं अ।१।२।३।५।
एत्थ अ।४।

कम्म समप्पिअं। ता आअन्तुअताए अस्सुअपुव्वो अम्हेहिं एसो वुत्तन्तो (क)।

कञ्चुकी। भवतु। न पुनरेवं प्रवर्त्तितव्यम्।

उभे। अज्ज कोऊहलं णो। जइ इमिणा जणेण सोअव्वं कहेदु अअं किं णिमित्तं भत्तुणा वसन्तुस्सवो पडिसिद्धो (ख)।

सानुमती। उस्सवप्पिआ क्खु मणुस्सा। गरुणा कारणेण होअव्वं (ग)।

कञ्चुकी। बहुलीभूतमेतत् किं न कथ्यते। किमत्रभवत्योः कर्णपथं नायातं शकुन्तलाप्रत्यादेशकौलीनम् (घ)।

उभे। सुदं रट्ठिअमुहादो (१) जाव अङ्गुलीअअदंसणं (ङ)।

कञ्चुकी। तेन हि अल्पं कथयितव्यम्। यदैव खलु स्वाङ्गुलीयकदर्शनादनुस्मृतं देवेन सत्यमूढ़पूर्व्वा मया तत्रभवती रहसि

(क) आर्य्ये कति दिवसानि आवयोः मित्रावसुना राष्ट्रियेण भर्त्तॄपादमूलं प्रेषितयोः। अत्र च नौ प्रमदवनस्य पालनकर्म्म समर्पितम्। तत् आगन्तुकतया अश्रुतपूर्व्वः आवाभ्याम् एषः वृत्तान्तः।

राष्ट्रियेण राजश्यालकेन। आगन्तुकतया अचिरागततया।

(ख) आर्य्य कौतूहलम् आवयोः। यदि अनेन जनेन श्रोतव्यं कथयतु अयं किं निमित्तं भर्त्त्रा वसन्तोत्सवः प्रतिषिद्धः।

श्रोतव्यम् श्रोतुमर्हम्।

(ग) उत्सवप्रियाः खलु मनुष्याः। गुरुणा कारणेन भवितव्यम्।

(घ) बहुलीभूतं सर्व्वतः प्रचरितम्। प्रत्यादेशकौलीनं प्रत्याख्यानविषयको लोकवादः।

(ङ) श्रुतं राष्ट्रियमुखात् यावत् अङ्गुरीयकदर्शनम्।

---

(१) रट्ठिणो मुहादो। १। २। ३। ४। रट्ठिअस्सहादो। ६।

शकुन्तला मोहात् प्रत्यादिष्टेति तदाप्रभृत्येव पश्चात्तापमुपगतो देवः । तथाहि

रम्यं द्वेष्टि यथा पुरा प्रकृतिभिर्न प्रत्यहं सेव्यते
शय्याप्रान्तविवर्त्तनैर्विगमयत्युन्निद्र एव क्षपाः ।
दाक्षिण्येन ददाति वाचमुचितामन्तःपुरेभ्यो यदा
गोत्रेषु स्खलितस्तदा भवति च व्रीड़ाविलक्षश्चिरम् (क) ॥

सानुमती । पिअं मे (१) (ख) ।

कञ्चुकी । अस्मात् प्रभवतो वैमनस्यादुत्सवः प्रत्याख्यातः (ग) ।

उभे । जुज्जइ (घ) ।

नेपथ्ये

एउ एउ भवं (ङ) ।

कञ्चुकी । कर्णं दत्त्वा । अये इत एवाभिवर्त्तते देवः । स्वकर्म्मानुष्ठीयताम् (च) ।

(क) रम्यम् इन्द्रियप्रीतिकरं भोग्यं वस्तु । यथा पुरा पूर्ब्बवत् । शय्याप्रान्तविवर्त्तनैः शय्यायाः प्रान्तेषु पार्श्वदेशेषु विवर्त्तनैः परिलुण्ठनैः । विगमयति अतिवाहयति । उचिताम् उपयुक्ताम् । अन्तःपुरेभ्यः अवरोधवधूभ्यः । गोत्रेषु नामसु । व्रीड़ाविलक्षः व्रीड़या लज्जया विलक्षः विक्लवः अतिशयेन लज्जाभिभूत इत्यर्थः । शार्दूलविक्रीड़ितं वृत्तम् ।

(ख) प्रियं मे ।

(ग) अस्मात् उक्तात् प्रभवतः अतिप्रबलात् वैमनस्यात् उद्वेगात् उत्सवः वसन्तोत्सवः प्रत्याख्यातः निराकृतः प्रतिषिद्ध इति यावत् ।

(घ) युज्यते ।

(ङ) ऐतु ऐतु भवान् ।

(च) वेश्यौ प्रत्युक्तिरियम् ।

---

(१) पिअं मे पिअं मे । १ । ४ ।　　पिअं मे । २ । ३ । ५ । ६ । ७ ।

उभे । तह (क) ।

निष्क्रान्ते ।

ततः प्रविशति पश्चात्तापसदृशवेशो राजा विदूषकः प्रतीहारी च ।

कञ्चुकी । राजानमवलोक्य । अहो सर्वास्ववस्थासु रमणीयत्वम् आकृतिविशेषाणाम् । एवमुत्सुकोऽपि प्रियदर्शनो देवः । तथाहि

प्रत्यादिष्टविशेषमण्डनविधिर्वामप्रकोष्ठार्पितं
बिभ्रत्काञ्चनमेकमेव वलयं श्वासोपरक्ताधरः (१) ।
चिन्ताजागरणप्रतान्तनयनस्तेजोगुणादात्मनः
संस्कारोल्लिखितो महामणिरिव क्षीणोऽपि नालक्ष्यते (ख) ॥

सानुमती । राजानं दृष्ट्वा । ठाणे क्खु पच्चादेसविमाणिआ वि इमस्स कए सउन्तला किलम्मइ (२) (ग) ।

राजा । ध्यानमन्दं परिक्रम्य (घ) ।

(क) तथा ।

(ख) प्रत्यादिष्टः निराकृतः विशेषमण्डनविधिः मुकुटादिभिराभरणविशेषैः अलङ्करणव्यापारः येन स तथोक्तः वामे प्रकोष्ठे मणिबन्धे अर्पितं परिहितम् एकमेव काञ्चनमयं वलयं कटकं बिभ्रत् दधत् श्वासैः उपरक्तः क्लेशितः शोषित इति यावत् अधरो यस्य स तथोक्तः चिन्तानिबन्धनेन जागरणेन प्रतान्ते नितरां ग्लाने नयने यस्य स तथोक्तः संस्काराय उल्लिखितः शाणालीढ़ः महामणिः महार्हो मणिः इव क्षीणः कृशः अपि आत्मनः स्वस्य तेजोगुणात् प्रभाव-महिम्ना न आलक्ष्यते क्षीणतया परिज्ञायते । शार्दूलविक्रीडितं वृत्तम् ।

(ग) स्थाने खलु प्रत्यादेशविमानिता अपि अस्य कृते शकुन्तला क्लाम्यति ।

(घ) ध्यानमन्दं चिन्तामन्थरम् ।

---

(१) श्वासोपरक्ताधरः । १ । ६ ।   (२) किलम्मइ त्ति । १ । २ । ४ । ५ ।
" श्वासापरक्ताधरः । २ । ३ । ४ । ५ ।   किलम्मइ । ३ ।

प्रथमं सारङ्गाक्ष्या प्रियया प्रतिबोध्यमानमपि सुप्तम्।
अनुशयदुःखायेदं हतहृदयं सम्प्रति विबुद्धम् (क)॥

सानुमती। णं एरिसाणि तवस्सिणीए भाअहेआणि (ख)।

विदूषकः। अपवार्य्य। लङ्घिओ एसो भूओ वि सउन्तला-वाहिणा। ण आणे कहं चिकिच्छिअव्वो होहिद्द त्ति (ग)।

कञ्चुकी। उपगम्य। जयतु देवः (१)। महाराज प्रत्य-वेक्षिताः (२) प्रमदवनभूमयः। यथाकाममध्यास्तां विनोदस्थानानि महाराजः (घ)।

राजा। वेत्रवति मद्वचनात् अमात्यमार्य्यपिशुनं (३) ब्रूहि

(क) अनुशयदुःखाय पश्चात्तापजनितक्लेशभोगाय। विबुद्धं जागरितम्। आर्य्या जातिः।

(ख) ननु ईदृशानि तपस्विन्याः भागधेयानि।

(ग) लङ्घितः एषः भूयः अपि शकुन्तलाव्याधिना। न जाने कथं चिकित्सितव्यः भविष्यति इति।

लङ्घितः आक्रान्तः। शकुन्तलाव्याधिना शकुन्तलारूपेण रोगेण।

(घ) प्रत्यवेक्षिताः परीक्षिताः। प्रमदवनभूमयः प्रमदवनस्थानानि प्रमद-वनञ्च

विज्ञेयं प्रमदवनं नृपस्तु यस्मिन्
शुद्धान्तैः सह रमते पुरोपकण्ठे। २। ५८।

इति हलायुधोक्तम्।

---

(१) जयतु जयतु देवः। १।
जयतु जयतु महाराजः। २।
जयतु देवः। ३। ४। ५।
(२) प्रत्यवेक्षिताः। १। २। ३। ४।
अवेक्षिताः। ५।
(३) अमात्यपिशुनम्। १। ४।
अमात्यमार्य्यपिशुनम्। २। ५।
अमात्यमार्य्यविशुद्धम्। ३।

चिरप्रबोधात् न सम्भावितमस्माभिरद्य(१) धर्म्मासनमध्यासितुं यत् प्रत्यवेक्षितं पौरकार्य्यमार्य्येण तत् पत्रमारोप्य दीयतामिति (क) ।

प्रतीहारी । जं देओ आणवेदि (ख) ।

निष्क्रान्ता ।

राजा । वातायन त्वमपि स्वं नियोगमशून्यं कुरु (२) ।

निष्क्रान्तः कञ्चुकी ।

विदूषकः । कअं भअवता णिम्मच्छिअं । संपदं सिसिरातवच्छेअरमणीए इमस्सिं पमदवणुद्देशे अत्ताणं रमेहिसि (ग) ।

राजा । वयस्य रन्ध्रोपनिपातिनोऽनर्था इति यदुच्यते तत् अव्यभिचारि वचः (घ) । कुतः

(क) चिरप्रबोधात् चिरेण विलम्बेन प्रबोधात् जागरणात् । सम्भावितं शक्तम् । धर्म्मासनं धर्म्मदर्शनार्थमासनं यस्मिन्नासने उपविश्य पौरकार्य्यं समीक्ष्यते इत्यर्थः । प्रत्यवेक्षितं पर्य्यालोचितम् ।

(ख) यत् देवः आज्ञापयति ।

(ग) कृतं भवता निर्मक्षिकम् । साम्प्रतं शिशिरातपच्छेदरमणीये अस्मिन् प्रमदवनोद्देशे आत्मानं रमयिष्यसि ।

शिशिरातपच्छेदरमणीये— शिशिरस्य शीतस्य आतपस्य उत्तापस्य च छेदेन लाघवेन रमणीये सुखसेव्ये नातिशीते नचात्युष्णे इत्यर्थः ।

(घ) अनर्थाः आपदः रन्ध्रेण छिद्रेण उपनिपतन्ति उपतिष्ठन्ते इति तथोक्ताः छिद्रमासाद्य मानवान् आक्रामन्तीत्यर्थः इति यदुच्यते तत् वचः वचनं व्यभिचरति स्खलति इति व्यभिचारि तन्न भवतीति अव्यभिचारि अनन्यथाभावीत्यर्थः ।

---

(१) अद्यास्माभिः । १ । ४ ।
अस्माभिरद्य । २ । ५ ।
अस्माभिः । ३ ।

(२) स्वनियोगमशून्यं कुरु । १ ।
स्वं नियोगमशून्यं कुरु ।२।४।५।
नियोगमशून्यं कुरु । ३ ।

मुनिसुताप्रणयस्मृतिरोधिना
मम च मुक्तमिदं तमसा मनः ।
मनसिजेन सखे प्रहरिष्यता
धनुषि चूतशरश्च निवेशितः (क) ॥

विदूषकः । चिट्ठ दाव जाव इमिणा दण्डकट्ठेण कन्दप्पबाणं (१) णासेस्सं (ख) ।

दण्डकाष्ठमुद्यम्य चूताङ्कुरं पातयितुमिच्छति ।

राजा । सस्मितम् । भवतु । दृष्टं ब्रह्मवर्च्चसम् । सखे क्वोपविष्टः प्रियायाः किञ्चिदनुकारिणीषु लतासु दृष्टिं विलोभयामि (ग) ।

विदूषकः । णं आसण्णपरिआरिआ चउरिआ भअता संदिट्ठा माहवीमण्डवे इमं वेलं अतिवाहेस्सं तहिं अ मे (२) चित्तफलअगअं सहत्थलिहिअं तत्तहोदीए सउन्तलाए पडिकिदिं आणेसु त्ति (घ) ।

(क) तमसा मोहेन । द्रुतविलम्बितं वृत्तम् ।

(ख) तिष्ठ तावत् यावत् अनेन दण्डकाष्ठेन कन्दर्पबाणं नाशयिष्यामि ।

(ग) ब्रह्मवर्च्चसम्— ब्रह्मणो ब्राह्मणस्य वर्च्चः वेदाध्ययनव्रताभिरक्षणजनितं तेजः । विलोभयामि विनोदयामि ।

(घ) ननु आसन्नपरिचारिका चतुरिका भवता सन्दिष्टा माधवीमण्डपे इमां वेलाम् अतिवाहयिष्यामि तत्र च मे चित्रफलकगतां स्वहस्तलिखितां तत्रभवत्याः शकुन्तलायाः प्रतिकृतिम् आनय इति ।

(१) कन्दप्पबाहिं ।१।२।३।४।५।६।७। (२) तहिं अ मे ।१।२।३।४।५। तहिं मे ।६।७।

राजा । इदमं हृदयविनोदस्थानं (१) तत् तमेव मार्ग-मादेशय (क) ।

विदूषकः । इदो इदो भवं (ख) ।

उभौ । परिक्रामतः ।

सानुमती । अनुगच्छति ।

विदूषकः । एसो मणिसिलापट्टअसणाहो माहवीमण्डवो उवहाररमणिज्जदाए णिस्संसअं साअदेण विअ णो पडिच्छदि । ता पविसिअ णिसीदउ भवं (ग) ।

उभौ । प्रवेशं कृत्वा उपविष्टौ ।

सानुमती । लतासंस्सिआ (२) देक्खिस्सं दाव सहीए (३)

आसन्नपरिचारिका— आसन्ना समीपवर्त्तिनी परिचारिका परिचर्य्यार्थं या सदा राजसमीपे तिष्ठतीत्यर्थः ।

(क) हृदयविनोदस्थानं चित्तविनोदनोपायः ।

(ख) इतः इतः भवान् ।

(ग) एषः मणिशिलापट्टकसनाथः माधवीमण्डपः उपहाररमणीयतया निःसंशयं स्वागतेन इव नौ प्रतीच्छति । तत् प्रविश्य निषीदतु भवान् ।

मणिशिलापट्टकसनाथः— मणिशिला मूल्यवान् प्रस्तरविशेषः तन्निर्म्मितेन पट्टकेन आसनेन सनाथः सहितः । उपहाररमणीयतया— उपहारेण विकसितकुसुमस्तवकरूपेण उपायनेन रमणीयता चित्ताकर्षकता तया मनोहरेण पुष्पोपहारेण इत्यर्थः । नौ प्रतीच्छति— नौ आवां प्रतीच्छति गृह्णाति आवां प्रति उपचारं प्रतिपद्यते इत्यर्थः ।

---

(१) हृदयविनोदस्थानम् ।१।२। ३।५।६।
हृदयनिवेशस्थानम् ।४।

(२) लतासंस्सिआ ।१।२।४।५।६।
लतासन्निहिआ ।३।७।

(३) देक्खिस्सं दाव सहीए ।१।२। ३।५।६।
देक्खिस्सं मम दाव सहीए ।४।७।

पद्दुकिदू। तदो से भत्तुणो वङ्कमुहं (१) अणुराअं णिवेदेस्सं (क)।

तथा कृत्वा स्थिता।

राजा। सखे सर्व्वमिदानीं स्मरामि शकुन्तलायाः प्रथमवृत्तान्तं कथितवानस्मि भवते च (२)। स भवान् प्रत्यादेशवेलायां मत्समीपगतो नासीत्। पूर्व्वमपि न त्वया कदाचित् सङ्कीर्त्तितं तत्रभवत्या नाम। कच्चिदहमिव विस्मृतवानसि त्वम्।

विदूषकः। ण विसुमरामि। किन्तु सव्वं कहिअ अवसाणे उण तुए परिहासविअप्पओ एसो ण भूअत्थो त्ति आचक्खिअं। मए वि मिप्पिण्डबुद्धिणा (३) तह एव्व गहीअं। अहवा भविअव्वता बलवदी (४) (ख)।

(क) लतासंश्रिता प्रेक्षिष्ये तावत् सख्याः प्रतिकृतिम्। ततः तस्य भर्त्तुः बङ्कमुखम् अनुरागं निवेदयिष्यामि।

लतासंश्रिता— लताः संश्रिता आश्रिता लताभिस्तिरोहितकलेवरा इत्यर्थः। बङ्कमुखम्— बहूनि अनेकानि मुखानि प्रकाराः यस्य तं तथोक्तम् अनेकविधमित्यर्थः।

(ख) न विस्मरामि। किन्तु सर्व्वं कथयित्वा अवसाने पुनः त्वया परिहासविजल्पः एषः न भूतार्थः इति आख्यातम्। मया अपि मृत्पिण्डबुद्धिना तथा एव गृहीतम्। अथवा भवितव्यता बलवती।

मृत्पिण्डबुद्धिना— मृत्पिण्डसदृशी बुद्धिर्यस्य तेन तथोक्तेन जड़मतिना इत्यर्थः।

---

(१) बङ्कमुहं।१।२।३।४।६। बङ्कमअं।५।७।

(२) सखे सर्व्वमिदं स्मरामि। शकुन्तलायाः प्रथमवृत्तान्तं कथितवानस्मि भवते च।१।
सखे सर्व्वमिदानीं स्मरामि शकुन्तलायाः प्रथमवृत्तान्तं कथितवानस्मि भवते च।२।३।४।५।६।

(३) मिप्पिण्डबुद्धिणा।१।२।३।४।६। मन्दबुद्धिणा।५।७।

(४) भविअव्वता बलवती।१।२।३।४।५। भविअव्वता क्खु बलवदी।६।७।

सानुमती। एव्वं एदं (क)।

राजा। ध्यात्वा। सखे त्रायस्व माम्।

विदूषकः। भो किं एदं। अणुववसं क्खु एरिसं तुइ। कदा वि सप्पुरिसा सोअवत्तव्वा ण होन्ति। णं पवाए वि णिक्कम्पा गिरीओ (ख)।

राजा। वयस्य निराकरणविक्लवायाः प्रियायाः समवस्थाम् अनुस्मृत्य बलवदशरणोऽस्मि (ग)। सा हि

इतः प्रत्यादेशात् स्वजनमनुगन्तुं व्यवसिता
मुहुस्तिष्ठेत्युच्चैर्वदति गुरुशिष्ये गुरुसमे (१)।
पुनर्दृष्टिं वाष्पप्रसरकलुषामर्पितवती (२)
मयि क्रूरे यत्तत् सविषमिव शल्यं दहति माम् (घ)॥

(क) एवम् एतत्।

(ख) भोः किम् एतत्। अनुपपन्नं खलु ईदृशं त्वयि। कदा अपि सत्पुरुषाः शोकवक्तव्याः न भवन्ति। ननु प्रवाते अपि निष्कम्पाः गिरयः।

शोकवक्तव्याः— शोकस्य वक्तव्याः वशतयः आस्पदानीति यावत् शोकै-रभिभूयन्ते इत्यर्थः।

(ग) निराकरणविक्लवायाः— निराकरणेन मत्कृतेन प्रत्याख्यानेन विक्लवायाः विह्वलायाः प्रत्याख्याननिबन्धनेन शोकेनाभिभूतायाः इत्यर्थः। बलवत् अत्यधिकम्। अशरणः निराश्रयः।

(घ) गुरुसमे गुरुशिष्ये— गुरोः पितुः समे तुल्ये गुरुवन्माननीये गुरु-शिष्ये पितृशिष्ये शार्ङ्गरवे। वाष्पप्रसरकलुषाम्— वाष्पस्य अश्रुजलस्य प्रसरेण निर्गमेण कलुषाम् आविलाम् अश्रुजलाप्लुतामित्यर्थः। शिखरिणी वृत्तम्।

---

(१) गुरुसमे। १। २। ३। ४। गुरुसखे। ५।

(२) वाष्पप्रकरकलुषाम्। १। २। ४। वाष्पप्रसरकलुषाम्। ३। ६।

सानुमती । अम्महे एरिसी सकज्जपरता इमस्स सन्तावेण अहं रमामि (क) ।

विदूषकः । भो अत्थि मे तक्को केण (१) तत्तहोदि आआसचारिणा णीअ त्ति (ख) ।

राजा । कः पतिदेवतामन्यः परामष्टुमुत्सहेत (२) । मेनका किल सख्यास्ते (३) जन्मप्रतिष्ठेति श्रुतवानस्मि । तत्सहचारिणीभिः सखी ते हृतेति मे हृदयमाशङ्कते (ग) ।

(क) अम्महे ईदृशी स्वकार्य्यपरता अस्य सन्तापेन अहं रमे ।

ईदृशी स्वकार्य्यपरता— स्वकार्य्यपरता स्वार्थपरता ईदृशी एवंप्रकृतिका स्वार्थपरस्य जनस्य ईदृशी प्रकृतिरित्यर्थः । दुष्यन्तहृदयपरीक्षणं सानुमत्याः स्वार्थः तदर्थमेव मेनकया तस्या आदिष्टपूर्व्वत्वात् । अधुना सा दुष्यन्तस्य विरहसन्तापदर्शनेन शकुन्तलायां तस्यानुरागभूयस्त्वमवधार्य्य सातिशयं सन्तोषमनुभूतवती । सत्पुरुषा हि परेषां सन्तापेन नितरां परितप्यन्ते स एव स्वार्थानुकूलश्चेत् स्वार्थपराणां महते सन्तोषाय भवति । अहं स्वार्थपरा अतः स्वार्थानुकूलेन एतस्य सन्तापेन प्रीतिमनुभवामीत्यर्थः ।

(ख) भोः अस्ति मे तर्कः केन तत्रभवती आकाशचारिणा नीता इति ।

केनापि आकाशचारिणा नीतेति पुरोहितेन पूर्व्वं राज्ञे निवेदितम् । स च आकाशचारी क इति निर्णेतुं विदूषकस्य तर्कः ।

(ग) कः पतिदेवतामन्यः परामष्टुमुत्सहेत— पतिः देवता अस्याः तां तथोक्ताम् एकान्तपतिपरायणां पतिव्रतामित्यर्थः तादृशीं शकुन्तलां परामष्टुं स्प्रष्टुम् अन्यः कः उत्सहेत क्षमेत । जन्मप्रतिष्ठा— जन्मनः उत्पत्तेः प्रतिष्ठा स्थानं जनयित्रीत्यर्थः ।

---

(१) केण वि । १ । ५ । ६ । ७ ।
केण । २ । ३ । ४ ।
(२) परामष्टुम् । १ । ४ ।
परिमष्टुम् । २ । ३ । ६ ।
(३) सख्यास्ते । १ । २ । ४ । ५ ।
ते सख्याः । ३ ।

सानुमती । सम्मोहो क्खु विम्हअणिज्जो ण पतिवोहो (क) ।

विदूषकः । जइ एव्वं अत्थि क्खु समागमो कालेण तत्त-होदीए (ख) ।

राजा । कथमिव ।

विदूषकः । ण क्खु मातापितरा भत्तुविओअदुक्खिअं दुहिअरं देक्खिउं पारेन्ति (ग) ।

राजा । वयस्य

स्वप्नो नु माया नु मतिभ्रमो नु
क्लिष्टं नु तावत्फलमेव पुण्यम् ।
असन्निवृत्त्यै तदतीतमेते
मनोरथा नाम तटप्रपाताः (घ) ॥

(क) सम्मोहः खलु विस्मयनीयः न प्रतिबोधः ।

सम्मोहः विस्मरणं खलु विस्मयनीयः विस्मयजनकः न प्रतिबोधः स्मरणम् । ईदृशस्य महासत्त्वस्य पुरुषस्य विस्मरणं घटते इत्याश्चर्यमित्यर्थः ।

(ख) यदि एवम् अस्ति खलु समागमः कालेन तत्रभवत्या ।

(ग) न खलु मातापितरौ भर्तृवियोगदुःखितां दुहितरं द्रष्टुं पारयतः ।

(घ) शकुन्तलासमागमः स्वप्नो नु स्वप्नलब्धो वा माया ऐन्द्रजालिकी क्रिया नु ऐन्द्रजालिकक्रियया दर्शितो वा मतिभ्रमः बुद्धिविभ्रंशो नु बुद्धिविभ्रंशसम्पादितो वा शकुन्तलया मम समागम आसीदिति मे प्रतीतिः सा तु स्वप्नस्य मायाया मतिभ्रमस्य वा कार्यं न वास्तवी इत्यर्थः। शकुन्तलासमागमो वास्तव एव नासावपलपितुं शक्यमिति चेत् तत्राह तावत् तत्परिमितम् एव फलं यस्य तत् तथोक्तं पुण्यं सुचरितं क्लिष्टं नु परिक्षीणं वा मया किञ्चित् प्रकृष्टं पुण्यमर्जितमासीत् तद्बलेन स्वल्पकालमात्रं शकुन्तलासमागममलभे तच्च पुण्यमत्यल्पमिति स्वल्पमात्रफलदानेनैव परिक्षीणम् अतो न तत्प्रभावेण पुनस्तत्समागमप्रत्याशा अस्तीति भावः। तदेवाह तत् शकुन्तलारूपं दुर्लभं वस्तु अस-

विदूषकः । मा एव्वं । णं अङ्गुलीअअं एव्व णिदंसणं । अवस्संभावी अचिन्तणिज्जसमाअमो होइ (क) ।

राजा । अङ्गुलीयकं विलोक्य । अये इदं तावत् असुलभस्थानभ्रंशि शोचनीयम् ।

तव सुचरितमङ्गुलीय नूनं प्रतनु ममेव विभाव्यते फलेन ।
अरुणनखमनोरमासु तस्याश्च्युतमसि लब्धपदं यदङ्गुलीषु (ख) ॥

सानुमती । जइ अस्सहत्थगअं होउ सच्चं एव्व सोअणिज्जं होउ (ग) ।

विदूषकः । भो इअं णाममुद्दा केण उद्देसेण (१) तत्तहोदीए हत्थब्भासं पाविआ (घ) ।

भित्त्यै अपुनरावृत्तये अतीतम् अतिक्रान्तं न तत् पुनरावर्त्तिष्यते इत्यर्थः एते मनोरथाः नाम पुनस्तत्समागमविषयिणोऽभिलाषास्तु तटप्रपाताः कूलभङ्गसदृशाः क्षणविध्वंसिन इत्यर्थः यथा वर्षासु पूरोत्पीड़े प्रथममेकस्तटः पतति ततोऽन्यः ततश्च तटान्तरमिति क्रमेण तटानां पातो भवति शकुन्तलासमागमविषयिणो मनोरथा अपि तथा प्रथममेको मनोरथो विलीयते ततोऽन्यः ततश्च मनोरथान्तरमिति क्रमेण सर्व्व एव मनोरथाः विलयं यान्तीत्यर्थः । इन्द्रवज्रोपेन्द्रवज्रयोः सङ्कररूपा उपजातिः वृत्तम् ।

(क) मा एवम् । ननु अङ्गुरीयकम् एव निदर्शनम् । अवश्यम्भावी अचिन्तनीयसमागमः भवति ।

(ख) पुष्पिताग्रा वृत्तम् ।

(ग) यदि अन्यहस्तगतं भवेत् सत्यम् एव शोचनीयं भवेत् ।

(घ) भोः इयं नाममुद्रा केन उद्देशेन तत्रभवत्याः हस्ताभ्यासं प्रापिता । नाममुद्रा उत्कीर्णनामाक्षरम् अङ्गुरीयकम् । उद्देशेन अभिसन्धिना ।

---

(१) उद्देसेण । १ । २ । ४ । ५ । ७ । उग्घादेण । ३ । ६ ।

सानुमती । मम वि कोऊहलेण आआरिओ एसो (क) ।

राजा । श्रूयताम् । स्वनगराय (१) प्रस्थितं मां प्रिया सबाष्पमाह कियच्चिरेणार्य्यपुत्त्रः प्रतिपत्तिं दास्यतीति (ख) ।

विदूषकः । तदो तदो (ग) ।

राजा । पश्चादिमां मुद्रां तदङ्गुलौ निवेशयता मया प्रत्यभिहिता

एकैकमत्र दिवसे दिवसे मदीयं
नामाक्षरं गणय गच्छसि (२) यावदन्तम् ।
तावत् प्रिये मदवरोधगृहप्रवेशं
नेता जनस्तव समीपमुपैष्यतीति (घ) ॥

तच्च दारुणात्मना मया मोहान्नानुष्ठितम् (ङ) ।

(क) मम अपि कौतूहलेन आकारितः एषः ।

ममापि कौतूहलेन केनोद्देशेन शकुन्तलाया अङ्गुल्यां विनिवेशितमेतदङ्गुरीयकमिति परिज्ञातुमौत्सुक्येन एष राजवयस्यः आकारितः आहूतः अयमपि तेनैव कौतूहलेन प्रयोजितो राजानमपृच्छदित्यर्थः ।

(ख) प्रस्थितं प्रस्थास्यमानं भविष्यदर्थे क्तप्रत्ययः। कियच्चिरेण कियता विलम्बेन। प्रतिपत्तिं दास्यति वार्त्तां प्रेषयिष्यति।

(ग) ततः ततः।

(घ) गच्छसि यावदन्तम्— यावत् अन्तं समाप्तिं गच्छसि यावद्भिर्दिवसैः नामाक्षरगणना समाप्यते इत्यर्थः। मदवरोधगृहप्रवेशं नेता— मम अवरोधगृहे अन्तःपुरे प्रवेशं नेता प्रापयिता यस्त्वां ममान्तःपुरं नेष्यति इत्यर्थः। वसन्ततिलका वृत्तम्।

(ङ) दारुणात्मना नृशंसप्रकृतिकेन।

---

(१) यदा स्वनगराय। १। ४। ५। (२) गच्छसि। १। ४।
स्वनगराय। ३। गच्छति। २। ३। ६।

सानुमती। रमणीओ क्खु अवही विहिणा विसंवादिओ (क)।

विदूषकः। कहं धीवलकप्पिअस्स लोहिअमच्छस्स उदलब्भन्तले आसि (ख)।

राजा। शचीतीर्थं वन्दमानायाः सख्यास्ते हस्तात् गङ्गास्रोतसि परिभ्रष्टम्।

विदूषकः। जुज्जइ (ग)।

सानुमती। अदो एव्व तवस्सिणीए सउन्तलाए अधम्मभीरुणो इमस्स राएसिणो परिणए सन्देहो आसि (१)। अहवा एरिसो अणुराओ अहिआणं अवेक्खइ कहंविअ एदं (घ)।

राजा। उपालप्स्ये तावदिदमङ्गुलीयकम्।

विदूषकः। आत्मगतम्। गहीओ णेण पन्था उम्मत्तआणं (ङ)।

(क) रमणीयः खलु अवधिः विधिना विसंवादितः।

विसंवादितः विपर्य्यासितः वितथीकृत इत्यर्थः।

(ख) कथं धीवरकल्पितस्य रोहितमत्स्यस्य उदराभ्यन्तरे आसीत्।

धीवरकल्पितस्य धीवरेण खण्डशः कृतस्य।

(ग) युज्यते।

(घ) अतः एव तपस्विन्याः शकुन्तलायाः अधर्म्मभीरोः अस्य राजर्षेः परिणये सन्देहः आसीत्। अथवा ईदृशः अनुरागः अभिज्ञानम् अपेक्षते कथमिव एतत्।

शकुन्तलायाः परिणये राजर्षेः सन्देहः इत्यन्वयः।

(ङ) गृहीतः अनेन पन्थाः उन्मत्तकानाम्।

---

(१) सन्देहो संवुत्तो। १।   सन्देहो आसि।२।४।५।६।७।

राजा ।

कथं नु तं बन्धुरकोमलाङ्गुलिं
करं विहायासि निमग्नमम्भसि ।

अथवा । अचेतनं नाम गुणं न लक्षयेत्
मयैव कस्मादवधीरिता प्रिया (क) ॥

विदूषकः । आत्मगतम् । कहं बुभुक्खाए खादिदव्वो म्हि (ख) ।

राजा । अकारणपरित्यक्ते अनुशयतप्तहृदयस्तावत् अनुकम्प्यतामयं जनः पुनर्दर्शनेन (१) ।

प्रविश्यापटीक्षेपेण (२) चित्रफलकहस्ता

चतुरिका । इअं चित्तगआ भट्टिणी (ग) ।

चित्रफलकं दर्शयति ।

विदूषकः । साहु वअस्स । महुरावत्थाणदंसणिज्जो भावाणुप्पवेसो । खलइ विअ मे दिट्ठी णिण्णुण्णअप्पदेसेसु (घ) ।

(क) अचेतनं नाम गुणं न लक्षयेदित्यस्योदाहरणं मयैव कस्मादवधीरिता प्रियेति मयापि अचेतनेनैव प्रिया प्रत्याख्याता इत्यर्थः । वंशस्थविलं वृत्तम् ।

(ख) कथं बुभुक्षया खादितव्यः अस्मि ।

(ग) इयं चित्रगता भट्टिनी ।

भट्टिनी देवीव्यतिरिक्ता राजमहिला ।

(घ) साधु वयस्य । मधुरावस्थानदर्शनीयः भावानुप्रवेशः । स्खलति इव मे दृष्टिः निम्नोन्नतप्रदेशेषु ।

मधुरावस्थानदर्शनीयः भावानुप्रवेशः— भावस्य स्वाभाविक्या अवस्थायाः अनुप्रवेशः अभिव्यञ्जनं मधुरेण सुन्दरेण अवस्थानेन विन्यासेन दर्शनीयः मनोरमः ।

---

(१) पुनर्दर्शनेन । १ । २ । ४ । ५ ।
सदर्शनेन । ३ ।

(२) अपटीक्षेपेण । १ । ३ ।
पटाक्षेपेण । २ । ३ । ४ । ५ ।

सानुमती। अम्मो एसा राएसिणो णिउणदा। जाणे सही अग्गदो मे वट्टइ त्ति (क)।

राजा।

यद्यत् साधु न चित्रे स्यात् क्रियते तत्तदन्यथा।
तथापि तस्या लावण्यं रेखया किञ्चिदन्वितम् (ख)॥

सानुमती। सरिसं एदं पच्छातावगरुणो सणेहस्स अणवलेवस्स अ (ग)।

विदूषकः। भो दाणिं तिस्सि तत्तहोदीओ दीसन्ति। सव्वाओ अ दंसणीआओ। कतमा एत्थ तत्तहोदी सउन्तला (घ)।

सानुमती। अणहिण्णो क्खु एरिसस्स रूवस्स मोहदिट्ठी अअं जणो (ङ)।

(क) अम्मो एषा राजर्षेः निपुणता। जाने सखी अग्रतः मे वर्त्तते इति।

(ख) चित्रे यत् यत् साधु सम्यग्विन्यस्तं न स्यात् न भवेत् तत् तत् अन्यथा प्रकारान्तरेण क्रियते विन्यस्यते सम्यक् चित्रयितुमशक्योऽंशः यदृच्छया प्रकारान्तरेण चित्र्यते इत्यर्थः एष एव चित्रकराणां सर्व्वसाधारणो व्यवहारः मयापि अस्मिंश्चित्रे स एवानुसृतः अतश्चित्रमिदं न समीचीनं संवृत्तमित्यत्र सन्देहो नास्ति तथापि तस्याः शकुन्तलायाः लावण्यं रेखया चित्रकर्म्मणा किञ्चित् कियता अंशेन अन्वितम् उन्मीलितम्। पथ्यावक्त्रं वृत्तम्।

(ग) सदृशम् एतत् पश्चात्तापगुरोः स्नेहस्य अनवलेपस्य च।

पश्चात्तापेन गुरोः महीयसः स्नेहस्य अनुरागस्य अनवलेपः गर्व्वाभावः निरहङ्कारप्रकृतिता इत्यर्थः तस्य च एतत् सदृशम्।

(घ) भोः इदानीं तिस्रः तत्रभवत्यः दृश्यन्ते। सर्व्वाः च दर्शनीयाः। कतमा अत्र तत्रभवती शकुन्तला।

(ङ) अनभिज्ञः खलु ईदृशस्य रूपस्य मोघदृष्टिः अयं जनः।

राजा। त्वं तावत् कतमां तर्कयसि।

विदूषकः। तक्केमि जा एसा सिढ़िलकेसवन्धुब्वन्त- (१) कुसुमेण केसन्तेण उब्भिस्सेअविन्दुणा वअणेण विसेसदो ओसरिआहिं वाहाहिं अवसेअसिणिद्धतरुणपल्लवस्स चूअपाअवस्स पासे ईसि परिस्सन्ता विअ आलिहिआ एसा सउन्तला इदराओ सहीओ त्ति (क)।

राजा। निपुणो भवान्। अस्त्यत्र मे भावचिह्नम् (ख)।

स्विन्नाङ्गुलिविनिवेशो रेखाप्रान्तेषु दृश्यते मलिनः।

अश्रु च कपोलपतितं दृश्यमिदं वर्त्तिकोच्छ्वासात् (ग)॥

(क) तर्कयामि या एषा शिथिलकेशबन्धोद्वान्तकुसुमेन केशान्तेन उद्भिन्नस्वेदविन्दुना वदनेन विशेषतः अपसृताभ्यां बाहुभ्याम् अवसेकस्निग्धतरुणपल्लवस्य चूतपादपस्य पार्श्वे ईषत् परिश्रान्ता इव आलिखिता एषा शकुन्तला इतरे सख्यौ इति।

विशेषतः अपसृताभ्याम्— विशेषतः अतिशयेन अपसृताभ्यां स्रस्तांसाभ्याम्।

(ख) भावचिह्नं सात्त्विकभावलक्षणम्।

(ग) रेखायाः चित्रकर्म्मणः प्रान्तेषु स्विन्नानां स्वेदजलार्द्राणाम् अङ्गुलीनां विनिवेशः विन्यासः मलिनः दृश्यते अङ्गुलिस्रुतस्वेदजलसम्पर्कादित्यर्थः कपोले चित्रार्पितायाः शकुन्तलायाः गण्डदेशे पतितं मम नयनात् स्खलितम् इदम् अश्रु च वर्त्तिका चित्रकर्म्मणः परिरक्षणार्थं चित्रपटस्योपरि प्रयुज्यमानो लेपविशेषः तस्याः उच्छ्वासात् उच्छूनतया दृश्यं दृष्टिगोचरम्। आर्या जातिः।

---

(१) केसवन्धणुब्वन्त। १। ६। ७। केसवन्धुब्वन्त। २। ३। ४। ५।

चतुरिके अर्द्धलिखितमेतद्विनोदस्थानम्। गच्छ (१) वर्त्तिकां तावदानय (क)।

चतुरिका। अज्ज माठव्व अवलम्बसु चित्तफलअं जाव आअच्छामि (ख)।

राजा। अहमेव एतदवलम्बे।

यथोक्तं करोति।

निष्क्रान्ता चेटी।

राजा। साक्षात् प्रियामुपगतामपहाय पूर्ब्बं
चित्रार्पितामहमिमां बहु मन्यमानः (२)।
स्रोतोवहां पथि निकामजलामतीत्य
जातः सखे प्रणयवान् मृगतृष्णिकायाम् (ग)॥

(क) वर्त्तिकां चित्रभाण्डम्।

(ख) आर्य्य माठव्य अवलम्बस्व चित्रफलकं यावत् आगच्छामि।

(ग) निकामजलां प्रभूतोदकाम्। प्रणयवान् अनुरक्तः। मृगतृष्णिकायां मरुमरीचिकायाम्। वसन्ततिलका वृत्तम्।

---

(१) तस्माद् वेगात् गच्छ। १। तस्मात् गच्छ। ३।
तस्माद्धि गच्छ। २। ४। गच्छ। ५।

(२) राजा। अहं हि
साक्षात्प्रियामुपगतामपहाय पूर्ब्बं
चित्रार्पितां मुहुरिमां बहु मन्यमानः। १। २। ४।

राजा। अहं हि
साक्षात्प्रियामुपगतामपहाय पूर्ब्बं
चित्रार्पितां पुनरिमां बहु मन्यमानः। ३।

राजा।
साक्षात्प्रियामुपगतामपहाय पूर्ब्बं
चित्रार्पितामहमिमां बहु मन्यमानः। ५।

विदूषकः। आत्मगतम्। एसो अत्तभवं णइं अतिक्कमिअ मअतिण्हिआए संकन्तो। प्रकाशम्। भो अवरं किं एत्थ लिहिअव्वं (क)।

सानुमती। जो जो पदेसो सहीए मे अहिरूवो तं तं आलिहिउकामो होउ (ख)।

राजा। श्रूयताम्

कार्य्या सैकतलीनहंसमिथुना स्रोतोवहा मालिनी
पादास्तामभितो निषण्णहरिणा गौरीगुरोः पावनाः।
शाखालम्बितवल्कलस्य च तरोर्निर्म्मातुमिच्छाम्यधः
शृङ्गे कृष्णमृगस्य वामनयनं कण्डूयमानां मृगीम् (ग)॥

विदूषकः। आत्मगतम्। जह अहं देक्खामि पूरिअव्वं णेण चित्तफलअं लम्बकुच्चाणं तावसाणं कअम्बेहिं (घ)।

राजा। वयस्य अन्यच्च शकुन्तलायाः प्रसाधनमभिप्रेतम् अत्र विस्मृतमस्माभिः (१)।

(क) एषः अत्रभवान् नदीम् अतिक्रम्य मृगतृष्णिकया संक्रान्तः। भोः अपरं किम् अत्र लिखितव्यम्।

(ख) यः यः प्रदेशः सख्याः मम अभिरूपः तं तम् आलिखितुकामः भवेत्।

अभिरूपः अभिमतः प्रीतिकर इति यावत्।

(ग) शार्दूलविक्रीड़ितं वृत्तम्।

(घ) यथा अहं पश्यामि पूरयितव्यम् अनेन चित्रफलकं लम्बकूर्च्चानां तापसानां कदम्बैः।

लम्बकूर्च्चानां दीर्घश्मश्रूणाम्।

(१) प्रसाधनमभिप्रेतमत्र विस्मृतमस्माभिः। १। २। ३। ४। प्रसाधनमभिप्रेतमस्माभिः। ५। ६।

विदूषकः । किंविअ (क) ।

सानुमती । वणवासस्स सोउमारस्स अ (१) जं सरिसं होहिइ (ख) ।

राजा ।

कृतं न कर्णार्पितबन्धनं सखे
शिरीषमागण्डविलम्बिकेशरम् ।
न वा शरच्चन्द्रमरीचिकोमलं
मृणालसूत्रं रचितं स्तनान्तरे (ग) ॥

विदूषकः । भो किणु तत्तहोई रत्तकुअलअपल्लअसोहिणा अग्गहत्थेण मुहं ओवारिअ चदूअचदूआ विअ ठिआ । सावधानं निरूप्य (२) । आः एसो दासीए पुत्तो कुसुमरसपाडच्चरो तत्तहोईए वअणं अहिलङ्घइ मङ्कअरो (घ) ।

(क) किमिव ।

(ख) वनवासस्य सौकुमार्य्यस्य च यत् सदृशं भविष्यति ।

(ग) हे सखे कर्णयोः अर्पितम् आरोपितं बन्धनं वृन्तं यस्य तत् तथोक्तम् आगण्डं कपोलदेशं यावत् विलम्बिनः लम्बमानाः केशराः किञ्जल्काः यस्य तत् तथोक्तं शिरीषं शिरीषकुसुमं न कृतं लिखितम् । वंशस्थविलं वृत्तम् ।

(घ) भोः किन्नु तत्रभवती रक्तकुवलयपल्लवशोभिना अग्रहस्तेन मुखम् अपवार्य्य चकितचकिता इव स्थिता । आः एषः दास्याः पुत्त्रः कुसुमरसपाटच्चरः तत्रभवत्याः वदनम् अभिलङ्घते मधुकरः ।

---

(१) वणवासस्स सोउमारस्स अविणअस्स अ । १ । २ । ३ । ४ । ६ । ७ । वणवासस्स सोउमारस्स अ । ५ ।

(२) सावधानं निरूप्य । दृष्ट्वा । १ । २ । ३ । सावधानं निरूप्य । ४ । ५ ।

राजा । ननु वार्य्यतामेष धृष्टः ।

विदूषकः । भवं एव्व अविणीआणं सासिआ इमस्स वारणे पभविस्सदि (क) ।

राजा । युज्यते । अयि भोः कुसुमलताप्रियातिथे किमत्र परिपतनखेदमनुभवसि (ख) ।

एषा कुसुमनिषण्णा तृषितापि सती भवन्तमनुरक्ता ।
प्रतिपालयति मधुकरी न खलु मधु विना त्वया पिबति (ग) ॥

सानुमती । अज्ज अहिजादं क्खु एसो वारिदो (घ) ।

विदूषकः । पडिसिद्धा वि वामा एसा जादी (ङ) ।

राजा । एवं भो न मे शासने तिष्ठसि । श्रूयतां तर्हि सम्प्रति

अक्लिष्टबालतरुपल्लवलोभनीयं -
पीतं मया सदयमेव रतोत्सवेषु

रक्तकुवलयपल्लवशोभिना कोकनदकिसलयशोभाधारिणा । कुसुमरसपाटच्चरः मकरन्दचौरः । अभिलङ्घते आक्रामति ।

(क) भवान् एव अविनीतानां शासिता अस्य वारणे प्रभविष्यति ।

(ख) कुसुमलताप्रियातिथे— कुसुमलतायाः पुष्पितायाः लतायाः प्रियः अभिमतः अतिथिः तत्सम्बोधनम् ।

(ग) अनुरक्ता मधुकरी भवन्तं प्रतिपालयति इत्यन्वयः । आर्य्या जातिः ।

(घ) आर्य्य अभिजातं खलु एषः वारितः ।

अभिजातं समीचीनं यथा तथा अयमेव अस्य समीचीनो वारणप्रकार इत्यर्थः । राजानं प्रति सोत्प्रासोक्तिरियम् ।

(ङ) प्रतिषिद्धा अपि वामा एषा जातिः ।

वा प्रतिकूलचारिणी प्रतिषेधं न परिगणयतीत्यर्थः ।

बिम्बाधरं स्पृशसि चेद्भ्रमर प्रियायाः
त्वां कारयामि कमलोदरबन्धनस्थम् (क) ॥

विदूषकः । एव्वं तिक्खणदण्डस्स किं ण भाइस्सं । प्रहस्य । आत्मगतम् । एसो दाव उम्मत्तो । अहं वि एतस्स संगेण एरिसवण्णो विअ (१) संवुत्तो । प्रकाशम् । भो चित्तं क्खु एदं (ख) ।

राजा । कथं चित्रम् ।

सानुमती । अहं वि दाणिं अवगअत्था किं उण जहालिहिदाणुभावी एसो (ग) ।

राजा । वयस्य किमिदमनुष्ठितं पौरोभाग्यम् (घ) ।

(क) कमलोदरबन्धनस्थम्— कमलस्य उदरे अभ्यन्तरे बन्धने तिष्ठतीति तं तथोक्तं कमलाभ्यन्तररूपकारागृहनिरुद्धमित्यर्थः । वसन्ततिलका वृत्तम् ।

(ख) एवं तीक्ष्णदण्डात् कथं न भेष्यति । एषः तावत् उन्मत्तः । अहम् अपि एतस्य सङ्गेन ईदृशवर्णः इव संवृत्तः । भोः चित्रं खलु एतत् ।

ईदृशवर्णः— ईदृशाः वर्णाः अक्षराणि वाक्यानीति यावत् यस्य सः तथोक्तः अहमपि उन्मत्तवत् प्रलपामीत्यर्थः ।

(ग) अहम् अपि इदानीम् अवगतार्था किं पुनः यथालिखितानुभावी एषः ।

अहमपि इदानीं भोश्चित्रं खल्वेतत् इति विदूषकवाक्यश्रवणादनन्तरम् अवगतः परिज्ञातः अर्थः चित्रमिदमित्येवंरूपो विषयो यया सा तथोक्ता संवृत्ता यथा लिखितं चित्रितं तथा अनुभवतीति तादृशः एषः पुनः किम् अस्य विषये किन्तु वक्तव्यम् । इतः पूर्व्वं चित्रं दृष्ट्वा ममापि भ्रमं आसीत् किमत्र चित्रं यदि तन्मयरूपस्मरदशापन्नस्य एतस्य चित्रार्पितायां शकुन्तलायां वास्तवत्वाभिमानो भवेदित्यर्थः ।

(घ) पौरोभाग्यम् अहिताचरणम् ।

---

(१) एरिसवण्णो विअ । १ । २ । ४ । ६ । एरिसजणो विअ । ३ । ७ ।

दर्शनसुखमनुभवतः साक्षादिव तन्मयेन हृदयेन ।
स्मृतिकारिणा त्वया मे पुनरपि चित्रीकृता कान्ता (क) ॥

बाष्पं विहरति ।

सानुमती । पुव्वावरविरोही अपुव्वो एसो विरहमग्गो (ख) ।

राजा । वयस्य कथमेवमविश्रान्तदुःखमनुभवामि ।

प्रजागरात् खिलीभूतस्तस्याः स्वप्ने समागमः ।
बाष्पस्तु न ददात्येनां द्रष्टुं चित्रगतामपि (ग) ॥

सानुमती । सव्वहा पमज्जिअं तुए पच्चादेसदुक्खं सउन्तलाए (घ) ।

प्रविश्य

चतुरिका । जेदु भट्टा । वट्टिआकरण्डअं गेण्हिअ इदोमुहं पत्थिअ म्हि (ङ) ।

राजा । किञ्च ।

चतुरिका । सो मे हत्थादो अन्तरा तरलिआदुदिआए

(क) आर्य्या जातिः ।

(ख) पूर्व्वापरविरोधी अपूर्व्वः एषः विरहमार्गः ।

पूर्व्वं चित्रस्य चित्रत्वेन ज्ञानं पुनस्तन्मयावस्थायां सत्यत्वेन ज्ञानं पुनरपि चित्रत्वेन ज्ञानमिति पूर्व्वापरविरोधः । राघवभट्टः ।

(ग) खिलीभूतः सप्रतिबन्धः । पथ्यावक्त्रं वृत्तम् ।

(घ) सर्व्वथा प्रमृष्टं त्वया प्रत्यादेशदुःखं शकुन्तलायाः ।

(ङ) जयतु भर्त्ता । वर्त्तिकाकरण्डकं गृहीत्वा इतोमुखं प्रस्थिता अस्मि । वर्त्तिकाकरण्डकं चित्रभाण्डम् ।

देईए वसुमतीए अहं एव्व अज्जउत्तस्स उवणाइस्सं त्ति सवलक्कारं गहीओ (क) ।

विदूषकः । दिट्ठिआ तुमं मुक्का (ख) ।

चतुरिका । जाव देईए विड़वलग्गं उत्तरीअं तरलिआ मोचेइ ताव मए णिव्वाहिओ अत्ता (ग) ।

राजा । वयस्य उपस्थिता देवी बहुमानगर्व्विता च । भवानिमां प्रतिकृतिं रक्षतु ।

विदूषकः । अत्ताणं त्ति भणाहु । चित्रफलकमादाय उत्थाय च । जइ भवं अन्तेउरकालकूड़ाओ मुच्चीअइ तदो मं मेहप्पतिच्छन्दे पासादे सद्दावेसु (घ) ।

द्रुतपदं निष्क्रान्तः ।

(क) सः मे हठात् अन्तरा तरलिकाद्वितीयया देव्या वसुमत्या अहम् एव आर्य्यपुत्रस्य उपनेष्यामि इति सबलात्कारं गृहीतः ।

अन्तरा मध्ये अर्द्धपथे इत्यर्थः । सबलात्कारं बलप्रयोगपूर्व्वकम् ।

(ख) दिष्ट्या त्वं मुक्ता ।

(ग) यावत् देव्याः विटपलग्नम् उत्तरीयं तरलिका मोचयति तावत् मया निर्व्वाहितः आत्मा ।

निर्व्वाहितः मोचितः पलायितास्मीत्यर्थः ।

(घ) आत्मानम् इति भण । यदि भवान् अन्तःपुरकालकूटात् मुच्यते ततः मां मेघप्रतिच्छन्दे प्रासादे शब्दायस्व ।

भवानिमां प्रतिकृतिं रक्षतु इति कथं भणसि आत्मानं रक्षतु भवान् इति भण यदि देवी इहागत्य प्रतिकृतिमिमां निरीक्षेत तदा निःसंशयं मम जीवितसंशयो भवेदिति भावः । मेघप्रतिच्छन्दे मेघप्रतिच्छन्दनामके । शब्दायस्व आह्वय ।

सानुमती । अखसंकन्तहिअओ वि पढमसंभावणं अवेक्खदि । सिढिलसोहओ (१) दाणिं एसो (क) ।

प्रविश्य पत्रहस्ता

प्रतीहारी । जेदु देओ (ख) ।

राजा । वेत्रवति न खल्वन्तरा दृष्टा त्वया देवी ।

प्रतीहारी । अहइं । पत्तहत्थं मं देक्खिअ पडिणिउत्ता (ग) ।

राजा । कार्य्यज्ञा कार्य्योपरोधं मे परिहरति ।

प्रतीहारी । देअ अमच्चो विण्णवेदि अत्थजातस्स गणणा-बहुलआए एक्कं एव्व पोरकज्जं अवेक्खिअं तं देओ पत्तारूढं पच्च-क्खीकरेदु त्ति (घ) ।

राजा । इतः पत्रिकां दर्शय ।

(क) अन्यसंक्रान्तहृदयः अपि प्रथमसम्भावनाम् अपेक्षते । शिथिल-सौहृदः इदानीम् एषः ।

अन्यसंक्रान्तहृदयः— अन्यस्मिन् संक्रान्तम् अनुरक्तं हृदयं यस्य स तथोक्तः । प्रथमसम्भावनामपेक्षते प्रथमानुरागमनुरुध्यते । शिथिल-सौहृदः— शिथिलं मन्दीभूतं सौहृदं प्रेम यस्य स तथोक्तः अन्यसंक्रान्तहृदय-तया वसुमत्यां मन्दानुरागः संवृत्त इत्यर्थः ।

(ख) जयतु देवः ।

(ग) अथकिम् । पत्रहस्तां मां दृष्ट्वा प्रतिनिवृत्ता ।

(घ) देव अमात्यः विज्ञापयति अर्थजातस्य गणनाबहुलतया एकम् एव पौरकार्य्यम् अवेक्षितं तत् देवः पत्रारूढं प्रत्यक्षीकरोतु ।

अर्थजातस्य गणनाबहुलतया— अर्थजातस्य राजस्वाधिकृतैः प्रेषितस्य द्रव्यसमूहस्य गणनायाः बहुलतया बाहुल्येन तद्गणनायां प्रभूतस्य कालस्याति-वाहिततया इत्यर्थः ।

---

(१) असिढिलसोहओ । १ । २ । सिढिलसोहओ । ६ ।
अदिसिढिलसोहओ ।३।४।७।

प्रतिहारी । उपनयति ।

राजा । अनुवाच्य । कथं समुद्रव्यवहारी सार्थवाहो धनमित्रो नाम नौव्यसने विपन्नः । अनपत्यश्च किल तपस्वी (१) । राजगामी तस्यार्थसञ्चय (२) इत्येतदमात्येन लिखितं । कष्टं खल्वनपत्यता । चेत्ववति बहुधनत्वाद् (३) बहुपत्नीकेन तत्रभवता भवितव्यम् । विचार्य्यतां यदि काचिदापन्नसत्त्वा तस्य भार्य्यासु स्यात् (क) ।

प्रतीहारी । देव दाणिं एव्व साकेतअस्स सेट्ठिणो दुहिआ णिव्वुत्तपुंसवणा जाआ से सुणीअदि (ख) ।

राजा । ननु गर्भः पित्र्यं रिक्थमर्हति (ग) । गच्छ एवम् अमात्यं ब्रूहि ।

प्रतीहारी । जं देओ आणवेदि (घ) ।

प्रस्थिता ।

(क) समुद्रव्यवहारी— समुद्रे व्यवहरति पण्यायते इति पोतवणिगित्यर्थः । सार्थवाहः वणिक् । नौव्यसने विपन्नः नौकानिमज्जने मृतः । अर्थसञ्चयः सञ्चितोऽर्थराशिः । विचार्य्यताम् अन्विष्यताम् ।

(ख) देव इदानीम् एव साकेतस्य श्रेष्ठिनः दुहिता निर्वृत्तपुंसवना जाया अस्य श्रूयते ।

साकेतस्य श्रेष्ठिनः— साकेतस्य अयोध्यायाः श्रेष्ठिनः अयोध्यानिवासिनो वणिक्प्रधानस्य । निर्वृत्तपुंसवना— निर्वृत्तं सम्पन्नं पुंसवनं गर्भाधानात् अनन्तरं क्रियमाणः संस्कारो यस्याः सा तथोक्ता ।

(ग) गर्भः गर्भस्थमपत्यम् ।

(घ) यत् देवः आज्ञापयति ।

---

(१) तरस्वी । १ । ४ ।
तपस्वी । २ । ३ ।
(२) तस्यार्थसञ्चयः । १ । २ । ४ ।
तस्य सञ्चयः । ३ ।
(३) चेत्ववति बहुधनत्वात् । १ । ३ ।
बहुधनत्वात् । २ । ४ ।

राजा । एहि तावत् ।

प्रतीहारी । इअं म्हि (क) ।

राजा । किमनेन सन्ततिरस्ति नास्तीति

येन येन वियुज्यन्ते प्रजाः स्निग्धेन बन्धुना ।
स स पापादृते तासां (१) दुष्यन्त इति घुष्यताम् (ख) ॥

प्रतीहारी । एव्वं णाम घोसइअव्वं । निष्क्रम्य । पुनः प्रविश्य । काले पवुट्ठं विअ अहिणन्दिअं देअस्स सासणं (ग) ।

राजा । दीर्घमुष्णञ्च निःश्वस्य । एवं भोः सन्ततिच्छेदनिरवलम्बानां कुलानां मूलपुरुषावसाने सम्पदः परमुपतिष्ठन्ति । ममाप्यन्ते पुरुवंशश्रीरकाल इवोप्तबीजा भूरेवंवृत्ता (घ) ।

प्रतीहारी । पडिहदं अमङ्गलं (ङ) ।

राजा । धिङ्मामुपस्थितश्रेयोऽवमानिनम् ।

(क) इयम् अस्मि ।

(ख) पापादृते पापिनं विना पापिनः प्रतिनिधिर्दुष्यन्तो न भविष्यतीत्यर्थः । पथ्यावक्त्रं वृत्तम् ।

(ग) एवं नाम घोषयितव्यम् । काले प्रवृष्टम् इव अभिनन्दितं देवस्य शासनम् ।

काले प्रवृष्टमिव यथाकालप्रवर्षणमिव काले प्रवृष्टे पर्ज्जन्ये लोको यथा हृष्यतीत्यर्थः ।

(घ) सन्ततिच्छेदनिरवलम्बानाम्— सन्ततिच्छेदेन वंशलोपेन निरवलम्बानाम् अवलम्बरहितानाम् । मूलपुरुषावसाने— मूलपुरुषस्य वर्त्तमानस्य वंशावलम्बभूतस्य जनस्य अवसाने अन्ते देहात्यये इत्यर्थः । उपतिष्ठन्ति आश्रयन्ति । एवंवृत्ता ईदृगवस्थापन्ना मम अनपत्यतया सन्ततिच्छेदात् मदवसाने पुरुवंशश्रीर्निरवलम्बा भविष्यतीत्यर्थः ।

(ङ) प्रतिहतम् अमङ्गलम् ।

(१) तासाम् । १ । २ । ३ । ४ । स्त्रीणाम् । ६ ।

सानुमती । असंसअं सहिं एव्व हिअए करिअ णिन्दिओ णेण अप्पा (क) ।

राजा । संरोपितेऽप्यात्मनि धर्म्मपत्नी

त्यक्ता मया नाम कुलप्रतिष्ठा ।

कल्पिष्यमाणा महते फलाय

वसुन्धरा काल इवोप्तबीजा (ख) ॥

सानुमती । अपरिच्छिण्णा दाणिं दे सन्तई होहिदि (ग) ।

चतुरिका । जनान्तिकम् । अए इमिणा सत्थवाहवुत्तन्तेण विउणुव्वेओ (१) भट्टा । णं अस्सासिउं मेहपडिच्छन्दादो अज्जं माढव्वं गेण्हिअ आअच्छस (२) (घ) ।

(क) असंशयं सखीम् एव हृदये कृत्वा निन्दितः अनेन आत्मा ।

(ख) संरोपितेऽप्यात्मनि— आत्मनि स्वस्वरूपे संरोपिते गर्भे सम्प्रवेशिते अपि मया तस्या गर्भे उत्पादितेऽपीत्यर्थः । अत्र मनुः—

पतिर्भार्य्यां सम्प्रविश्य गर्भो भूत्वेह जायते ।

जायायास्तद्धि जायात्वं यदस्यां जायते पुनः ॥ ९ । ८ ।

कुलप्रतिष्ठा कुलस्यावलम्बः कुलस्थितिनिदानभूता इति यावत् । कल्पिष्यमाणा प्रभविष्यन्ती । इन्द्रवज्रोपेन्द्रवज्रयोः सङ्कररूपा उपजातिः वृत्तम् ।

(ग) अपरिच्छिन्ना इदानीं ते सन्ततिः भविष्यति ।

शकुन्तलासमागमस्य अवश्यम्भावित्वादिति भावः ।

(घ) अये अनेन सार्थवाहवृत्तान्तेन द्विगुणोद्वेगः भर्त्ता । एनम् आश्वासयितुं मेघप्रतिच्छन्दात् आर्य्यं माढव्यं गृहीत्वा आगच्छ ।

---

(१) विउणुव्वेओ । १ । २ । ३ । ६ । ७ । (२) आअच्छामि । १ । २ । ३ । ५ । ६ ।

विउणुस्सुओ । ४ । । ७ ।

प्रतीहारी। सुट्ठु भणासि (क)। निष्क्रान्ता।

राजा। अहो दुष्यन्तस्य संशयमारूढ़ाः पिण्डभाजः (१)। कुतः

अस्मात्परं वत यथाश्रुति सम्भृतानि
को नः कुले निवपनानि नियच्छतीति।
नूनं प्रसूतिविकलेन मया प्रसिक्तं
धौताश्रुशेषमुदकं पितरः पिवन्ति (ख)॥

मोहमुपागतः।

चतुरिका। ससम्भ्रममवलम्ब्य (२)। समस्ससउ भट्टा (ग)।

सानुमती। हद्धी हद्धी सति क्खु दीवे ववहाणदोसेण एसो अन्धआरदोसं अणुहोदि (३)। अहं दाणिं एव्व णिव्वुदं करामि। अहवा सुदं मए सउन्तलं समस्सासअन्तीए महेन्दजणणीए

(क) सुष्ठु भणसि।

(ख) वत खेदे अस्मात् दुष्यन्तात् परम् अनन्तरं नः अस्माकं कुले वंशे कः यथाश्रुति वेदविधिमनुसृत्य सम्भृतानि अनुष्ठितानि निवपनानि पिण्डोदक-क्रियारूपाणि पितृदानानि नियच्छति ददाति इति एवं संशय्य नूनं निश्चितं पितरः प्रसूतिविकलेन अपत्यविरहितेन मया प्रसिक्तं दत्तं धौतं क्षालितम् अश्रु येन तञ्च तत् शेषम् अवशिष्टञ्च तादृशम् उदकं जलं पिवन्ति तर्पणजलस्य कियता अंशेन अश्रुदिग्धं करं प्रक्षाल्य अवशिष्टमंशमुपभुञ्जते इत्यर्थः। वसन्ततिलका वृत्तम्।

(ग) समाश्वसितु भर्त्ता।

---

(१) पिण्डभाजः। १। २। ३। पितरः। ४।

(२) अवलोक्य। १। ४। अवलम्ब्य। २। ३।

(३) अणुहोदि। १। २। ३। ४। ६। अणुहोदि राएसी। ७।

मुहादो जण्णभाओस्सुआ देवा एव्व तह अणुचिट्ठिस्सन्ति जह अइरेण धम्मपदिणिं भट्टा अहिणन्दिस्सदि त्ति। ता ण जुत्तं कालं पतिपालिदुं जाव इमिणा वुत्तन्तेण पिअसहिं समस्सासेमि (क)।

उद्भ्रान्तकेन (ख) निष्क्रान्ता।

नेपथ्ये

अब्बह्मण्णं (१) (ग)।

(क) हा धिक् हा धिक् सति खलु दीपे व्यवधानदोषेण एषः अन्धकारदोषम् अनुभवति। अहम् इदानीम् एव निर्वृतं करोमि। अथवा श्रुतं मया शकुन्तलां समाश्वासयन्त्याः महेन्द्रजनन्याः मुखात् यज्ञभागोत्सुकाः देवाः एव तथा अनुष्ठास्यन्ति यथा अचिरेण धर्म्मपत्नीं भर्त्ता अभिनन्दिष्यति इति। तत् न युक्तं कालं प्रतिपालयितुं यावदनेन वृत्तान्तेन प्रियसखीं समाश्वासयामि।

निर्वृतं करोमि— निर्वृतं शकुन्तलावृत्तान्तकथनेन सुखितं करोमि। महेन्द्रजनन्याः अदितेः। तन्न युक्तं कालं प्रतिपालयितुमित्यादि— तत् तस्मात् कालं प्रतिपालयितुम् अपेक्षितुं व्यर्थमतिवाहयितुमिति यावत् न युक्तं नोचितम्। यदि दुष्यन्तसमाश्वासनं मम कर्त्तव्यं स्यात् तदा कियन्तं कालमिहावतिष्ठेय तच्च देवा एवानुष्ठास्यन्ति अतस्तदर्थं समयमनतिवाह्य प्रियसखीसमाश्वासनार्थं सत्वरमितः प्रस्थानमेव उचितमिति भावः।

(ख) उद्भ्रान्तकेन नृत्यविशेषेण। प्रथमं दक्षिणं चरणमुत्थाप्य वामं चरणं किञ्चिदाकुञ्च्य त्वरितं वामावर्त्तभ्रमणम् उद्भ्रान्तकमुच्यते। तल्लक्षणमुक्तं राघवभट्टधृतसङ्गीतसुधानिधौ यथा

पूर्व्वं दक्षिणमुत्थाप्य पश्चादाकुञ्चयन् पदम्।
वामं शीघ्रं भ्रमेद्वामावर्त्तमुद्भ्रान्तकं विदुः॥

(ग) अब्रह्मण्यम् अवध्यताप्रार्थना यथाहं न हन्येय तथा क्रियतामित्येवंरूपा।

---

(१) अब्रह्मण्यम्। १। २। ३। ४। ६। ७।

राजा । प्रत्यागतः (क) कर्णं दत्त्वा । अये माठव्यस्येवार्त्तस्वरः । कः कोऽत्र भोः ।

प्रविश्य ससम्भ्रमम्

प्रतीहारी । परित्ताअदु देओ संसअगदं वअस्सं (ख) ।

राजा । केन आत्तगन्धो माणवकः (ग) ।

प्रतीहारी । अदिट्ठरूवेण केण वि सत्तेण अतिक्कमिअ मेहप्पडिच्छन्दस्स पासादस्स अग्गभूमिं आरोविओ (घ) ।

राजा । उत्थाय । मा तावत् (ङ) । ममापि सत्त्वैरभिभूयन्ते गृहाः । अथवा

अहन्यहन्यात्मन एव तावत्
ज्ञातुं प्रमादस्खलितं न शक्यम् ।
प्रजासु कः केन पथा प्रयाती-
त्यशेषतो वेदितुमस्ति शक्तिः (१) (च) ॥

(क) प्रत्यागतः लब्धसंज्ञः ।

(ख) परित्रायतां देवः संशयगतं वयस्यम् ।

संशयगतं जीवितसंशयं प्राप्तम् ।

(ग) आत्तगन्धः अभिभूतः ।

(घ) अदृष्टरूपेण केन अपि सत्त्वेन अतिक्रम्य मेघप्रतिच्छन्दस्य प्रासादस्य अग्रभूमिम् आरोपितः ।

अतिक्रम्य अभिभूय ।

(ङ) मा तावत्— मा तावत् दुरात्मा मम वयस्यं व्यापादयतु इत्यर्थः ।

(च) प्रमादस्खलितम् अनवधानेन विपरीतचरणम् । वेदितुमस्ति शक्तिः— वेदितुं परिज्ञातुं शक्तिः सामर्थ्यम् अस्ति किं नैवेत्यर्थः । इन्द्रवज्रोपेन्द्रवज्रयोः सङ्कररूपा उपजातिः वृत्तम् ।

---

(१) वेदितुमस्ति शक्तिः । १ । २ । ४ । वेदितुमस्त्यशक्तिः । ३ ।

नेपथ्ये

भो वअस्स अविहा अविहा (क) ।

राजा । गतिभेदेन(ख) परिक्रामन् । सखे न भेतव्यं न भेतव्यम् ।

नेपथ्ये

पुनस्तदेव पठित्वा ।

कहं ण भाइस्सं । एस मं को वि पच्चवणअसिरोहरं उच्छुं विअ तिसभङ्गं (१) करइ (ग) ।

राजा । सदृष्टिक्षेपम् । धनुस्तावत् ।

प्रविश्य शार्ङ्गहस्ता

यवनिका । भट्टा एदं हत्थावावसहिअं सरासणं (घ) ।

राजा । सशरं धनुरादत्ते ।

नेपथ्ये

एष त्वामभिनवकण्ठशोणितार्थी
शार्दूलः पशुमिव हन्मि चेष्टमानम् ।

(क) भो वयस्य अविहा अविहा ।

अविहा खेदोक्तौ ।

(ख) गतिभेदेन गतिवैलक्षण्येन त्वरितोद्धतया गत्या इत्यर्थः ।

(ग) कथं न भेष्यामि । एषः मां कः अपि प्रत्यवनतशिरोधरम् इक्षुम् इव त्रिभङ्गं करोति ।

प्रत्यवनतशिरोधरं लम्बितग्रीवम् । त्रिभङ्गम्— त्रिभिर्भागैर्भङ्गो यस्य तं तथोक्तं त्रिखण्डभग्नमित्यर्थः ।

(घ) भर्त्तः एतत् हस्तावापसहितं शरासनम् ।

हस्तावापसहितम्— हस्तम् आवपति आघातादभिरक्षतीति हस्तावापः हस्तावरणं तत्सहितम् ।

---

(१) तिखण्डभङ्गं । १ । ३ । ४ । तिसभङ्गं । २ । ६ । ७ ।

आर्त्तानां भयमपनेतुमात्तधन्वा
दुष्यन्तस्तव शरणं भवत्विदानीम् (क)॥

राजा। सरोषम्। कथं मामेवोद्दिशति (१)। तिष्ठ कुणपाशन त्वमिदानीं न भविष्यसि। शार्ङ्गमारोप्य। वेत्रवति सोपानमार्गमादेशय (ख)।

प्रतीहारी। इदो इदो देओ (ग)।

सर्वे। सत्वरमुपसर्पन्ति।

राजा। समन्ताद्विलोक्य। शून्यं खल्विदम्।

नेपथ्ये

अविहा अविहा। अहं अत्तभवन्तं पेक्खामि (२) तुमं मं ण पेक्खसि। बिड़ालग्गहीओ मूसओ विअ णिरासो म्हि जीविदे संवुत्तो (घ)।

राजा। भोस्तिरस्करणीगर्वित (ङ) मदीयं शस्त्रं त्वां द्रक्ष्यति। एष तमिषुं सन्दधे

(क) चेष्टमानम् इतस्ततश्चलन्तम्। प्रहर्षिणी वृत्तम्।

(ख) कुणपाशन राक्षस कुणपं शवं अश्नाति भक्षयतीति तत्सम्बोधनम्।

(ग) इतः इतः देवः।

(घ) अविहा अविहा। अहम् अत्रभवन्तं प्रेक्षे त्वं मां न प्रेक्षसे। बिड़ालगृहीतः मूषकः इव निराशः अस्मि जीविते संवृत्तः।

(ङ) तिरस्करणीगर्वित— तिरस्करणी अदृश्यत्वसम्पादनी विद्या तया गर्वित तत्प्रभावेण आत्मानमदृश्यं कृत्वा गर्वं करोषीत्यर्थः।

---

(१) कथं मामेवोद्दिशति।१।२।४।
कथं मामुद्दिशति।३।

(२) अविहा अविहा अहं अत्तभवन्तं पेक्खामि।१।२।४।६।७।
अहं अत्तभवन्तं पेक्खामि।३।

यो हनिष्यति वध्यं त्वां रक्ष्यं रक्षति च द्विजम् ।
हंसो हि क्षीरमादत्ते तन्मिश्रा वर्जयत्यपः (क) ॥

शस्त्रञ्च सन्धत्ते ।

ततः प्रविशति विदूषकमुत्सृज्य मातलिः ।

मातलिः ।

कृताः शरव्यं हरिणा तवासुराः
शरासनं तेषु विकृष्यतामिदम् ।
प्रसादसौम्यानि सतां सुहृज्जने
पतन्ति चक्षूंषि न दारुणा शराः (ख) ॥

राजा । शस्त्रमुपसंहरन् (१) । अये मातलिः । स्वागतं महेन्द्रसारथे ।

प्रविश्य

विदूषकः । अहं जेण (२) इट्ठिपसुमारं मारिओ सो इमिणा साअएण अहिणन्दीअइ (ग) ।

(क) पथ्यावक्त्रं वृत्तम् ।

(ख) हरिणा इन्द्रेण असुराः तव शरव्यं लक्ष्यं बाणप्रयोगास्पदमिति यावत् कृताः निरूपिताः तेषु असुरेषु विषये इदं शरासनं विकृष्यताम् आकृष्यताम् । सुहृज्जने मित्रे सतां साधूनां प्रसादसौम्यानि अनुग्रहमधुराणि चक्षूंषि पतन्ति दारुणाः तीक्ष्णाः शराः न अहं तव सुहृत् न प्रहर्त्तुमर्हः अतो मा मयि शरं विसृजेत्यर्थः । वंशस्थविलं वृत्तम् ।

(ग) अहं येन इष्टिपशुमारं मारितः सः अनेन स्वागतेन अभिनन्द्यते । इष्टिपशुमारं मारितः यज्ञपशुरिव हन्तुमुद्दिष्टः ।

(१) अस्त्रमुपसंहरन् । १ । ४ ।
शस्त्रमुपसंहरन् । २ । ३ ।

(२) तेण । १ । ३ ।
जेण । ४ । ६ । ७ ।

मातलिः । सस्मितम् । आयुष्मन् श्रूयतां यदस्मि हरिणा भवत्सकाशं प्रेषितः ।

राजा । अवहितोऽस्मि ।

मातलिः । अस्ति कालनेमिप्रसूतिर्दुर्जयो नाम दानवगणः ।

राजा । अस्ति श्रुतपूर्व्वं मया नारदात् ।

मातलिः ।

सख्युस्ते स किल शतक्रतोरजय्य-
स्तस्य त्वं रणशिरसि स्मृतो निहन्ता ।
उच्छेत्तुं प्रभवति यन्न सप्तसप्तिः
तन्नैशं तिमिरमपाकरोति चन्द्रः (क) ॥

स भवानात्तशस्त्र एव इदानीं तमैन्द्ररथमारुह्य विजयाय प्रतिष्ठताम् ।

राजा । अनुगृहीतोऽहमनया (१) मघवतः सम्भावनया । अथ माठव्यं प्रति भवता किमेवं प्रयुक्तम् ।

मातलिः । तदपि कथ्यते । किञ्चिन्निमित्तादपि मनःसन्तापादायुष्मान् मया विक्लवो दृष्टः । पश्चात् कोपयितुमायुष्मन्तं तथा कृतवानस्मि । कुतः

ज्वलति चलितेन्धनोऽग्निर्विप्रकृतः पन्नगः फणां कुरुते ।
प्रायः स्वं महिमानं क्षोभात् प्रतिपद्यते हि जनः (ख) ॥

(क) सप्तसप्तिः— सप्त सप्तयः अश्वा यस्य स सप्तसप्तिः सूर्य्यः । प्रहर्षिणी वृत्तम् ।

(ख) विप्रकृतः उद्वेजितः । क्षोभात् विकारात् । आर्य्या जातिः ।

---

(१) अनया मह्यत्या । १ । अनया । २ । ४ ।

राजा। जनान्तिकम्। वयस्य अनतिक्रमणीया दिवस्पतेः आज्ञा। तदत्र परिगतार्थं कृत्वा मद्वचनादमात्यपिशुनं ब्रूहि

त्वन्मतिः केवला तावत् परिपालयतु प्रजाः (१)।
अधिज्यमिदमन्यस्मिन् कर्म्मणि व्यापृतं धनुः (क)॥

विदूषकः। जं भवं आणवेदु (ख)।

निष्क्रान्तः।

मातलिः। आयुष्मान् रथमारोहतु।

राजा। रथारोहणं नाटयति।

निष्क्रान्ताः सर्व्वे।

षष्ठोऽङ्कः।

(क) पथ्यावक्त्रं वृत्तम्।

(ख) यत् भवान् आज्ञापयति।

(१) परिपालयितुं प्रजाः।१।२।४।

ततः प्रविशत्याकाशयानेन रथाधिरूढो राजा मातलिश्च ।

राजा । मातले अनुष्ठितनिदेशोऽपि मघवतः सत्क्रियाविशेषात् अनुपयुक्तमिवात्मानं समर्थये (क) ।

मातलिः । सस्मितम् । आयुष्मन् उभयमप्यपरितोषं समर्थये

प्रथमोपकृतं मरुत्वतः
प्रतिपत्त्या लघु मन्यते भवान् ।
गणयत्यवदानविस्मितो
भवतः सोऽपि न सत्क्रियागुणान् (ख) ॥

राजा । मातले मा मैवम् । स खलु मनोरथानामप्यभूमिः विसर्जनावसरसत्कारः (ग) । मम हि दिवौकसां समक्षमर्द्धासनोपवेशितस्य

(क) अनुपयुक्तमिव-तादृशस्य अतिमहतः सत्कारस्य अयोग्यमिव । समर्थये मन्ये ।

(ख) उभयं भवन्तं मघवन्तञ्चेति उभौ अपि न विद्यते परितोषोऽस्य तं तथोक्तं समर्थये सम्भावयामि उभयत्रापि परितोषाभावः सम एवेति भावः । तथाहि भवान् मरुत्वतः इन्द्रस्य प्रतिपत्त्या सत्कारेण प्रथमोपकृतं पूर्व्वकृतम् उपकारं लघु हीनं मन्यते गणयति सः इन्द्रः अपि भवतः अवदानेन भवत्कृतेन दुर्जयदानवजयरूपेण अतिमहता कर्म्मणा विस्मितः जातविस्मयः सन् सत्क्रियागुणान् स्वकृतान् सत्कारविशेषान् न गणयति भवदीयमवदानं यथार्हं सत्कृतमिति न मन्यते इत्यर्थः । वैतालीयं वृत्तम् ।

(ग) अभूमिः अविषयः ।

अन्तर्गतप्रार्थनमन्तिकस्थं
जयन्तमुद्वीक्ष्य कृतस्मितेन ।
आमृष्टवक्षोहरिचन्दनाङ्का
मन्दारमाला हरिणा पिनद्धा (क) ॥

मातलिः । किमिव नाम आयुष्मान् अमरेश्वरान्नार्हति ।
पश्य

सुखपरस्य (१) हरेरुभयैः कृतं
त्रिदिवमुद्धृतदानवकण्टकम् ।
तव शरैरधुनानतपर्व्वभिः
पुरुषकेशरिणश्च पुरा नखैः (ख) ॥

राजा । अत्र खलु शतक्रतोरेव महिमा स्तुत्यः (ग) ।

(क) अन्तर्गता हृदयवर्त्तिनी प्रार्थना मन्दारमालाप्राप्तिविषयिणी वासना यस्य तं पितुः सकाशात् प्रसादरूपेण मन्दारमालां लब्धुं लोलुभहृदयमित्यर्थः अन्तिकस्थम् अदूरवर्त्तिनं जयन्तं स्वतनयम् उद्वीक्ष्य आलोक्य कृतं स्मितं येन तथोक्तेन हरिणा देवराजेन आमृष्टं परिलुप्तं यत् वक्षोहरिचन्दनं वक्षःस्थलस्थितं हरिचन्दनानुलेपनं तत् अङ्कः लाञ्छनं यस्याः सा तथोक्ता मन्दारपुष्पमयी माला दिवौकसां देवानां समक्षं प्रत्यक्षम् अर्द्धासने निजासनस्यार्द्धभागे उपवेशितस्य मम पिनद्धा मम कण्ठे समर्पिता । इन्द्रवज्रोपेन्द्रवज्रयोः सङ्कररूपा उपजातिः वृत्तम् ।

(ख) सुखपरस्य निश्चिन्ततया विषयसम्भोगसुखासक्तस्य । आनतपर्व्वभिः—आनतानि अनुन्नतानि पर्व्वाणि ग्रन्थयः येषां ते तथोक्ताः । पुरुषकेशरिणः—पुरुषः नरश्च सः केशरी सिंहश्च तस्य नरसिंहकलेवरस्य विष्णोः विष्णुर्नरसिंहमूर्त्तिमास्थाय नखैः उरोविदारं सुरवैरिणं हिरण्यकशिपुं नाम दुर्जयं दैत्यं जघानेति पौराणिकी कथा । द्रुतविलम्बितं वृत्तम् ।

(ग) स्तुत्यः स्तोतुमर्हः ।

---

(१) सुखपरस्य । १ । ५ । ६ ।　　सुरसखस्य । २ ।

सिध्यन्ति कर्म्मसु महत्स्वपि यन्नियोज्याः
सम्भावनागुणमवेहि तमीश्वराणाम् ।
किं वाभविष्यदरुणस्तमसां विभेत्ता
तञ्चेत्सहस्रकिरणो धुरि नाकरिष्यत् (क) ॥

मातलिः । सदृशमेवैतत् । (स्तोकमन्तरमतीत्य ।) आयुष्मन् इतः पश्य नाकपृष्ठप्रतिष्ठितस्य (१) सौभाग्यमात्मयशसः (ख) ।

विच्छित्तिशेषैः सुरसुन्दरीणां
वर्णैरमी कल्पलतांशुकेषु ।
विचिन्त्य (२) गीतक्षममर्थजातं
दिवौकसस्त्वच्चरितं लिखन्ति (ग) ॥

(क) नियोज्याः सेवकाः । सम्भावनागुणम्— सम्भावना अयमेतत्कार्य्यनिर्व्वाहक्षम इत्येवंरूपा समर्थना तस्याः गुणं महिमानम् । ईश्वराणां प्रभूणाम् । वसन्ततिलका वृत्तम् ।

(ख) नाकपृष्ठे सुरलोकतले प्रतिष्ठितस्य लब्धस्थितिकस्य आत्मयशसः सौभाग्यं सुभगत्वं नयनप्रीतिप्रदत्वमिति यावत् पश्य ।

(ग) अमी दिवौकसः देवाः गीतक्षमं गानयोग्यम् अर्थजातं विचिन्त्य स्थिरीकृत्य त्वच्चरितात् गानयोग्यान् विषयान् सङ्कलय्येत्यर्थः सुरसुन्दरीणाम् अमरयोषितां विच्छित्तिशेषैः अङ्गरागावशेषैः वर्णैः शुक्लपीतलोहितादिभिः कल्पलतांशुकेषु वसनोपमेषु कल्पलतापल्लवेषु त्वच्चरितं त्वदीयमवदानं लिखन्ति वर्णयन्ति । दिवौकसां स्त्रयोषितामङ्गरागसम्पादनं प्रथमं कर्म्म कल्पलतापल्लवेषु त्वच्चरितलिखनं द्वितीयं कर्म्मेत्यर्थः । इन्द्रवज्रोपेन्द्रवज्रयोः सङ्कररूपा उपजातिः वृत्तम् ।

---

(१) नाकपृष्ठप्रतिष्ठितस्य ।१।३।४।६। नाकपृष्ठगतस्य ।२।

(२) विचिन्त्य ।१।४।६। सञ्चिन्त्य ।२। सञ्चिन्त्य ।३।

राजा । मातले असुरसम्प्रहारोत्सुकेन पूर्व्वेद्युर्दिवमधिरोहता न लक्षितः स्वर्गमार्गः । कतमस्मिन् (१) मरुतां पथि वर्त्तामहे (क) ।

मातलिः ।

त्रिस्रोतसं वहति यो गगनप्रतिष्ठां
ज्योतींषि वर्त्तयति च प्रविभक्तरश्मिः ।
तस्य द्वितीयहरिविक्रमनिस्तमस्कं
वायोरिमं परिवहस्य वदन्ति मार्गम् (ख) ॥

(क) कतमस्मिन् मरुतां पथि— आवहः प्रवहः उद्वहः संवहः सुवहः परिवहः परावहः इति सप्त वायवः यथा

भूवायुरावह इह प्रवहस्तदूर्द्ध्वः
स्यादुद्वहस्तदनु संवहसंज्ञकश्च ।
अन्यस्ततोऽपि सुवहः परिपूर्व्वकोऽस्मात्
वाह्यः परावह इमे पवनाः प्रसिद्धाः ॥ १ ॥

सिद्धान्तशिरोमणिः । गोलाध्याये मध्यगतिवासनाध्यायः ।

एकैकस्य वायोरधिकारः पन्थाः कथ्यते अतः सप्त मरुतां पन्थानः । अधुना वयं मरुतां वायूनां कतमस्मिन् पथि आवहादीनां सप्तानां मरुतां कस्य अधिकारे इत्यर्थः वर्त्तामहे ।

(ख) गगने नभोमण्डले प्रतिष्ठा स्थितिर्यस्याः तां तथोक्ताम् आकाशवर्त्तिनीम् इत्यर्थः त्रीणि त्रिधाप्रवृत्तानि स्रोतांसि प्रवाहाः यस्याः तां त्रिस्रोतसं विष्णोरङ्गुष्ठमूलाच्छिःसृत्य मन्दाकिनी अलकनन्दा भोगवती इत्येतदाख्याभिः तिसृभिर्धाराभिः यथाक्रमं दिवि भुवि रसातले च प्रवहतीति त्रिस्रोता इति गङ्गाया नामान्तरं यः गगनप्रतिष्ठां त्रिस्रोतसं मन्दाकिनीं वहति यस्याधिकारे मन्दाकिनी प्रवहतीत्यर्थः प्रविभक्ताः सम्यक् विभज्य विनियुक्ताः रश्मयः नक्षत्रमरीचयः येन स तथोक्तः सन् ज्योतींषि नक्षत्राणि वर्त्तयति भ्रमयति

(१) कतरस्मिन् । १ । २ । ३ । ४ ।

राजा । मातले अतः खलु सबाह्यान्तःकरणो ममान्तरात्मा प्रसीदति (क) । रथाङ्गमवलोक्य । मेघपदवीमवतीर्णौ स्वः (ख) ।

मातलिः । कथमवगम्यते ।

राजा ।

अयमरविवरेभ्यश्चातकैर्निष्पतद्भिः
हरिभिरचिरभासां तेजसा चानुलिप्तैः ।
गतमुपरि घनानां वारिगर्भोदराणां
पिशुनयति रथस्ते शीकरक्लिन्ननेमिः (ग) ।

नक्षत्राणि येन प्रणोदितानि परिभ्रमन्तीत्यर्थः इमं नभोभागं यस्मिन्नधुना वयं वर्त्तामहे इत्यर्थः तस्य उक्तक्रियस्य परिवहस्य षष्ठस्य वायोः द्वितीयेन हरेः बलिच्छलनाय अवलम्बितवामनावतारस्य विष्णोः विक्रमेण पादन्यासेन निरस्तमस्कम् विगतकल्मषं मार्गं पन्थानं वदन्ति अधुना वयं परिवहस्य वायोरधिकारे वर्त्तामहे इत्यर्थः । वसन्ततिलका वृत्तम् ।

(क) अतः हरिपादन्यासप्रहतकलुषे परिवहाधिकारे वर्त्ते इति हेतोः बाह्यानि बहिरिन्द्रियाणि अन्तःकरणं मनः तैः सह सबाह्यान्तःकरणः मे मम अन्तरात्मा शरीरान्तर्वर्त्ती चेतनः पुरुषः प्रसीदति प्रसादमापद्यते ।

(ख) मेघपदवीं मेघसञ्चारस्थानं भूवायोः आवहस्य अधिकारमित्यर्थः । भूमेरूर्द्धं द्वादश योजनानि भूवायोरावहस्याधिकारः स एव च जलदविद्युदादीनां सञ्चारस्थानं यथा

भूमेर्बहिर्द्वादश योजनानि भूवायुरत्राम्बुदविद्युदाद्यम् ॥ २ ॥

सिद्धान्तशिरोमणिः । गोलाध्याये मध्यगतिवासनाध्यायः ।

(ग) शीकरैः मेघनिःसृतैः अम्बुकणैः क्लिन्नाः आर्द्राः नेमयः चक्रप्रान्तदेशाः यस्य तथोक्तः अयं ते तव रथः त्वया प्रस्थापितः इन्द्ररथ इत्यर्थः अराणां नाभिनेमिमध्यवर्त्तिनां चक्रावयवानां विवरेभ्यः अवकाशेभ्यः निष्पतद्भिः निःसरद्भिः चातकैः अचिरभासां विद्युतां तेजसा भासा अनुलिप्तैः दिग्धकलेवरैः हरिभिः अश्वैश्च वारिगर्भं सलिलपूर्णम् उदरम् अभ्यन्तरं येषां तादृशानां

मातलिः । यथादायुष्मान् स्वाधिकारभूमौ वर्त्तिष्यते ।

राजा । अधोऽवलोक्य । मातले (१) वेगावतरणादाश्चर्य्यदर्शनः संलक्ष्यते मनुष्यलोकः । तथाहि

शैलानामवरोहतीव शिखरादुन्मज्जतां मेदिनी
पर्णस्वान्तरलीनतां विजहति स्कन्धोदयात् पादपाः ।
सन्तानैस्तनुभावनष्टसलिला व्यक्तिं भजन्त्यापगाः
केनाप्युत्क्षिपतेव पश्य भुवनं मत्पार्श्वमानीयते (क) ॥

मातलिः । साधु दृष्टम् । सबहुमानं विलोक्य । अहो उदार-रमणीया पृथिवी ।

घनानां मेघानाम् उपरि गतं गमनं पिशुनयति सूचयति । मालिनी वृत्तम् ।

(क) मेदिनी पृथिवी उन्मज्जताम् ऊर्द्ध्वमुत्सर्पतां शैलानां पर्व्वतानां शिखरात् शिरोभागात् अवरोहति अधःपतति इव पूर्व्वं पृथिवी पर्व्वतशिखरैः समदेशवर्त्तितया प्रतीयते स्म अधुना तु पर्व्वता ऊर्द्ध्वमुत्पतन्त इव पृथिवी च शैलशिखरादधः पतन्तीव लक्ष्यन्ते इत्यर्थः पादपाः वृक्षाः स्कन्धानां प्रकाण्डभागानाम् उदयात् आविर्भावात् पर्णानां पत्राणां स्वान्तरे अभ्यन्तरे लीनतां निमग्नत्वं पर्णराशिस्वरूपतामित्यर्थः विजहति त्यजन्ति पूर्व्वं कन्धा-नामदर्शनात् वृक्षाः पर्णराशिस्वरूपा इव प्रतीयन्ते स्म अधुना तु स्कन्धानाम् आविर्भावात् स्वलक्षणाक्रान्ता लक्ष्यन्ते इत्यर्थः तनुभावेन क्षीणतया नष्टं दृष्टेरविषयीभूतं सलिलं जलं यासां ताः तथोक्ताः आपगाः नद्यः सन्तानैः विस्तारैः व्यक्तिं प्रकटीभावं भजन्ति लभन्ते पूर्व्वं नद्यो दूरत्वात् सूक्ष्मभावा-पत्तेः अदृश्या आसन् अधुना तु सामीप्यात् स्वाभाविकीं विस्तृतिमापन्नाः स्पष्टं प्रतीयन्ते इत्यर्थः पश्य अवलोकय उत्क्षिपता ऊर्द्ध्वाभिमुखं क्षिपता केनापि भुवनं मत्पार्श्वं मत्सन्निधिम् आनीयते इव । शार्दूलविक्रीड़ितं वृत्तम् ।

---

(१) अधोऽवलोक्य मातले । १ । २ ।   अधोऽवलोक्य । २ । ४ ।

राजा। मातले कतमोऽयं पूर्व्वापरसमुद्रावगाढ़ः कनकरस-निस्यन्दी सान्ध्य इव मेघपरिघः सानुमानालोक्यते (क)।

मातलिः। आयुष्मन् एष खलु हेमकूटो नाम किम्पुरुष-पर्व्वतस्तपसां सिद्धिक्षेत्रम् (१) (ख)। पश्य

स्वायम्भुवान्मरीचेर्यः प्रबभूव प्रजापतिः।
सुरासुरगुरुः सोऽत्र सपत्नीकस्तपस्यति (ग)॥

राजा। तेन हि अनतिक्रमणीयानि (२) श्रेयांसि। प्रदक्षिणीकृत्य भगवन्तं गन्तुमिच्छामि।

मातलिः। प्रथमः कल्पः।

नाट्येनावतीर्णौ।

राजा। सविस्मयम्।

उपोढ़शब्दा न रथाङ्गनेमयः प्रवर्त्तमानं न च दृश्यते रजः।

(क) पूर्व्वापरसमुद्रावगाढः— पूर्व्वापरौ पूर्व्वपश्चिमौ समुद्रौ अवगाढ़ः प्रविष्टः पूर्व्वसमुद्रादारभ्य पश्चिमसमुद्रं यावदवस्थित इत्यर्थः। कनकरस-निस्यन्दी सुवर्णद्रवस्रावी। मेघपरिघः मेघपंक्तिः।

(ख) किम्पुरुषपर्व्वतः किम्पुरुषाख्यस्य वर्षस्य मर्य्यादागिरिः हेमकूटो हि किम्पुरुषवर्षं हरिवर्षाद्विभजतीति पौराणिकमतम्।

(ग) यः प्रजापतिः प्रजास्रष्टा स्वयम्भुवो ब्रह्मणः अपत्यं पुमान् स्वायम्भुवः तस्मात् ब्रह्मतनयात् मरीचेः प्रबभूव उदपद्यत सुराणाम् असुराणाञ्च गुरुः पिता सः प्रजापतिः कश्यपः अत्र अस्मिन् हेमकूटनाम्नि किम्पुरुषपर्व्वते पत्न्या अदित्या सह सपत्नीकः तपस्यति तपश्चरति। पथ्यावक्त्रं वृत्तम्।

(१) तपःसंसिद्धिक्षेत्रम्। १। ६। तपसां सिद्धिक्षेत्रम्। २। ४।

(२) तेन हि अनतिक्रमणीयानि। १। २। ४। अनतिक्रमणीयानि। ३।

अभूतलस्पर्शतया निरुद्धतस्तवावतीर्णोऽपि रथो न लद्यते(क) ॥

मातलिः । एतावानेव शतक्रतोरायुष्मतश्च विशेषः (ख) ।

राजा । मातले कतमस्मिन् प्रदेशे मारीचाश्रमः ।

मातलिः । हस्तेन दर्शयन् ।

वल्मीकार्द्ध (१) निमग्नमूर्त्तिरुरसा सन्दष्टसर्पत्वचा
कण्ठे जीर्णलताप्रतानवलयेनात्यर्थसम्पीड़ितः ।
अंसव्यापि शकुन्तनीड़निचितं विभ्रज्जटामण्डलं
यत्र स्थाणुरिवाचलो मुनिरसावभ्यर्कबिम्बं स्थितः (ग) ॥

(क) रथाङ्गनेमयः चक्रप्रान्ताः उपोढः धृतः शब्दः याभिस्ताः तथोक्ताः न भवन्ति रजः धूलिश्च प्रवर्त्तमानम् उत्तिष्ठत् न दृश्यते निरुन्धतः अश्वान् निग्टह्णतः तव रथः अवतीर्णः अपि अविद्यमानः भूतलस्पर्शः यस्य तस्य भावः अभूतलस्पर्शता तया हेतुना भूतलस्पर्शाभावात् इत्यर्थः न लद्यते अवतीर्णः इति न प्रतीयते । वंशस्थविलं वृत्तम् ।

(ख) शतक्रतोः इन्द्रस्य आयुष्मतः भवतश्च एतावानेव विशेषः शतक्रतो रथः भूतलं न स्पृशति नेमयो न शब्दायन्ते रजोऽपि नोत्तिष्ठति भवतो रथस्तु भूतलं स्पृशति नेमयः शब्दायन्ते नेमिघर्षणेन रजश्च प्रवर्त्तते उभयोरेतदेव अन्तरम् ।

(ग) वल्मीके पुत्तिकाख्यपिपीलिकाविशेषैः सञ्चिते मृत्पुञ्जे अर्द्धनिमग्ना मूर्त्तिः शरीरं यस्य स तथोक्तः सन्दष्टाः संश्लिष्टाः सर्पत्वचो यस्मिन् तादृशेन उरसा वक्षःस्थलेन उपलक्षितः जीर्णेन लताप्रतानवलयेन लतातन्तुमालया कण्ठे गलदेशे अत्यर्थम् अतिशयेन सम्पीड़ितः क्लिशितः अंसव्यापि स्कन्धदेशाच्छादकं शकुन्तानां पक्षिणां नीड़ैः कुलायैः निचितं व्याप्तं जटामण्डलं बिभ्रत् दधत् स्थाणुः निःशेषवियोजितशाखः वृक्षस्कन्ध इव अचलः स्थिरीभूतः असौ मुनिः अभ्यर्कबिम्बं सूर्य्यमण्डलमभिलक्ष्यीकृत्य यत्र यस्मिन् प्रदेशे स्थितः तिष्ठति तस्मिन् प्रदेशे मारीचाश्रम इति शेषः । शार्दूलविक्रीड़ितं वृत्तम् ।

---

(१) वल्मीकाग्र । १ । २ । ३ । ४ । ६ ।

राजा। नमस्ते कष्टतपसे (क)।

मातलिः। संयतप्रग्रहं रथं कृत्वा। महाराज एतौ अदितिपरिवर्द्धितमन्दारवृक्षं प्रजापतेराश्रमं प्रविष्टौ स्वः।

राजा। स्वर्गादधिकतरं निर्वृतिस्थानम्। अमृतह्रदमिवावगाढोऽस्मि।

मातलिः। रथं स्थापयित्वा। अवतरत्वायुष्मान्।

राजा। अवतीर्य्य। मातले भवान् कथमिदानीम् (ख)।

मातलिः। संयन्त्रितो मया रथः। वयमप्यवतरामः। तथा कृत्वा। इत आयुष्मन्। परिक्रम्य। दृश्यन्तामत्रभवतामृषीणां तपोवनभूमयः।

राजा। ननु विस्मयादवलोकयामि।

प्राणानामनिलेन वृत्तिरुचिता सत्कल्पवृक्षे वने
तोये काञ्चनपद्मरेणुकपिशे धर्म्माभिषेकक्रिया।
ध्यानं रत्नशिलातलेषु विबुधस्त्रीसन्निधौ संयमो
यत्काङ्क्षन्ति तपोभिरन्यमुनयस्तस्मिंस्तपस्यन्त्यमी (ग)॥

(क) कष्टतपसे— कष्टं कठोरं निरतिशयक्लेशकरमिति यावत् तपः यस्य तस्मै।

(ख) भवान् कथमिदानीम्— इदानीम् अधुना भवान् कथं वर्त्तिष्यते इति शेषः अधुना भवान् इहैव वा स्थास्यति कश्यपं द्रष्टुं वा यास्यति इत्यर्थः।

(ग) सन् विद्यमानः कल्पवृक्षः यस्मिन् तादृशे वने उचिता अवश्यकर्त्तव्या प्राणानां वृत्तिः प्राणधारणक्रिया अनिलेन वायुना निर्वर्त्यते इति शेषः कल्पवृक्षो हि प्रार्थितो यथाभिलषितभोग्यवस्तूनि वितरति तस्मिन् सन्निहितेऽपि अनिलमात्रसेवया प्राणधारणमिति परमाद्भुतं भोगवैमुख्यममीषां मुनीनामिति भावः काञ्चनपद्मरेणुभिः सौवर्णकमलपरागैः कपिशे पिङ्गलवर्णे तोये सलिले धर्म्मार्थी अभिषेकक्रिया नित्यस्नानविधिः रत्नशिलातलेषु मणिशिलापृष्ठेषु

मातलिः । उत्सर्पिणी खलु महतां प्रार्थना । परिक्रम्य । आकाशे । अये वृद्धशाकल्य किमनुतिष्ठति भगवान् मारीचः । किं ब्रवीषि दाक्षायण्या पतिव्रताधर्म्ममधिकृत्य पृष्टः तस्यै महर्षि-पत्नीसहितायै कथयतीति (क) ।

राजा । कर्णं दत्त्वा । अये प्रतिपाल्यावसरः प्रस्तावः(१)(ख) ।

मातलिः । राजानमवलोक्य । अस्मिन्नशोकवृक्षमूले तावत् आस्तामायुष्मान् यावत् त्वामिन्द्रगुरवे निवेदयितुमन्तरान्वेषी भवामि (ग) ।

राजा । यथा भवान् मन्यते ।

स्थितः ।

मातलिः । आयुष्मन् साधयाम्यहम् ।

निष्क्रान्तः ।

राजा । निमित्तं सूचयित्वा ।

ध्यानं समाधिः विबुधस्त्रीणाम् अप्सरसां सन्निधौ संयमः इन्द्रियनिग्रहः अन्यमुनयः तपोभिः यत् काङ्क्षन्ति यत् स्थानमधिगन्तुं प्रयसन्ति तस्मिन् स्थाने अमी मुनयः तपस्यन्ति सर्व्वमिदमस्माकं नितरां विस्मयकरमिति भावः । शार्दूलविक्रीड़ितं वृत्तम् ।

(क) उत्सर्पिणी ऊर्द्धगामिनी अत्युन्नता इत्यर्थः । दाक्षायण्या दक्ष-तनयया अदित्या । कथयति पतिव्रताधर्म्ममिति शेषः ।

(ख) प्रस्तावः महर्षेः पतिव्रताधर्म्मकीर्त्तनलक्षणः प्रतिपाल्यः अपेक्षणीयः अवसरः यस्य स तथोक्तः यावन्महर्षेः पतिव्रताधर्म्मकथनं न परिसमाप्यते तावन्मया तद्दर्शनं न लभनीयमित्यर्थः ।

(ग) इन्द्रगुरवे इन्द्रस्य देवराजस्य गुरवे पित्रे कश्यपाय । अन्तरान्वेषी—अन्तरम् अवसरम् अन्विष्यतीति तथोक्तः ।

---

(१) प्रतिपाल्यावसरः प्रस्तावः ।१।२।४। प्रतिपाल्यावसरः खलु प्रस्तावः ।३।६।

मनोरथाय नाशंसे किं बाहो स्पन्दसे वृथा।
पूर्व्वावधीरितं श्रेयो दुःखं हि परिवर्त्तते (क)॥

नेपथ्ये

मा क्खु चावलं करसु। कहं गओ एव्व अत्तणो पइइं (ख)।

राजा। कर्णं दत्त्वा। अभूमिरियमविनयस्य। को नु खल्वेष निषिध्यते। शब्दानुसारेणावलोक्य। सविस्मयम्। अये को नु खल्वयम् अनुबध्यमानस्तपस्विनीभ्याम् अबालसत्त्वो बालः

अर्द्धपीतस्तनं मातुरामर्द्दक्लिष्टकेशरम्।
प्रक्रीड़ितुं सिंहशिशुं बलात्कारेण कर्षति (ग)॥

ततः प्रविशति यथानिर्द्दिष्टकर्म्मा तपस्विनीभ्यां बालः।

बालः। जिम्भ सिंह दन्ताइं दे गणिस्सं (घ)।

प्रथमा। अविणीद, किं णो अवच्चणिव्विसेसाणि सत्ताणि विप्पअरसि। हन्त वड्ढइ दे संरम्भो। ठाणे क्खु इसिजणेण सव्वदमणो त्ति किदणामहेओ सि (ङ)।

(क) हि यतः पूर्व्वं प्रथमम् अवधीरितम् उपेक्षितं श्रेयः सुखं दुःखं परिवर्त्तते दुःखरूपेण परिणमति। पथ्यावक्त्रं वृत्तम्।

(ख) मा खलु चापलं कुरु। कथं गतः एव आत्मनः प्रकृतिम्।

(ग) अनुबध्यमानः अनुगम्यमानः। अबालसत्त्वः— बालस्य शिशोरिव सत्त्वं बलं यस्य स न भवतीति अबालसत्त्वः। आमर्द्दक्लिष्टकेशरम्— आमर्द्देन विमर्द्देन क्लिष्टाः विकीर्णाः केशराः स्कन्धबालाः यस्य तं तथोक्तम्।

(घ) जृम्भस्व सिंह दन्तान् ते गणयिष्यामि।

(ङ) अविनीत किं नः अपत्यनिर्विशेषाणि सत्त्वानि विप्रकरोषि। हन्त वर्द्धते ते संरम्भः। स्थाने खलु ऋषिजनेन सर्व्वदमनः इति कृतनामधेयः असि। विप्रकरोषि उद्वेजयसि।

राजा। किं नु खलु बालेऽस्मिन् औरस इव पुत्रे स्निह्यति मे मनः। नूनम् अनपत्यता मां वत्सलयति (क)।

द्वितीया। एसा क्खु केसरिणी तुमं लङ्घेइ जइ से पुत्तअं ण मुञ्चसि (ख)।

बालः। सस्मितम्। अम्हहे वलिअं क्खु भीदो म्हि (ग)। अधरं दर्शयति।

राजा।

महतस्तेजसो बीजं बालोऽयं प्रतिभाति मे।

स्फुलिङ्गावस्थया वह्निरेधापेक्ष इव स्थितः (घ)॥

प्रथमा। वच्छ एदं बालमइन्दअं मुञ्चसु अवरं दे कीलणअं दाइस्सं (ङ)।

बालः। कहिं देसु णं (च)।

हस्तं प्रसारयति।

(क) वत्सलयति स्नेहप्रवणं करोति।

(ख) एषा खलु केशरिणी त्वां लङ्घयति यदि एतस्याः पुत्रकं न मुञ्चसि। लङ्घयति द्रुह्यति।

(ग) अस्महे बलीयः खलु भीतः अस्मि।

बलीयः अत्यधिकम्। सोल्लासोक्तिरियम्।

(घ) एधं काष्ठम् अपेक्षते इति एधापेक्षः प्रज्वलनार्थं काष्ठप्राप्तिं प्रतीक्षमाण इत्यर्थः स्फुलिङ्गावस्थया स्फुलिङ्गभावेन स्थितः वह्निः इव अयं बालः शिशुः महतः तेजसः प्रभावस्य बीजम् उत्पत्तिनिदानं मे मम प्रतिभाति अस्मिन् हि शिशौ गूढं महत्तेजो विद्यते तच्च विजृम्भणार्थं कालमपेक्षते इत्यर्थः। पथ्यावक्त्रं वृत्तम्।

(ङ) वत्स एतं बालमृगेन्द्रं मुञ्च अपरं ते क्रीडनकं दास्यामि।

(च) कुत्र देहि एतत्।

राजा । कथं चक्रवर्त्तिलक्षणमप्यनेन धार्य्यते । तथाह्यस्य

प्रलोभ्यवस्तुप्रणयप्रसारितो
विभाति जालग्रथिताङ्गुलिः करः ।
अलक्ष्यपत्रान्तरमिद्धरागया
नवोषसा भिन्नमिवैकपङ्कजम् (क) ॥

द्वितीया । सुव्वते ण सक्को एसो वाआमेत्तेण विरमाविदुं । गच्छदु तुमं ममकेरए उडए मक्कण्डेअस्स इसिकुमारअस्स वण्णचित्तिओ मित्तिआमोरओ चिट्ठदि तं से उवहरसु (ख) ।

प्रथमा । तह (ग) ।

निष्क्रान्ता ।

(क) तथाहि प्रलोभ्यस्य लोभप्रवर्त्तकस्य वस्तुनः प्रणयेन प्रार्थनया प्रसारितः विस्तारितः जालवत् ग्रथिताः अन्योन्यं संश्लिष्टाः अङ्गुलयः यस्मिन् सः तथोक्तः अस्य शिशोः करः पाणिः इद्धः दीप्तः रागः लौहित्यं यस्याः तथोक्तया नवोषसा अभिनवप्रत्यूषेण भिन्नं विकासितम् अलक्ष्याणि अविभाव्यानि पत्रान्तराणि पत्राणां मध्यवर्त्तिनः अवकाशाः यस्य तादृशम् एकं पङ्कजम् इव विभाति प्रतिभाति । चक्रवर्त्तिलक्षणमुक्तं राघवभट्टधृते सामुद्रिके

अतिरक्तः करो यस्य ग्रथिताङ्गुलिको मृदुः ।
चापाङ्कुशाङ्कितः सोऽथ चक्रवर्त्ती भवेद् ध्रुवम् ॥

वंशस्थविलं वृत्तम् ।

(ख) सुव्रते न शक्यः एषः वाचामात्रेण विरमयितुम् । गच्छ त्वं मदीये उटजे मार्कण्डेयस्य ऋषिकुमारकस्य वर्णचित्रितः मृत्तिकामयूरः तिष्ठति तम् अस्य उपहर ।

विरमयितुम् अविनयात् निवर्त्तयितुम् । वर्णचित्रितः शुक्लपीतादिभिः विविधैर्वर्णैः रञ्जितः ।

(ग) तथा ।

बालः । इमिणा एव्व दाव कीलिस्सं (क) ।

तापसीं विलोक्य हसति ।

राजा । स्पृहयामि खलु दुर्ललितायास्मै (ख) ।

आलक्ष्यदन्तमुकुलाननिमित्तहासै-
रव्यक्तवर्णरमणीयवचःप्रवृत्तीन् ।
अङ्काश्रयप्रणयिनस्तनयान् वहन्तो
धन्यास्तदङ्गरजसा मलिनीभवन्ति (ग) ॥

तापसी । होउ । ण मं अअं गणेदि (१) । पार्श्वमवलोकयति । को एत्थ इसिकुमाराणं । राजानमवलोक्य । भद्दमुह एसु दाव मोचेसु इमिणा दुम्मोअहत्थग्गहेण डिम्भलीलाए बाहीअमाणं बालमइन्दअं (घ) ।

(क) अनेन एव तावत् क्रीड़िष्यामि ।

अनेन सिंहशिशुना ।

(ख) दुर्ल्ललिताय दुर्विनीताय उद्धतचारिणे इति यावत् ।

(ग) धन्याः भाग्यवन्तः अनिमित्तहासैः विना हेतुम् उदितैः हसितैः हेतुभूतैः आलक्ष्याः ईषद्दृश्याः दन्ताः मुकुलाः इव दन्तमुकुलाः येषां तान् तथोक्तान् अव्यक्ताः अपरिस्फुटाः वर्णाः अक्षराणि यस्यां सा तथोक्ता अतएव रमणीया मनोहारिणी वचःप्रवृत्तिः वाग्व्यापारो येषां तान् तथोक्तान् अङ्काश्रयप्रणयिनः अङ्कारोहणोत्सुकान् तनयान् पुत्त्रान् वहन्तः दधतः क्रोड़े रक्षन्त इत्यर्थः तेषां तनयानाम् अङ्गरजसा गात्रधूलिसंश्लेषेण मलिनी-भवन्ति धूसरकलेवराः सम्पद्यन्ते । वसन्ततिलका वृत्तम् ।

(घ) भवतु । न माम् अयं गणयति । कः अत्र ऋषिकुमाराणाम् । भद्रमुख एहि तावत् मोचय अनेन दुर्मोचहस्तग्रहेण डिम्भलीलया बाध्यमानं बालमृगे-न्द्रम् ।

भद्रमुख— भद्रं सौम्यं मुखमस्य स तथोक्तः तत्सम्बोधनम् । दुर्मोचहस्त-

---

(१) ण मं अअं गणेदि । १ । २ । ४ ।   ण उण मं अअं गणेदि । ३ ।

राजा । उपगम्य । सस्मितम् । अयि भो महर्षिपुत्त्र

एवमाश्रमविरुद्धवृत्तिना

संयमः किमिति जन्मतस्त्वया ।

सत्त्वसंश्रयसुखोऽपि दूष्यते

कृष्णसर्पशिशुनेव चन्दनम् (क) ॥

तापसी । भद्दमुह णक्खु अअं इसिकुमारओ (ख) ।

राजा । आकारसदृशं चेष्टितमेवास्य कथयति । स्थान-प्रत्ययात्तु वयमेवंतर्किणः । यथाभ्यर्थितमनुतिष्ठन् बालस्पर्शमुपलभ्य । आत्मगतम् ।

अनेन कस्यापि कुलाङ्कुरेण

स्पृष्टस्य गात्रेषु सुखं ममैवम् ।

कां निर्वृतिं चेतसि तस्य कुर्य्यात्

यस्यायमङ्गात् कृतिनः प्ररूढः (ग) ॥

तापसी । उभौ निर्व्वर्ण्य । अच्छरिअं अच्छरिअं (घ) ।

पहेण— दुर्मोचः मोचयितुमशक्यः ग्रहः यस्य सः तथोक्तः । डिम्भ-लीलया शिशुक्रीड़या । बाध्यमानं पीड्यमानम् ।

(क) अयि भो महर्षिपुत्त्र आश्रमविरुद्धा तपोवनविसंवादिनी वृत्तिः व्यापारः यस्य तथोक्तेन त्वया सत्त्वानां जन्तूनां संश्रयेण अभिरक्षणेन सुखं प्रीतिः यस्मात् तादृशः अपि संयमः तपोवनवासिनां सहजः सर्व्वहिंसा-निवृत्तिरूपः आचारः कृष्णसर्पशिशुना चन्दनमिव किमिति किमर्थं जन्मतः जन्मन आरभ्य आ शैशवादित्यर्थः एवम् उक्तप्रकारेण दूष्यते सदोषः क्रियते । रथोद्धता वृत्तम् ।

(ख) भद्रमुख, नहि अयम् ऋषिकुमारकः ।

(ग) इन्द्रवज्रोपेन्द्रवज्रयोः सङ्कररूपा उपजातिः वृत्तम् ।

(घ) आश्चर्य्यम् आश्चर्य्यम् ।

राजा। आर्य्ये किमिव।

तापसी। इमस्स वालअस्स रूवसंवादिणी दे(१) आइइ त्ति विम्हाविअ म्हि। अवरिइअस्स वि दे अप्पडूलोमो संवुत्तो (क)।

राजा। वालकमुपलालयन्। न चेत् मुनिकुमारोऽयम् अथ कोऽस्य व्यपदेशः (ख)।

तापसी। पुरुवंसो (ग)।

राजा। आत्मगतम्। कथमेकान्वयो मम। अतः खलु मदनुकारिणमेनमत्रभवती मन्यते। अस्त्येतत् पौरवाणामन्त्यं कुलव्रतम् (घ)।

भवनेषु रसाधिकेषु पूर्व्वं
क्षितिरक्षार्थमुशन्ति ये निवासम्।

(क) अस्य बालकस्य रूपसंवादिनी ते आकृतिः इति विस्मापिता अस्मि। अपरिचितस्य अपि ते अप्रतिलोमः संवृत्तः।

रूपसंवादिनी— रूपम् आकृतिं संवदति अनुकरोतीति रूपसंवादिनी आकृतिसदृशीत्यर्थः। अप्रतिलोमः संवृत्तः— अप्रतिलोमः अप्रतिकूलः प्रशान्तमूर्त्तिरिति यावत् संवृत्तः अयं बालक इति शेषः।

(ख) कोऽस्य व्यपदेशः— व्यपदेशः कुलं कस्मिन् कुले समुत्पन्नोऽयमित्यर्थः।

(ग) पुरुवंशः।

(घ) एकान्वयः एकवंशप्रभवः। कुलव्रतं कुलधर्म्मः।

---

(१) इमस्स वालअस्स दे वि रूवसंवादिणी। १।
इमस्स वालअस्स रूवसम्भसंवादिणी। २। ३।
इमस्स वालअरूवस्स संवादिणी। ४।
इमस्स वालअस्स दे ण्ण रूवसम्भसंवादिणी। ६।
इमस्स वालअस्स रूपसंवादिणी। ७।

नियतैकयतिव्रतानि पश्चात्
तरुमूलानि गृहीभवन्ति तेषाम् (क) ॥

प्रकाशम् । न पुनरात्मगत्या मानुषाणामेष विषयः (ख) ।

तापसी । जह भद्दमुहो भणादि । अच्छरासम्बन्धेण दूमस्स जणणी एत्थ देवगुरुणो तवोवणे पसूदा (ग) ।

राजा । अपवार्य्य । हन्त द्वितीयमिदमाशाजननम् । प्रकाशम् । सा तत्रभवती किमाख्यस्य राजर्षेः पत्नी ।

तापसी । को तस्स धम्मदारपरिच्चाइणो णाम संकित्तेदुं चिन्तेदिइ (घ) ।

राजा । स्वगतम् । इयं खलु कथा मामेव लक्ष्यीकरोति । यदि तावदस्य शिशोर्नामतो मातरं पृच्छामि । अथवा अनार्य्यः परदारव्यवहारः (१) (ङ) ।

(क) रसाधिकेषु इन्द्रियसुखभूयिष्ठेषु । उशन्ति काङ्क्षन्ति । नियतैकयतिव्रतानि— नियतं व्यवस्थितम् एकं केवलं यतिव्रतम् इन्द्रियनिग्रहादिरूपो धर्म्मो येषु तानि । औपच्छन्दसिकं वृत्तम् ।

(ख) एषः भूभागः आत्मगत्या पुनः स्वेच्छया तु न मानुषाणां विषयः गोचरः देवानां देवानुचराणां वा अनुग्रहं विना न मानुषैरिहागन्तुं शक्यते अतः कथमस्य पुरुवंशीयस्य बालकस्य इहागमनं सम्भाव्यते इत्येतृ न अवगच्छामीत्यर्थः ।

(ग) यथा भद्रमुखः भणति । अप्सरःसम्बन्धेन अस्य जननी अस्मिन् देवगुरोः तपोवने प्रसूता ।

(घ) कः तस्य धर्म्मदारपरित्यागिनः नाम सङ्कीर्त्तयितुं चिन्तयिष्यति ।

(ङ) अनार्य्यः परदारव्यवहारः— परदाराणां अन्यदीयमहिलानां

---

(१) तद्धनार्य्यः परदारव्यवहारः । १ । २ । ३ । ४ ।

प्रविश्य मृत्तिकामयूरहस्ता

तापसी । सव्वदमण सउन्तलावसं पेक्खसु (क) ।

बालः । सदृष्टिक्षेपम् । कहिं वा मे अज्जू (ख) ।

उभे । णामसारिस्सेण वञ्चिओ माउवच्छलो (ग) ।

द्वितीया । वच्छ इमस्स मित्तिआमोरअस्स रम्मत्तणं पेक्खसु त्ति भणिओ सि (घ) ।

राजा । आत्मगतम् । किंवा शकुन्तलेति अस्य मातुराख्या । सन्ति पुनर्नामधेयसादृश्यानि । अपि नाम मृगतृष्णिकेव नाममात्रप्रस्तावो मे विषादाय कल्पते (ङ) ।

बालः । अज्जुए रोअइ मे एसो भद्दमोरओ (च) ।

क्रीडनकमादत्ते ।

प्रथमा । विलोक्य सोद्वेगम् । अम्हहे रक्खाकरण्डअं मणिवन्धे से ण दीसइ (छ) ।

व्यवहारः किमाख्यासौ कस्य वा पत्नीत्यादिरूपः तस्यान्वेषः अनार्य्यैः आर्य्यजनविगर्हितः ।

(क) सर्व्वदमन शकुन्तलावर्ण्यं प्रेक्षस्व ।

(ख) कुत्र वा मे माता ।

(ग) नामसादृश्येन वञ्चितः मातृवत्सलः ।

(घ) वत्स अस्य मृत्तिकामयूरस्य रम्यत्वं प्रेक्षस्व इति भणितः असि ।

(ङ) नाममात्रप्रस्तावः शकुन्तलावर्ण्यमित्यत्र घुणाक्षरन्यायेन शकुन्तलेति नामाक्षरमात्रसङ्गतिः ।

(च) मातः रोचते मे एषः भद्रमयूरः ।

(छ) अम्महे रक्षाकरण्डकं मणिबन्धे अस्य न दृश्यते ।

रक्षाकरण्डकं रक्षाबन्धनं विघ्नविघाताय मणिबन्धे बद्धः ओषधिविशेषः ।

राजा। अलमावेगेन (१)। ननु दूदमस्य सिंहशावविमर्द्दात् परिभ्रष्टम्।

आदातुमिच्छति।

उभे। मा क्खु (२) एदं अवलम्बिअ। कहं गहीदं णेण (क)।

विस्मयात् उरोनिहितहस्ते परस्परमवलोकयतः।

राजा। किमर्थं प्रतिषिद्धाः स्मः।

प्रथमा। सुणाउ महाभाओ। एसा अवराइआ णाम ओसही दूमस्स जातकम्मसमए भअवता मारीएण दिसा। एदं किल मातापितरा अप्पाणं अ वज्जिअ अवरो भूमिपडिअं ण गेण्हइ (ख)।

राजा। अथ गृह्णाति।

प्रथमा। तदो तं सप्पो होइअ दंसइ (ग)।

राजा। भवतीभ्यां कदाचिदस्याः प्रत्यक्षीकृता विक्रिया।

उभे। अणेअसो (घ)।

(क) अलं खलु एतत् अवलम्ब्य। कथं गृहीतम् अनेन।

(ख) शृणोतु महाभागः। एषा अपराजिता नाम ओषधिः अस्य जातकर्म्मसमये भगवता मारीचेन दत्ता। एतां किल मातापितरौ आत्मानं च वर्जयित्वा अपरः भूमिपतितां न गृह्णाति।

(ग) ततः तं सर्पः भूत्वा दशति।

(घ) अनेकशः।

---

(१) अलमावेगेन। १। २। ४।
अलमलमावेगेन। ३।

(२) मा क्खु। १। ४। ६।
मा क्खु मा क्खु। २। ३। ७।

राजा । सहर्षम् । आत्मगतम् । कथमिव सम्पूर्णमपि (१) मे मनोरथं नाभिनन्दामि ।

बालं परिष्वजते ।

द्वितीया । सुव्वते एसु इमं वुत्तन्तं णिअमव्वावुआए (२) सउन्तलाए णिवेदेम्ह (क) ।

निष्क्रान्ते ।

बालः । मुञ्चसु मं जाव अज्जूए सआसं गमिस्सं (३) (ख) ।

राजा । पुत्तक मया सहैव मातरमभिनन्दिष्यसि ।

बालः । मम क्खु तातो दुस्सन्तो ण तुमं (ग) ।

राजा । सस्मितम् । एष विवाद एव प्रत्याययति ।

ततः प्रविशत्येकवेणीधरा शकुन्तला ।

शकुन्तला । विआरकाले वि पदूदत्थं सव्वदमणस्स ओसहिं सुणिअ ण मे आसा आसि अत्तणो भाअहेएसु । अहवा जह साणुमदीए आचक्खिअं तह संभावीअदि एदं (घ) ।

(क) सुव्रते एहि इमं वृत्तान्तं नियमव्यापृतायै शकुन्तलायै निवेदयावः ।

(ख) मुञ्च मां यावत् मातुः सकाशं गमिष्यामि ।

(ग) मम खलु तातः दुष्यन्तः न त्वम् ।

(घ) विकारकाले अपि प्रकृतिस्थां सर्व्वदमनस्य ओषधिं श्रुत्वा न मे आशा आसीत् आत्मनः भागधेयेषु । अथवा यथा सानुमत्या आख्यातं तथा सम्भाव्यते एतत् ।

---

(१) कथमपि सम्पूर्णमपि । १ ।
कथमिव सम्पूर्णमपि । २ । ४ ।
कथमिमं पूर्णमपि । ३ ।

(२) णिअमव्वावुआए । १ । २ । ४ । ६ ।
णिअमव्वाउलाए । ३ ।

(३) गमिस्सं । १ । ६ ।
गच्छामि । २ । ३ । ४ । ५

राजा । शकुन्तलां विलोक्य । अये सेयमत्रभवती शकुन्तला । यैषा

वसने परिधूसरे वसाना
नियमक्षाममुखी धृतैकवेणिः ।
अतिनिष्करुणस्य शुद्धशीला
मम दीर्घं विरहव्रतं बिभर्त्ति (क) ॥

शकुन्तला । पश्चात्तापविवर्णं राजानं दृष्ट्वा । ण क्खु अज्जउत्तो विअ (१) । तदो को एसो दाणिं किअरक्खामङ्गलं दारअं मे गत्तसंसग्गेण (२) दूसेदु (ख) ।

बालः । मातरमुपेत्य । अज्जूए एसो को वि पुरिसो (३) मं पुत्त त्ति आलिङ्गदु (ग) ।

राजा । प्रिये क्रौर्य्यमपि मे त्वयि प्रयुक्तम् अनुकूलपरिणामं संवृत्तं यदहमिदानीं त्वया प्रत्यभिज्ञातमात्मानं पश्यामि ।

(क) वसने परिधानोत्तरीयरूपं वस्त्रयुगलम् । परिधूसरे ईषत्पाण्डुनी मलिने इत्यर्थः । औपच्छन्दसिकं वृत्तम् ।

(ख) न खलु आर्य्यपुत्रः इव । ततः कः एषः इदानीं कृतरक्षामङ्गलं दारकं मे गात्रसंसर्गेण दूषयति ।

(ग) मातः एषः कः अपि पुरुषः मां पुत्रः इति आलिङ्गति ।

---

(१) अज्जउत्तो विअ ।१।२।४।६।७। गत्तसङ्गेण ।३।
अज्जउत्तो एसो ।३। (३) पुरिसो ।१।२।४।
(२) गत्तसंसग्गेण ।१।२।४।७। परकेरको ।३।

शकुन्तला । आत्मगतम् । हिअअ अस्ससु (१) । परिच्चत्तमच्छरेण अणुअम्पिअम्हि देव्वेण । अज्जउत्तो क्खु एसो (क) ।

राजा । प्रिये

स्मृतिभिन्नमोहतमसो दिष्ट्या प्रमुखे स्थितासि मे सुमुखि ।
उपरागान्ते शशिनः (२) समुपगता रोहिणी योगम् (ख) ॥

शकुन्तला । जेदु (३) अज्जउत्तो (ग) ।

अर्द्धोक्ते बाष्पकण्ठी विरमति ।

राजा । सुन्दरि

बाष्पेण प्रतिषिद्धेऽपि जयशब्दे जितं मया ।
यत्ते दृष्टमसंस्कारपाटलोष्ठपुटं मुखम् (घ) ॥

(क) हृदय आश्वसिहि । परित्यक्तमत्सरेण अनुकम्पिता अस्मि दैवेन । आर्य्यपुत्त्रः खलु एषः ।

परित्यक्तमत्सरेण उज्झितकोपेन प्रसन्नेनेत्यर्थः ।

(ख) हे सुमुखि दिष्ट्या भाग्येन स्मृत्या अङ्गुलीयदर्शनादुपलब्धेन स्मरणेन भिन्नं निरस्तं मोहतमः मोहान्धकारं यस्य तथोक्तस्य मे मम प्रमुखे सम्मुखे स्थिता असि अत्र दृष्टान्तः शशिनः चन्द्रस्य उपरागान्ते राहुग्रासनिवृत्तौ रोहिणी दक्षतनया चन्द्रपत्नी योगं मिलनं शशिनेति शेषः समुपगता प्राप्ता । आर्य्या जातिः ।

(ग) जयतु आर्य्यपुत्त्रः ।

(घ) असंस्कारपाटलोष्ठपुटम्— असंस्कारम् अलक्तकरञ्जनरहितं तथापि पाटलं लोहितं स्वभावरक्तमित्यर्थः ओष्ठपुटम् ओष्ठमुद्रा यस्मिन् तत् तथोक्तम् । पथ्यावक्त्रं वृत्तम् ।

---

(१) अस्ससु । १ । ६ । ७ ।
समस्ससदु समस्ससद । २ ।
अस्ससस अस्ससद । ३ ।
अस्ससिहि अस्ससिहि । ४ ।

(२) शशिनः । १ । २ । ४ । ६ ।
शशिना । ३ ।

(३) जेदु । १ । २ । ३ ।
जेउ जेउ । ४ । ६ । ७ ।

बालः । अज्जूए को एसो (क) ।

शकुन्तला । वच्छ दे भाअहेआइं पुच्छस्स (ख) ।

राजा । शकुन्तलायाः पादयोः प्रणिपत्य ।

सुतनु हृदयात् प्रत्यादेशव्यलीकमपैतु ते
किमपि मनसः सम्मोहो मे तदा बलवानभूत् ।
प्रबलतमसामेवम्प्रायाः शुभेषु हि वृत्तयः
स्रजमपि शिरस्यन्धः क्षिप्तां धुनोत्यहिशङ्कया (ग) ॥

शकुन्तला । उट्ठेदु अज्जउत्तो । णूणं मे सुअरिअप्पडिबन्धअं पुराकिअं तेसु दिअहेसु परिणामसुहं आसि जेण साणुक्कोसो वि अज्जउत्तो मइ विरसो संवुत्तो (घ) ।

राजा । उत्तिष्ठति ।

शकुन्तला । अह कहं अज्जउत्तेण सुमरिओ दुक्खभाई अअं जणो (ङ) ।

राजा । उद्धृतविषादशल्यः कथयिष्यामि ।

(क) मातः कः एषः ।

(ख) वत्स ते भागधेयानि पृच्छ ।

(ग) प्रत्यादेशव्यलीकं प्रत्याख्यानदुःखम् । किमपि कुतोऽपि निमित्तात् । एवम्प्रायाः प्रायेणैतादृश्यः । शुभेषु कल्याणेषु विषये । वृत्तयः व्यापाराः । हरिणी वृत्तम् ।

(घ) उत्तिष्ठतु आर्य्यपुत्रः । नूनं मे सुचरितप्रतिबन्धकं पुराकृतं तेषु दिवसेषु परिणामसुखम् आसीत् येन सानुक्रोशः अपि आर्य्यपुत्रः मयि विरसः संवृत्तः ।

सुचरितप्रतिबन्धकम्— सुचरितं पुण्यं तस्य प्रतिबन्धकं फलजनकताप्रतिरोधकम् । पुराकृतं जन्मान्तरकृतं दुष्कृतम् । परिणामसुखं परिपाकोन्मुखम् । विरसः निरनुरागः ।

(ङ) अथ कथम् आर्य्यपुत्रेण स्मृतः दुःखभागी अयं जनः ।

मोहान्मया सुतनु पूर्व्वमुपेक्षितस्ते
यो बद्धविन्दुरधरं (१) परिबाधमानः ।
तं तावदाकुटिलपक्ष्मविलग्नमद्य
वाष्पं प्रमृज्य विगतानुशयो भवेयम् (क) ॥

यथोक्तमनुतिष्ठति ।

शकुन्तला । नामसुद्रां दृष्ट्वा । अज्जउत्त एदं तं (२) अङ्गुली-अअं (ख) ।

राजा । अस्माङ्गुलीयस्य उपलम्भात् (३) खलु स्मृतिरुपलब्धा ।

शकुन्तला । विसमं कम्रं णेण जं तदा अज्जउत्तस्स पच्चा-अणकाले दुल्लहं आसि (ग) ।

राजा । तेन हि ऋतुसमवायचिह्नं प्रतिपद्यतां लता कुसुमम् (घ) ।

शकुन्तला । ण से विस्ससामि । अज्जउत्तो एव्व णं धारेउ (ङ) ।

(क) वसन्ततिलका वृत्तम् ।

(ख) आर्य्यपुत्र एतत् तत् अङ्गुरीयकम् ।

(ग) विषमं कृतम् अनेन यत् तदा आर्य्यपुत्रस्य प्रत्यायनकाले दुर्लभम् आसीत् ।

(घ) ऋतुसमवायचिह्नम्— ऋतुना वसन्तेन समवायस्य समागमस्य चिह्नं लक्षणभूतम् ।

(ङ) न अस्य विश्वसिमि । आर्य्यपुत्रः एव एतत् धारयतु ।

---

(१) वाष्पविन्दुः । १ । ६ ।
बद्धविन्दुः । २ । ३ । ४ ।

(२) एदं दे । १ । ६ ।
एदं दे । २ ।
एदं सं । ३ । ४ ।

(३) अस्मादङ्गुलीयोपलम्भात् । १ । २ । ३ । ४ ।

ततः प्रविशति मातलिः ।

मातलिः । दिष्ट्या धर्म्मपत्नीसमागमेन पुत्त्रमुखदर्शनेन च आयुष्मान् वर्द्धते ।

राजा । अभूत् सम्पादितस्वादुफलो मे मनोरथः । मातले न खलु विदितोऽयमाखण्डलेन वृत्तान्तः स्यात् ।

मातलिः । सस्मितम् । किमीश्वराणां परोक्षम् । एह्यायुष्मन् भगवान् मारीचस्ते दर्शनं वितरति ।

राजा । शकुन्तले अवलम्ब्यतां पुत्त्रः । त्वां पुरस्कृत्य भगवन्तं (१) द्रष्टुमिच्छामि ।

शकुन्तला । हिरिआमि अज्जउत्तेण सह गुरुसमीवं गन्तुं (क) ।

राजा । अयि आचरितव्यमभ्युदयकालेषु (२) । एहि एहि ।

सर्व्वे । परिक्रामन्ति ।

ततः प्रविशति अदित्या सार्द्धमासनस्थो मारीचः ।

मारीचः । राजानमवलोक्य । दाक्षायणि

पुत्त्रस्य ते रणशिरस्ययमग्रयायी
दुष्यन्त इत्यभिहितो भुवनस्य भर्त्ता ।
चापेन यस्य विनिवर्त्तितकर्म्म जातं
तत् कोटिमत् कुलिशमाभरणं मघोनः (ख) ॥

(क) जिह्रेमि आर्य्यपुत्त्रेण सह गुरुसमीपं गन्तुम् ।

(ख) यस्य चापेन धनुषा विनिवर्त्तितं निष्पादितं कर्म्म असुरनिवर्हणरूपं कार्य्यं यस्य तत् तथोक्तं कोटिमत् अतितीक्ष्णाग्रं तत् प्रसिद्धशौर्य्यं कुलिशं

---

(१) भगवन्तम् । १ । ३ । ४ ।
भगवन्तं मारीचम् । २ ।

(२) अभ्युदयकालेषु । १ । २ । ४ ।
अभ्युदयकाले । ३ ।

अदितिः । संभावणीआणुभावा से आकिदी (क) ।

मातलिः । आयुष्मन् एतौ पुत्रप्रीतिपिशुनेन चक्षुषा दिवौकसां पितरौ आयुष्मन्तमवलोकयतः (ख) । तावुपसर्प ।

राजा । मातले एतौ (१)

प्राहुर्द्वादशधा स्थितस्य (२) मुनयो यत्तेजसः कारणं
भर्त्तारं भुवनत्रयस्य सुषुवे यद्यज्ञभागेश्वरम् ।
यस्मिन्नात्मभवः परोऽपि पुरुषश्चक्रे भवायास्पदं
द्वन्द्वं दक्षमरीचिसम्भवमिदं तत् स्रष्टुरेकान्तरम् (ग) ॥

वज्रं मघोनः इन्द्रस्य आभरणं भूषणं जातं वीतप्रयोजनतया सन्निधिमात्रेण संवृत्तमित्यर्थः । वसन्ततिलका वृत्तम् ।

(क) सम्भावनीयानुभावा अस्य आकृतिः ।

सम्भावनीयानुभावा— सम्भावनीयः अनुमेयः अनुभावः प्रभावः यस्याः सा तथोक्ता ।

(ख) एतौ दिवौकसां देवानां पितरौ मातापितरौ अदितिकश्यपौ पुत्रप्रीतिपिशुनेन पुत्रस्नेहसूचकतया चक्षुषा आयुष्मन्तम् अवलोकयतः त्वां प्रीतिस्निग्धेन नयनेन पुत्रनिर्विशेषं निरीक्षेते इत्यर्थः ।

(ग) मुनयः यत् द्वन्द्वं द्वादशधा स्थितस्य धातृप्रभृतिद्वादशमूर्त्तिधरस्य तेजसः आदित्यरूपस्य कारणम् उत्पादकं प्राहुः वदन्ति द्वादशादित्याश्च भिताक्षरायां दिव्यविधिप्रकरणे परिगणिताः यथा—

धाताऽर्यमा च मित्रश्च वरुणोंऽशो भगस्तथा ।
इन्द्रो विवस्वान् पूषा च पर्ज्जन्यो दशमः स्मृतः ॥
ततस्त्वष्टा ततो विष्णुरजघन्यो जघन्यजः ।
इत्येते द्वादशादित्या नामभिः परिकीर्त्तिताः ॥

यत् द्वन्द्वं भुवनत्रयस्य स्वर्गपृथिवीपातालरूपस्य त्रिभुवनस्य भर्त्तारं पालयितारं

---

(१) मातले एतौ । १ । २ । ४ । तावेतौ । ३ ।

(२) प्राहुः । १ । ३ । प्राहुः । २ । ४ ।

मातलिः । अथकिम् ।

राजा । उपगम्य (१) । उभाभ्यामपि वासवानुयोज्यो दुष्यन्तः प्रणमति (क) ।

मारीचः । वत्स चिरं जीव पृथिवीं पालय ।

अदितिः । वच्छ अप्पतिरहो होसु (ख) ।

शकुन्तला । दारअसहिआ वो पादवन्दणं करोमि (ग) ।

मारीचः । वत्से

आखण्डलसमो भर्त्ता जयन्तप्रतिमः सुतः ।

आशीरन्या न ते योग्या पौलोमीसदृशी भव (२) (घ) ॥

यज्ञे भागो येषां ते यज्ञभागाः देवाः तेषाम् ईश्वरम् अधिपतिम् इन्द्रं सुषुवे जनयामास यस्मिन् द्वन्द्वे आत्मना भवतीति आत्मभवः स्वयम्भूः परः परमः पुरुषः विष्णुः अपि भवाय वामनावतारे जन्मने आस्पदम् अधिष्ठानं चक्रे अत्र विष्णुपुराणम्

मन्वन्तरे च सम्प्राप्ते तथा वैवस्वते द्विज ।

वामनः कश्यपाद्विष्णुरदित्यां सम्बभूव ह ॥

एतौ अदितिकश्यपौ सम्भवत्यस्मादिति सम्भवः जनकः दक्षमरीची प्रजापती सम्भवौ यस्य तत् दक्षमरीचिसम्भवं स्रष्टुः ब्रह्मणः एकम् अन्तरं व्यवधिर्यस्य तत् एकान्तरं ब्रह्मणः पौत्रीपौत्ररूपम् ब्रह्मणः पुत्त्रो दक्षः दक्षस्य तनया अदितिः ब्रह्मणः पुत्त्रो मरीचिः मरीचेः पुत्त्रः कश्यप इति एकान्तरत्वं तत् इदं द्वन्द्वं स्त्रीपुंसयुगलम् । शार्दूलविक्रीडितं वृत्तम् ।

(क) वासवानुयोज्यः— वासवस्य इन्द्रस्य अनुयोज्यः आज्ञाकरः ।

(ख) वत्स अप्रतिरथः भव ।

अप्रतिरथः— न विद्यते प्रतिरथः प्रतिद्वन्द्वी यस्य स तथोक्तः ।

(ग) दारकसहिता वां पादवन्दनं करोमि ।

(घ) पथ्यावक्त्रं वृत्तम् ।

---

(१) राजा । उपगम्य । १ । राजा । २ । ३ । ४ ।

(२) पौलोमीसदृशी । १ । ४ । पौलोम्या सदृशी २ । ३ । ५ ।

अदितिः । जाते भत्तुणो अहिमआ होस्स । अवस्सं दीहाउ वच्छओ उहअकुलणन्दणो होउ । उवविसह (क) ।

सर्व्वे । प्रजापतिमभित उपविशन्ति ।

मारीचः । एकैकं निर्दिशन् ।

दिष्ट्या शकुन्तला साध्वी सदपत्यमिदं भवान् ।
श्रद्धा वित्तं विधिश्चेति त्रितयं तत् समागतम् (ख) ॥

राजा । भगवन् प्रागभिप्रेतसिद्धिः पश्चाद्दर्शनम् अतोऽपूर्व्वः खलु वोऽनुग्रहः । कुतः (१)

उदेति पूर्व्वं कुसुमं ततः फलं
घनोदयः प्राक् तदनन्तरं पयः ।
निमित्तनैमित्तिकयोरयं क्रमः (२)
तव प्रसादस्य पुरस्तु सम्पदः (ग) ॥

मातलिः । एवं विधातारः प्रसीदन्ति (घ) ।

राजा । भगवन् इमामाज्ञाकरीं वो गान्धर्व्वेण विवाहविधिना उपयम्य कस्यचित् कालस्य बन्धुभिरानीतां स्मृतिशैथिल्यात्

(क) जाते भर्त्तुः अभिमता भव । अवश्यं दीर्घायुः वत्सकः उभयकुलनन्दनः भवतु । उपविशतम् ।

(ख) भवतां त्वयाणां समागमः श्रद्धावित्तविधिसमवाय इव नितरां स्पृहणीय इत्यर्थः । पथ्यावक्त्रं वृत्तम् ।

(ग) वंशस्थविलं वृत्तम् ।

(घ) विधातारः प्रजापतयः ।

---

(१) अतः अपूर्व्वः खलु वोऽनुग्रहः । पश्यतु भवान् । २ ।
कुतः । १ । २ । ४ ।
इत्यपूर्व्वः खलु ववानुग्रहः ।

(२) क्रमः । १ । २ । ४ ।
विधिः । २ ।

प्रत्यादिशन् अपराद्धोऽस्मि तत्रभवतो युष्मत्सगोत्रस्य (१) कण्वस्य । पश्चात् अङ्गुलीयकदर्शनात् ऊढ़पूर्व्वां तद्दुहितरमवगतोऽहम् । तत् चित्रमिव मे प्रतिभाति ।

यथा गजो नेति समक्षरूपे
तस्मिन्नतिक्रामति संशयः स्यात् ।
पदानि दृष्ट्वा तु भवेत् प्रतीतिः
तथाविधो मे मनसो विकारः (क) ॥

मारीचः । वत्स अलमात्मापराधशङ्कया (२) । सम्मोहोऽपि त्वय्युपपन्नः (३) । श्रूयताम् (४) ।

राजा । अवहितोऽस्मि ।

मारीचः । यदैव अप्सरस्तीर्थावतरणात् प्रत्यक्षवैक्लव्यां (५)

(क) यथा यद्वत् समक्षम् अक्षिगोचरं रूपं यस्य तथोक्ते गजे गजो न नायं पुरोवर्त्ती महाकायो जन्तुर्गज इति बुद्धिर्जायते ततः तस्मिन् गजे अतिक्रामति दृष्टिपथमतिवर्त्तमाने सति असौ गजो वा न वा इति संशयः स्यात् अनन्तरं पदानि पदचिह्नानि दृष्ट्वा तु प्रतीतिः असौ गज एवेति निश्चयात्मिका बुद्धिर्भवेत् मे मनसः विकारः सम्मोहः तथाविधः आसीत् यदेयं मम पुरोवर्त्तिनी आसीत् तदा कुतोऽपि निमित्तात् नष्टस्मृतिः नेयमूढ़पूर्व्वेति मत्वा इमामहं प्रत्यादिष्टवान् ततः प्रत्यादिष्टायामस्यां दृष्टिपथमतिक्रान्तायाम् इयमूढपूर्व्वा न वेति संशय आसीत् पश्चात् अङ्गुरीयदर्शनात् उपजातस्मृतिः ऊढपूर्व्वैवेयमित्यवगतोऽहम् ।

---

(१) युष्मत्सगोत्रस्य । १ । २ । ४ ।
युष्मद्गोत्रस्य । ३ ।
(२) आत्मापराधशङ्कया । १ । ३ । ४ ।
आत्मापचारशङ्कया । २ ।
(३) उपपन्नः । १ । ३ ।
अनुपपन्नः । २ । ४ ।
(४) श्रूयताम् । १ । २ । ४ ।
श्रूयतां तावत् । ३ ।
(५) प्रत्याख्यानवैक्लव्याम् । १ ।
प्रत्यक्षवैक्लव्याम् । २ । ४ ।
प्रत्ययवैक्लव्याम् । ३ ।

शकुन्तलामादाय मेनका दाक्षायणीमुपगता तदैव ध्यानादवगतोऽस्मि (१) दुर्व्वाससः शापात् इयं तपस्विनी सहधर्म्मचारिणी त्वया प्रत्यादिष्टा नान्यथेति (२)। स चायम् अङ्गुलीयकदर्शनावसानः (३) (क)।

राजा। सोच्छ्वासम् (४)। एष वचनीयान्मुक्तोऽस्मि (ख)।

शकुन्तला। स्वगतम्। दिट्ठिआ अकारणपच्चादेसी ण अज्जउत्तो। ण्हु सत्तं अत्ताणं सुमरामि। अहवा पत्तो मए स ह्नि सावो विरहसुण्णहिअआए ण विदिओ जदो सहीहिं संदिट्ठ ह्नि भत्तुणो अङ्गुलीअअं दंसेदूअव्वं त्ति (५) (ग)।

(क) अप्सरस्तीर्थावतरणात् अप्सरस्तीर्थजलावतारात्। प्रत्यक्षवैक्लव्याम्— प्रत्यक्षं विस्पष्टरूपं वैक्लव्यं कातर्य्यं यस्याः सा ताम्।

(ख) वचनीयात् अयं धर्म्मपत्नीपरित्यागीत्येवंलक्षणात् जनापवादात्।

(ग) दिष्ट्या अकारणप्रत्यादेशी न आर्य्यपुत्त्रः। न हि शप्तमात्मानं स्मरामि। अथवा प्राप्तः मया सः हि शापः विरहशून्यहृदयया न विदितः यतः सखीभ्यां सन्दिष्टा अस्मि भर्त्रे अङ्गुरीयकं दर्शयितव्यम् इति।

---

(१) अवगतोऽस्मि। १। २।
अवगतवृत्तान्तोऽस्मि। ३।
उपगतोऽस्मि। ४।

(२) प्रत्यादिष्टा नान्यथेति।१।२।४।
प्रत्यादिष्टेति। ३।

(३) स चायमङ्गुलीयकदर्शनावसानः ।१।२।४।
स चायमङ्गुलीयकदर्शनावधिः शापः। ३।

(४) सोच्छ्वासम्। १।२।४।
निश्वस्य। ३।

(५) दिट्ठिआ अकारणपच्चादेसी ण अज्जउत्तो। ण्हु सत्तं अत्ताणं सुमरेमि। अहवा पत्तो मए स ह्नि सावो विरहसुण्णहिअआए ण विदिओ जदो सहीहिं सन्दिट्ठ ह्नि भत्तुणो अङ्गुलीअअं दंसेदूअव्वं त्ति। १। २। ४। ६। ७।
दिट्ठिआ कारणपच्चादेसी अज्जउत्तो। ण उण अत्तणो सावं सुमरेमि। अहवा धुवं पत्तो मए असुहिअआए सावो। अदो एव्व अप्पाअरेण सहीहिं सन्दिट्ठ ह्नि भत्तुणो अङ्गुलीअअं दंसेहि त्ति। ३।

मारीचः । वत्से विदितार्थासि (१) । सहधर्म्मचारिणं (२) प्रति न त्वया मन्युः कार्य्यः (क) । पश्य

शापादसि प्रतिहता स्मृतिरोधरूक्षे
भर्त्तर्य्यपेततमसि प्रभुता तवैव ।
छाया न मूर्च्छति मलोपहतप्रसादे
शुद्धे तु दर्पणतले सुलभावकाशा (ख) ॥

राजा । यथाह भगवान् ।

मारीचः । वत्स कच्चित् अभिनन्दितस्त्वया विधिवदस्माभिः अनुष्ठितजातकर्म्मा पुत्त्र एष शाकुन्तलेयः ।

राजा । भगवन् अत्र खलु मे वंशप्रतिष्ठा (३) (ग) ।

(क) विदितार्था— विदितः परिज्ञातः अर्थः प्रत्यादेशनिदानरूपः विषयः यया सा तथोक्ता । मन्युः अनिदानं प्रत्यादिष्टास्मीति कोपः ।

(ख) भर्त्तरि शापात् हेतोः स्मृतेः स्मरणस्य रोधेन आवरणेन रूक्षे परुषे इति प्रतिहता प्रत्यादिष्टा असि अथ अपेततमसि विगतमोहे तस्मिन् तवैव प्रभुता अत्र दृष्टान्तः मलेन आगन्तुकेन मालिन्येन उपहतः तिरोहितः प्रसादः नैर्मल्यं यस्य तादृशे दर्पणतले छाया प्रतिविम्बं न मूर्च्छति प्रसरति शुद्धे निर्मले तु तस्मिन् सुलभः अनायासलभ्यः अवकाशः प्रसरः यस्याः सा तथोक्ता भवति । वसन्ततिलका वृत्तम् ॥

(ग) खलु निश्चये अत्र अस्मिन् शिशौ मे मम वंशप्रतिष्ठा वंशस्थितिः अयं मे वंशकरस्तनय इत्यर्थः ।

---

(१) चरितार्थासि ।१।२।४।६। विदितार्थासि । ३ ।

(२) सहधर्म्मचारिणं प्रति ।१।२।४। तदिदानीं सहधर्म्मचारिणं प्रति । ३ ।

(३) राजा । भगवन् अत्र खलु मे वंशप्रतिष्ठा । बालं हस्तेन दर्शयति ।१।२।४। राजा । यथाह भगवान् । मारीचः । वत्स कच्चिदभिनन्दितस्त्वया विधिवदस्माभिरनुष्ठितजातकर्म्मा पुत्त्र एष शाकुन्तलेयः । राजा । भगवन् अत्र खलु मे महती वंशप्रतिष्ठा । ३ ।

मारीचः । तथाभाविनमेनं चक्रवर्त्तिनमवगच्छतु भवान्(क) ।
पश्य

रथेनानुद्घातस्तिमितगतिना तीर्णजलधिः
पुरा सप्तद्वीपां जयति वसुधामप्रतिरथः ।
इहायं सत्त्वानां प्रसभदमनात् सर्व्वदमनः
पुनर्य्यास्यत्याख्यां भरत इति लोकस्य भरणात् (ख) ॥

राजा । भगवता कृतसंस्कारे सर्व्वमस्मिन् वयमाशास्महे(१) ।

अदितिः । भअवं इमाए दुहिउमणोरहसम्पत्तीए कण्णो वि दाव सुअवित्थारो (२) करीअउ । दुहिउवच्छला (३)मेणआ इह एव्व उवचरन्ती (४) चिट्ठइ (ग) ।

(क) तथाभाविनं तथा भविष्यन्तं भविष्यं वंशकरमित्यर्थः ।

(ख) अयं शाकुन्तलेयः अविद्यमानः प्रतिरथः प्रतिद्वन्द्वी यस्य तादृशः सन् अनुद्घाता प्रतिघातरहिता अतएव स्तिमिता स्थिरा सुखकरीति यावत् गतिः सञ्चारो यस्य तथोक्तेन रथेन तीर्णजलधिः उत्क्रान्तसमुद्रः सन् सप्त द्वीपा यस्यां सा सप्तद्वीपा जम्बू प्लक्ष शाल्मलि कुश क्रौञ्च शाक पुष्कराख्यैः सप्तभिर्द्वीपैः विभक्ता इत्यर्थः तां तादृशीं वसुधां पृथिवीं पुरा जयति जेष्यति इह अस्मदाश्रमे सत्त्वानां सिंहादिजन्तूनां प्रसभेन बलात्कारेण दमनात् सर्व्वदमनः अस्माभिः सर्व्वदमन इति कृतनामधेयः पुनः अनन्तरं लोकस्य भुवनस्य भरणात् परिपालनात् भरतः इति आख्यां नामधेयं यास्यति प्राप्स्यति । शिखरिणी वृत्तम् ।

(ग) भगवन् अस्याः दुहितृमनोरथसम्पत्तेः कण्वः अपि तावत् श्रुतविस्तारः क्रियताम् । दुहितृवत्सला मेनका इह एव उपचरन्ती तिष्ठति ।

---

(१) वयमाशास्महे । १ । २ ।
आशास्महे । ३ ।

(२) सुअवित्थारो । १ । २ । ६ । ७ ।
सुअत्थो । ३ ।

(३) दुहिउवच्छला । १ । २ । ६ । ७ ।
सुअवच्छला । ३ ।

(४) उवचरन्ती । १ । २ । ६ । ७ ।
परिचरन्ती । ३ ।

शकुन्तला । आत्मगतम् । मणोरहो क्खु मे भणिओ (१) भअवतीए (क) ।

मारीचः । तपःप्रभावात् प्रत्यक्षं सर्व्वमेव तत्रभवतः (२) ।

राजा । अतः खलु मम अनतिक्रुद्धो मुनिः (३) ।

मारीचः । तथाप्यसौ प्रियमस्माभिराप्रष्टव्यः (४) (ख) । कः कोऽत्र भोः ।

प्रविश्य

शिष्यः । भगवन् अयमस्मि ।

मारीचः । गालव इदानीमेव विहायसा गत्वा मम वचनात् तत्रभवते कण्वाय प्रियमावेदय यथा पुत्त्रवती शकुन्तला तच्छापनिवृत्तौ स्मृतिमता दुष्यन्तेन प्रतिगृहीतेति ।

शिष्यः । यदाज्ञापयति भगवान् ।

निष्क्रान्तः ।

दुहितृमनोरथसम्पत्तेः तनयाप्रार्थितसिद्धेः । उपचरन्ती अस्मान् परिचरन्ती ।

(क) मनोरथः खलु मे भणितः भगवत्या ।

(ख) आप्रष्टव्यः आवेदयितव्यः ।

---

(१) मणोरहो क्खु मे भणिओ । १ । २ । ६ । ७ ।
मणोगअं मे भणिअं । ३ ।

(२) तत्रभवतः कण्वस्य । १ । ३ ।
तत्रभवतः । २ ।

(३) ममानतिक्रुद्धो मुनिः । १ । २ ।
न मामतिक्रुद्धो गुरुः । ३ ।

(४) प्रष्टव्यः । १ । २ ।
आप्रष्टव्यः । ३ ।

मारीचः। वत्स त्वमपि सापत्यदारसहितः (१) सख्युराखण्डलस्य रथमारुह्य राजधानीं (२) प्रतिष्ठस्व।

राजा। यदाज्ञापयति भगवान्।

मारीचः। अपिच

तव भवतु विड़ौजाः प्राज्यवृष्टिः प्रजासु
त्वमपि विततयज्ञः स्वर्गिणः प्रीणयस्व (३)।
युगशतपरिवर्त्तानेवमन्योन्यकृत्यैः
नयतमुभयलोकानुग्रहश्लाघनीयैः (क)॥

राजा। भगवन् यथाशक्ति श्रेयसे यतिष्ये।

मारीचः। किं ते भूयः प्रियमुपहरामि (४)।

राजा। अतः परमपि प्रियमस्ति। यदीह भगवान् (५) प्रियं कर्त्तुमिच्छति तर्हीदमस्तु

(क) विड़ौजाः इन्द्रः तव प्रजासु प्राज्या प्रभूता वृष्टिः वर्षं यस्मात् सः तथोक्तः भवतु त्वमपि विततयज्ञः सततमनुष्ठितयागः सन् स्वर्गिणः स्वर्गवासिनो देवान् प्रीणयस्व एवम् अनया विधया उभयलोकानुग्रहेण स्वर्गपृथिवीरूपस्य भुवनद्वयस्य उपकारेण श्लाघनीयैः स्पृहणीयैः अन्योन्यकृत्यैः प्रभूतजलवर्षण-सततयज्ञानुष्ठानरूपैः परस्परकार्य्यैः युगशतपरिवर्त्तान् असंख्यान् सत्यादि-युगातिक्रमान् अपरिमितं कालमित्यर्थः नयतम् अतिवाहयतम्। मालिनी वृत्तम्।

---

(१) सापत्नदारसहितः। १।
स्वापत्यदारसहितः। २। ३।
(२) ते राजधानीम्। १।
राजधानीम्। २।
स्वराजधानीम्। ३।
(३) भावयामम्। १। ३।
प्रीणयस्व। २।
(४) उपहरामि। १। २।
उपकरोमि। ३।
(५) यदीह भगवान्। १।
यदिह भगवान्। २।
यदि भगवान् प्रसन्नः। ५।

भरतवाक्यम् (क)।

प्रवर्त्ततां प्रकृतिहिताय पार्थिवः
सरस्वती श्रुतमहतां महीय्यताम् (१)।
ममापि च (२) क्षपयतु नीललोहितः
पुनर्भवं परिगतशक्तिरात्मभूः (ख)॥

निष्क्रान्ताः सर्व्वे।

सप्तमोऽङ्कः।

(क) भरतवाक्यं नटवाक्यम्। यथा ग्रन्थारम्भे नटैराशीः प्रयुज्यते तद्वत् ग्रन्थसमाप्तौ नटमुखेनैव आशीःप्रयोगः।

(ख) पार्थिवः राजा प्रकृतीनां प्रभु मन्त्रि मित्र कोष राष्ट्र दुर्ग बललक्षणानां राज्याङ्गानां हिताय प्रवर्त्ततां हितसाधने यततां श्रुतेन शास्त्राधिगमेन महतां माननीयानां शास्त्रज्ञानामित्यर्थः सरस्वती भारती महीय्यताम् आद्रियताम् परिगता परितः प्रसारिणी शक्तिः सामर्थ्यं यस्य स तथोक्तः सर्व्वशक्तिमानित्यर्थः आत्मना भवतीति आत्मभूः स्वयम्भुः नीललोहितः शिवः ममापि पुनर्भवं पुनर्जन्म क्षपयतु निवर्त्तयतु। रुचिरा वृत्तम्।

---

(१) महीयताम्।१।२।३।४। (२) ममापि च।१।२। अमङ्गलम्।३।

নাটকপ্রযুক্ত পারিভাষিক শব্দের অর্থ

অঙ্ক—যে স্থলে নাটকীয় ইতিবৃত্তের এক অংশের শেষ হয়, তথায় পরিচ্ছেদ কল্পিত হইয়া থাকে ; ঐ পরিচ্ছেদের নাম অঙ্ক। অঙ্কশেষে সমুদয় নট রঙ্গভূমি হইতে নিষ্ক্রান্ত হয় ; পর অঙ্কে নূতন নূতন নট প্রবিষ্ট হইয়া অভিনয় আরম্ভ করে।

২। **অপবার্য্য**—সন্নিহিত অন্য ব্যক্তিরা শুনিতে না পায়, এরূপ অনুচ্চ স্বরে গোপন করিয়া। যথা, "विदूषकः। अपवार्य्य। एसा दासिं अत्तु-जला दे अब्भत्थणा"। ৬৩পৃ০।

৩। **আকাশে**—নাটকের যে স্থলে "आकाशे" এই রূপ লিখিত থাকে, তাহার অর্থ এই, কোনও নট রঙ্গভূমিতে প্রবেশ পূর্ব্বক, তথায় অনুপস্থিত ব্যক্তিবিশেষের কার্য্যদর্শন বা বাক্যশ্রবণের অভিনয় করিয়া, আকাশাভিমুখে কিছু বলিতেছে। যথা "आकाशे"। प्रियंवदे कस्येदमुशीरानुलेपनं मृणालवन्ति च नलिनीपत्राणि नीयन्ते। श्रुतिमभिनीय। किं ब्रवीषि आतपलङ्घनाद्बलवदस्वस्था शकुन्तला तस्याः शरीरनिर्व्वापणायेति। तर्हि त्वरितं गम्यतामित्यादि।" ৬৯পৃ০। অথবা, রঙ্গভূমিপ্রবিষ্ট অভিনয়কারীদিগের অদৃশ্য হইয়া, আকাশ হইতে কেহ বলিতেছে। যথা

"आकाशे

रम्यान्तरः कमलिनीहरितैः सरोभिश्छायाद्रुमैर्नियमितार्कमयूखतापः।
भूयात् कुशेशयरजोमृदुरेणुरस्याः शान्तानुकूलपवनश्च शिवश्च पन्थाः॥
सर्व्वे। सविस्मयमाकर्णयन्ति।" ১২৪পৃ০।

৪। **আত্মগত, স্বগত**—অভিনয় কালে কোনও নট, সন্নিহিত ব্যক্তিবর্গের নিকট গোপন করিবার নিমিত্ত, মনে মনে যে বিষয়বিশেষের

আন্দোলন করে, তাহার নাম আত্মগত ও স্বগত। যথা "রাজা। আত্মগতম্। ন খলু দুর্বোপেয়ং প্রার্থনা"। ৩৪পৃ০। "রাজা। স্বগতম্। অয়ন্ত্বৈবমাহ মমাপি কাম্যমস্তুতামনুস্মৃত্য ন্মৃগয়াবিক্লবং চেতঃ"। ৪৮পৃ০।

৫। **কঞ্চুকী**—যে সত্যবাদী, জিতেন্দ্রিয়, কার্য্যদক্ষ, বয়োবৃদ্ধ ব্যক্তি রাজকীয় অন্তঃপুরের কার্য্যে নিযুক্ত থাকিত। অন্তঃপুরে বিশ্রামকালে রাজাকে কোনও সংবাদ দিবার প্রয়োজন হইলে, কঞ্চুকী দ্বারা সম্পন্ন হইত।

৬। **জনান্তিক**—সন্নিহিত অন্য অন্য ব্যক্তি শুনিতে না পায়, এরূপ গোপনভাবে পরস্পর কথোপকথন। যথা, "সেনাপতিঃ। জনান্তিকম্। সখে স্থিরপ্রতিবন্ধো ভব। অহং তাবৎ স্বামিনশ্চিত্তবৃত্তিমনুবর্ত্তিষ্যে"। ৫১পৃ০।

৭। **নটী**—যে স্ত্রীলোক নৃত্য করে, অর্থাৎ রঙ্গভূমিতে নৃত্য, গীত ও অভিনয় করা যাহার ব্যবসায়। সুতরাং যে যে স্ত্রীলোক নাটকের অভিনয় করে, তাহারা সকলেই নটীশব্দবাচ্য। কিন্তু, প্রস্তাবনাতে যেখানে নটীর প্রবেশ বর্ণিত থাকে, তথায় নটীশব্দে সূত্রধারের সহকারী নটীবিশেষ অভিপ্রেত।

৮। **নান্দী**—সূত্রধার রঙ্গভূমিতে উপস্থিত হইয়া, অভিপ্রেত অভিনয় কার্য্যের নির্ব্বিঘ্ন পরিসমাপ্তির নিমিত্ত, যে মঙ্গলাচরণ করে, তাহার নাম নান্দী। স্তবাদি দ্বারা দেবতাদিগকে আনন্দিত অর্থাৎ প্রসন্ন করে, এজন্য এই মঙ্গলাচরণ নান্দীশব্দে নির্দ্দিষ্ট হইয়া থাকে। নাটকগ্রন্থের আরম্ভে যে এক বা তদধিক শ্লোক থাকে, তাহা নাটকের নান্দী নহে; নাট্যশাস্ত্রকারেরা নান্দীর যে যে লক্ষণ নির্দ্দিষ্ট করিয়াছেন, ঐ সকল শ্লোক সে সমস্ত লক্ষণে আক্রান্ত নয়। বস্তুতঃ, ঐ সকল শ্লোক গ্রন্থকারের মঙ্গলাচরণ। "নান্দ্যন্তে সূত্রধারঃ" এই অবধি গ্রন্থের আরম্ভ। গ্রন্থারম্ভে মঙ্গলাচরণের যে প্রথা আছে, তদনুবর্ত্তী হইয়া কবিরা স্বপ্রণীত নাটকের প্রারম্ভে মঙ্গলাচরণ করিয়া থাকেন। নান্দ্যন্তে নান্দীর পর, অর্থাৎ অভিনয় আরম্ভ করিবার পূর্ব্বে দেবতাপ্রণামাদিরূপ নান্দী কীর্ত্তন করিয়া। এই নান্দী নাটকের অঙ্গ নহে, অভিনেতৃবর্গের অধিকারী সূত্রধারের কার্য্য।

৯। **নেপথ্য**—যে স্থলে নাটকের অভিনয় হয়, তাহার নাম রঙ্গভূমি। রঙ্গভূমির কিঞ্চিৎ অন্তরে যে স্থলে নটেরা বেশবিন্যাস করে, তাহার নাম

নেপথ্য। নাটকের যে স্থলে "নৈপথ্যে" এইরূপ লিখিত থাকে, তাহার অর্থ এই, কোনও নট, নাটকীয় ব্যক্তিবিশেষের বেশ পরিগ্রহ করিয়া, রঙ্গভূমিতে প্রবেশ করিবার পূর্ব্বে, নেপথ্য হইতে কিছু বলিতেছে। যথা, "নৈপথ্যে। হলা হলা সউন্তলে।" ১৪ পৃ০।

১০। **প্রকাশ**—অভিনয়কালে কোনও নট, অন্যের নিকট গোপন করিবার নিমিত্ত, মনে মনে বিষয়বিশেষের আন্দোলন করিয়া, অথবা সন্নিহিত ব্যক্তিরা শুনিতে না পায় এরূপ অনুচ্চ স্বরে কহিয়া, পরে সকলের গোচরে যাহা বলে, তাহাকে প্রকাশ কহে। যথা "শকুন্তলা। আত্মগতম্। জহ অত্তণো পহবিস্সং। প্রকাশম্। কা তুমং বিসজ্জিদব্বস্স রুন্ধিদব্বস্স বা।" ৩৭পৃ০। "রাজা। অপবার্য্য। হন্ত দ্বিতীয়মিদমাত্মাজননম্। প্রকাশম্। সা তত্র-ভবতী কিমাখ্যস্য রাজর্ষেঃ পত্নী।" ২৩৪পৃ০।

১১। **প্রবেশক**—কখনও কখনও কোনও অঙ্কের সমাপ্তির পর, পর অঙ্কের আরম্ভের পূর্ব্বে, নীচ পাত্র দ্বারা অতীত বিষয় উল্লিখিত অথবা ভবিষ্য বিষয় সূচিত হইয়া থাকে। নাটকের এই অংশকে প্রবেশক বলে। প্রবেশক পর অঙ্কের প্রস্তাবনাস্বরূপ।

১২। **প্রস্তাবনা**—সূত্রধার, রঙ্গভূমিতে প্রবিষ্ট হইয়া, নান্দী-সমাধানের পর, অনন্তরপ্রবিষ্ট নটবিশেষের সহিত কথোপকথনচ্ছলে, নাটক-প্রণেতা কবির ও অভিনেষ্যমাণ নাটকের উল্লেখ করে; এবং প্রসঙ্গ ক্রমে নাটকীয় ইতিবৃত্ত অবতীর্ণ করিয়া দিয়া, স্বীয় সহচর সমভিব্যাহারে, রঙ্গভূমি হইতে অপসৃত হয়; তৎপরে নাটকের অভিনয় আরব্ধ হয়। এই অংশকে নাটকের প্রস্তাবনা কহে।

১৩। **বিদূষক**—রাজসহচর। রাজার বিশ্রামকালে, এই ব্যক্তি তাঁহার সন্নিহিত থাকে এবং ভাঁড়ামি করিয়া তাঁহার চিত্তবিনোদন করে।

১৪। **বিষ্কম্ভক**—নাটকীয় ইতিবৃত্তের নীরস অংশ সকল, প্রকৃত প্রস্তাবে বর্ণিত হইলে, সমাজিকবর্গের বিরক্তিকর হইতে পারে; এজন্য নাটককর্ত্তারা, অপ্রধান ব্যক্তির মুখে সেই সেই অংশের সংক্ষেপে কীর্ত্তন

করিয়া, সরস অংশের অবতরণ করিয়া দেন। নাটকের এই অংশকে বিষ্কম্ভক বলে। বিষ্কম্ভক অঙ্কের প্রস্তাবনাস্বরূপ, অঙ্কের আদিতে গ্রথিত হইয়া থাকে। বিষ্কম্ভক দ্বিবিধ, শুদ্ধ ও মিশ্র; কেবল মধ্যমপাত্রঘটিত হইলে শুদ্ধ বিষ্কম্ভক, আর মধ্যম ও অধমপাত্র ঘটিত হইলে মিশ্রবিষ্কম্ভক, বলে।

১৫। **সূত্রধার**—যে প্রধান নট সূত্র ধরে অর্থাৎ নাটকের সূত্রপাত করে, তাহার নাম সূত্রধার। ইদানীন্তন যাত্রাসম্প্রদায়ের অধিকারী সূত্রধারশব্দে নির্দ্দিষ্ট হইতে পারে।

১৬। **স্বগত**—আত্মগত দেখ।

সম্পূর্ণম্।

PRINTED BY PITÁMBARA VANDYOPÁDHYÁYA,
AT THE SANSKRIT PRESS.
62, AMHERST STREET, 1873.

गौडदेशप्रचलितपुस्तकानुसारेण परिवर्त्तिताः पाठाः ।

पूर्व्वतनाः	परिवर्त्तिताः
१ । सुरयुवतयः ।	१ । समितिषु सुराः । ६२ । १० ।
२ । शान्तमनाः ।	२ । आन्तमनाः । १४२ । ७ ।
३ । एनम् ।	३ । एव । १४४ । २ ।
४ । न च अमाय ।	४ । यथा अमाय । १४४ । ३ ।
५ । कृतकार्य्यद्वेषः ।	५ । कृतकार्य्यद्वेष्टा । १५२ । ५ ।
६ । कृतावज्ञा ।	६ । उचिता राज्ञः । १५२ । ६ ।
७ । कान्दप्पआहिं ।	७ । कान्दप्पवाणं । १८७ । ५ ।
८ । आअच्छामि ।	८ । आअच्छेहि । २०६ । १० ।
९ । अब्रह्मण्यम् ।	९ । अव्वम्हणं । २११ । ७ ।
१० । परिपालयितुम् ।	१० । परिपालयतु । २१७ । ३ ।
११ । कतरस्मिन् ।	११ । कतमस्मिन् । २२१ । २ ।
१२ । वल्मीकाग्र ।	१२ । वल्मीकार्द्ध । २२५ । ५ ।
१३ । तत्त्वानार्य्यः ।	१३ । अनार्य्यः । २३४ । ११ ।
१४ । महाराओ ।	१४ । महाभाओ । २३६ । ७ ।

लिपिकरप्रमाददूषितधिया परिवर्त्तिताः पाठाः ।

पूर्व्वतनाः	परिवर्त्तिताः
१। चउरगम्भीराकिदी ।	१। मऊरगम्भीराकिदी ।२७।१।
२। प्राग्रसरः ।	२। प्राग्रहरः । १५० । ४ ।
३। सोअणीओ ।	३। मोअणीओ । १५५ । ५ ।
४। प्रकाशम् ।	४। पुरोहितः । १६० । १ ।
५। पलिदोषं कहेहि ।	५। पलिदोषे कहेहु । १७४ ।४।
६। पञ्जुसुआणाअणो ।	६। पसुअणाअणो । १७४ । ८ ।
७। वर्त्तिकोच्छ्वासात् ।	७। वर्षिकोच्छ्वासात् । १९८ ।१।
८। अस्मादङ्गुलीयोपलम्भात् ।	८। अस्याङ्गुलीयस्योपलम्भात् । २४१ । ८ ।
९। महीयसाम् ।	९। महीय्यताम् । २५२ । २ ।

00013314